MANAVEDA

MANAVEDACHAMPU

VOL. I-II. (PTS 1-2.)

015:7E25:1
F7

015:7E25:1 F7
MANAVEDA.
Manaveda champu.
22388

MUL
022388

Madras University Library.

Date Label.

Ac. No. 22388 Cl. No. O15:7E25:1 E7

This book should be returned on or before the date last marked below.

23 DEC.

UNIVERSITY LIBRARY
-7 SEP 14
MADRAS

# केरळग्रन्थमाला.

VOL. I 1907. NO. 4

5-4

विषयानुक्रमः


१. श्रीकृष्णविलासकाव्यम् सुकुमारकृतम्

२. आश्चर्यचूडामणिर्नाटकम् शक्तिभद्रकृतम्

३. मानवेदचम्पुकाव्यम् मानवेदराजकृतम्


KOTTAKAL

Palghat:
PRINTED BY KAMPROM BROTHERS
1907.

Copy Right Reg

Kera

22388

015:7F25:1

F7

# सव्याख्याने मानवेदचम्पुकाव्ये

## प्रथमस्तबकः.

---

लक्ष्मी मातनुता त्स वो मुनिवरो व्यासाभिधानोऽनिशं
यः प्रालेयगिरा ववान्तरतमोरूपेण नित्यन्तपः

---

हरिः श्रीगणपतयेनमः अविघ्नमस्तु. अशोकनिलयावासि तेजो मूर्त्तित्रयात्मकं सच्चिदानन्द मद्वैत न्चित्तसीमनि भावये १. स्थलीश्वरौ सदा भद्रविक्रमौ भक्तरिष्टदौ निर्विघ्न न्त त्तद्देशस्य दिर्ध्नशंन्च समाश्रये २. वाणी न्नन्दसुत रुचाऽपि वन्दे शितिघनद्युतिं. कमलासनवैवश्यविश्रामणचणौजसं ३. शिष्टान्ध्यमार्गचनिरासकर्म द्विज्ञातविस्मापनगोप्रकाण्डः रामो गुरु र्मे हरिसेवक स्ता त्सलक्ष्मणः साधुपदोपदेष्टा ४. चंपुभारतसूक्ष्मार्थदर्शनं बालतर्पणं टिप्पणं रामशिष्यो हि कृष्णो विलिखति क्रमात् ५. इह खलु कविः चंपुभारतस्य पूर्वभागतया अनुक्रमेण सोमवंश्यानां पुरूरवः प्रभृतीनां राज्ञा न्चरितवर्णनरूपं क मपि प्रबन्ध मारभमाणो मंगलारंभयुक्तानां विनिपातो न विद्यत इत्युक्तत्वा द्विघ्नविघाताय द्वादशभिः पद्यै स्स्वाभीष्टदेवता स्सादर मनुसन्दधाति लक्ष्मीत्यादि व्यासाभिधान स्स मुनिवरः अनिशं वः लक्ष्मी मातनुतात् इतिक्रियाकारकसंबन्धः आतनुतात् कुरुतात् तनु विस्तार इत्यस्मा ल्लोटि तुह्यो स्तातङि ति तातङ् अनेकार्थत्वा द्धातूना मत्र तनोतेः करण मर्थः, तथाच पुरुषकारे धातुपाठे तु क्रियावाचित्वप्रदर्शनपरो ऽर्थनिर्देशः नतु नियमार्थः तथाच कुर्द खुर्द गुद क्रीडाया मेवे त्यवकारः पठित इति कय्यटोक्तिर्निर्वाहा दवसीयते यथाप्रयोगम् क्वाचि दपठिते प्यर्थे धातवो भवन्ती ति. यावत् इति अवान्तरतमा नाम मुनि र्भूत्वा अवगत मान्तर न्तमो यस्ये त्यवान्तरतमाः प्रालेयगिरौ हिमवति नित्य न्तप स्तन्वानस्य हरे र्भगवतो विष्णोः अविकला पूर्णा कला अंशः लोकोपकारे विषये उद्यता तदेव प्रतिपादयति द्रागित्यादिना द्वादशे स्तबके वक्ष्यति च यो लोका नित्यादि विश्वै स्सात्वतपुङ्गवै रित्यादिच द्रागित्यनेन वेदविभजनानन्तर मावीन्तितोपनतां तदर्थानां व्याकीर्णता मालोच्य अर्थरूपेणा ऽपि क्रमास्तिष्ठत्विति मनसि कृत्य भगवा न्व्यास स्तल्लक्षण मेव महाभारताख्य मितिहास ङ्कृतवा निति तद्व्याख्योक्तन्द्योत्यते. अस्यन्दत. प्रस्नुता. स्यन्दू प्रस्रवणे अनुदात्तः. अस्मा

तन्वानस्य कला हरे रतिकला लोकोपकारोद्यता
द्राग स्यन्दत भारतामृतझरी यस्ये य मास्येन्दुतः ॥ १ ॥
नृत्यन्तं रजनीमुखे स्वापितरं स्तुत्यं त्रिलोकीजनै
र्नित्य न्त न्निजकर्णतालपवनै रत्यन्तमानन्दयन्

लङ् भारत मेवा ऽमृतझरीति मयूरव्यंसकादय श्चेति समासः. अत्राऽऽदौ नाराय णशक्तिवाचकस्य लक्ष्मीशब्दस्य प्रयोगो मङ्गलार्थः. भूदेवताकस्य सर्वगुरो र्मगण स्य प्रयोग श्च. तदुक्त शुभदो मो भूमिमय इति. किञ्च हरेरंशभूतस्य व्यासस्ये ष्ट देवतात्वेनोक्त श्श्रोतॄणां आत्मन श्चा ऽतितरां मङ्गलाय सर्वदा सर्वकार्येषु ना स्ति तेषा ममङ्गलं येषां हृदि स्थितो विष्णु र्मङ्गलायतनं हरि रित्युक्तत्वात् अत्र व्या सविषयो रतिलक्षणो भावः हरेः कलेत्यनेन व्यासस्य मुन्यन्तरेभ्यो व्यतिरेकः भारत स्याऽमृतझरीत्वारोपणेन एतदास्वादनतत्पराणां नराणां जन्मजरामरणादि रूपस्य संसार स्याऽत्यन्तो परमस्स्या दिति वस्तु च प्राधान्येन व्यज्यते वर्णावृत्ति रनुप्रासः पादेषु च पदेषु च पूर्वानुभावतस्स्फारबोधिनी यथदूरता इति सरस्वतीकण्ठाभरणेऽनुप्रासस्य सामान्यलक्षण मुक्तम् अत्र कला कला अस्यन्दत आस्येन्दुत इति द्वयो र्व्यञ्जनसमुदाय योः परस्पर मनेकधा सादृश्या च्छेकानुप्रासः यथोक्त मलङ्कारसर्वस्वकृता सङ्ख्यानिय मे पूर्वं छेकानुप्रासः द्वयो र्व्यञ्जनसमुदाययोः परस्पर मनेकधा सादृश्यं सङ्ख्यनियमः. यस्येय मास्येन्दुत इति केवलव्यञ्जनसादृश्यरूपो वृत्यनुप्रासः अन्यथा तु वृत्यनुप्रासः केवलव्यञ्जनसादृश्य मेकधा समुदायसादृश्य न्त्यादीना ञ्च परस्परसादृश्य मन्यथाभा : अनयो रेकाभिधानानुप्रवेशलक्षण स्सङ्करः अत्राऽश्लिष्टशब्दनिबन्धनं केवलं परंप रितरूपकम् अभेदप्राधान्य आरोपविषयानपह्नवे रूपकम्. आरोपोऽन्यत्राऽन्यावापः अ त्राऽऽस्यस्येन्दुत्वारोपहेतु भारतस्याऽमृतझरीत्वारोपः. एवं रूपकपरंपरायुक्तत्वात् परं परितत्वं. आस्यस्यैकवार मेव रूपितत्वात् केवलत्व ञ्च अत्र शार्दूलविक्रीडितं वृत्तं सूर्याश्वै र्मसज स्तता स्सगुरव श्शार्दूलविक्रीडितं १

नृत्यन्तमित्यादिः—नृत्यन्तं नर्तनं कुर्वन्तं नृती गात्रविक्षेपे श्यन् परस्मैभा षः नित्यंशाश्वत मिति पितुर्विशेषणं वा स्तुत्यं एतिस्तुशासु इति क्यप् ह्रस्वस पिती ति तुक्च त्रयाणां लोकानां समाहार स्त्रिलोकी तद्धितार्थे ति समासः संख्यापूर्वो द्विगु रिति द्विगुत्वा द्विगो रिति ङीप् अकारान्तोत्तरपदो द्विगु स्त्रियां भाष्यत इति द्विगोः क्लीबत्व बाधः बुध्यादिनैकत्र मेलनं समाहारः कर्णतालपवनैः कर्णाघातपवनैः यद्वा शोभनः कर्णः

आघ्नान श्च यथालयं भुवि कराग्रेणोऽरुतादं
कृपानिघ्नात्मा स हि विघ्नराज इह मे विघ्ना न्विजेघ्नीयताम् ॥ २ ॥
विद्यादानविशारदा विनमतां बालेन्दुराजज्जटा
जूठाशारदनीरदावलिरुचीनीलारदा शारदा

कर्णताल: "नवरत्नालभिमेघ नभस्तले रचिरोचि रविवत वारिदैः" रित्यत्र वल्लभा ख्यायां शोभनं नभा नवरागारति प्रासावचने श्च ति समासः अन्यार्थो ना मापि शब्दानां प्रशंसार्थता दृश्यते यथा कर्णराजः केशहस्तो मुनिशार्दूल इत्या दौ तालादीनीति आघ्नानः आहननं कुर्वन् आङोयमहनःस्वनेपदं अत्र अकर्मकादिति वर्तते तेन भुवीत्युक्तः यथालयं लय मनतिक्रम्य अव्ययं विभक्ती त्यादिना पदार्थानतिवृत्ता वव्ययीभावः विलम्बितादि लयं इति नाट्यसूत्रे "गीत वाद्यादन्यानाङ्क्रियातालया श्च साम्यता" इति टीकासर्वस्वे उरुतादं मिति क्रियाविशेषणं क्रियाविशेषणानां च नपुं सकलिङ्गता द्वितीयैकवचनान्तता च वक्तव्या कृपया निघ्न अधीन. अधीनो निघ्न आ यत्त इत्यमरः इह प्रारीप्सिते ग्रन्थे विघ्ना न्विजेघ्नीयतां पुनः पुनः निश्शेषतया विह न्तु विघ्नानां पुनः पुनरुत्पत्ति संभवात् हननस्य पौनःपुन्योपपत्तिः विपूर्वाद्धन हिंसाग त्यो रित्यस्मा द्धातो रेनाचो हलादे रिति यङ् हन्ते र्हिंसायां यङि घ्नीभावो वक्त व्य इति घ्नीभावः सन्यङो रिति द्विर्वचनं हलादि शेषः ह्रस्वः कुहो श्चु रिति चुत्वं अ भ्यासे चर्चे ति जश्त्वं गुणो यङ्लुकोः रित्यभ्यासस्य गुणः लाट स्तादयः पान. पुन्यं भृशा र्थो वा क्रियासमभिहारः "धन हुताशना दिच्छे द्वज मिच्छे त्तयाऽनिलात् आरोग्यं भास्करा दिच्छे दाधिपत्यं प्रजापतेः मोक्षं जनार्दना दिच्छेत्सम्यक्ज्ञानं महेश्वरात् स र्वारंभेष्वविघ्नेन कार्यसिद्धिं गणेश्वरात्" इति बोधोत्पत्तिप्रकरणे अत्र तच्छब्दाभ्या मनयो रव्यवहितभावस्य युक्तता गम्यते. २

**विद्येत्यादिः**—जटाजूटः जटाबन्धः शारदः शरादिभवः कालात् ठञिति ठञ् श्रा द्धे नियामितत्वा दन्यत्राऽणेव रुची इति बह्वादिलक्षणा ङीष् तत्र हि पठ्यते कृदि कारा दक्तिनो वा ङी ष्वक्तव्यःसर्वतो क्तिन्नर्था दित्यक इति कृदिकारा दकृदिकारा द पि ङीकारः परिभवः घाञ उपसर्गस्य घाञिति दीर्घः त न्ददाती ति ग्राती नुपसर्गे क इति कः शीर्यमाणत्वा च्छाराणि शरीराणि तानि मन्त्ररूपेण शोधयतीति वा तत्वज्ञानरू पेण खण्डयतीतिवा शारदा सरस्वती शब्दब्रह्ममयी शब्दब्रह्मस्वरूपिणी मयद तद्रूप इ ति वचना न्मयट् शैलूषी नटी लघु शीघ्रं मोमुषातु पौनःपुन्यना त्यर्थं मुष्णातु मुष स्ते

शब्दब्रह्ममयी विरिंचवदनांभोजन्मरंगस्थली
शैलूषी लघु मा शुषीतु शमलं मे शेमुषी मीयुषी ॥ ३ ॥

केलीलोल मुदारनादमुरलीनालीनिलीनाधरं
धूलीधूमलकान्तकुन्तलभरव्यासंगिपिञ्छाञ्चलं ।
नालीकायतलोचनं नवघनश्यामं क्वणत्किंकिणी
पालीदन्तुरपिङ्गलांबरधरं गोपालबालंभजे ॥ ४ ॥

अघविहतिकराणां कृष्णनाम्नां गुरूणा
मनवरत मपाङ्गप्रावृषेण्यांबुवाहः !

---

ये यङ् यङो चिचेति चकारस्य बहुलग्रहणानुकर्षणार्थत्वा यङो लुक् प्रत्ययलक्षणेन यङन्तत्वा द्धातुत्वे लोडादिद्विर्वचन श्च चर्करीतं परस्मैपद मदादिव च्च द्रष्टव्य मिति वचना च्छपो लुक चर्करीत मिति यङ्लगन्तस्य पूर्वाचार्याणां संज्ञा यङो वेतीड भाव: शमलं मनोमलं शेमुषी मीयुषी मनसि सन्निहिता ईयुषी ति उपेयिवा नित्यादि ना लिटि भूतमात्रे भाषायां क्वसु: उपोपसर्गग्रहण मतन्त्रं तेन थिवान् समीयिवा नित्या द्यपि संभवती ति वृत्तिकारादय: शारदे त्यत्रो पमा क्षिप्ता नीकारदे त्यनेन देवीरुचो व्यतिरेको ध्वन्यते अंभोजन्मेव वदनं वदनांभोजन्म उपमित मिति समास: धर्मवाचो लो पे समासगा लुप्तोपमा एत द्विलोपे क्विप् समासगा तदेव रङ्गस्थली तत्र शैलूषी ति अ श्लिष्टशब्दनिबन्धनं केवलं परंपरितरूपकं अत्र सरस्वत्या श्शैलूषीत्वारोपहेतु वद नांभोजन्मनो रङ्गस्थल्यारोप:, ॥ ३ ॥

**केलीत्यादि:**—मुरली वंशवाद्ये चे ति केशव: निलीन: श्लिष्ट: धूमलं धूम्रं पिञ्छाञ्चलं बर्हाग्रं पिङ्गलं पीतम्. ॥ ४ ॥

**अघेत्यादि:**—अघानिहातिकराणां ज्ञानसंपादनेन दुरितस्य दुःखस्या पि विह तिं नाशं कर्तुं हेतुभूतानां तच्छीलानां वा कृञो हेत्विति ट: दुः खैनो व्यसनेष्वघ मि त्यमर: गुरूणां देशिकानां "गुशब्द स्त्वन्धकाराख्यो रुशब्द स्तन्निरोधक: अन्धकार निरोधित्वात् गुरु रित्यभिधीयते " इत्युक्तत्वा दज्ञा[illegible]रोधिना मित्यर्थ: अपाङ्ग एवप्रा-

प्रविसरदनुकंपावारिसंभारसान्द्रो
मम हृदयमयूरं नर्त्तये दात्तमोदं ॥ ॥ ५ ॥

उदारचूडाधृतसत्कलापा सर्वांगरङ्गद्विलसत्कलापा ।
स्थलीनिलीनाकुलदेवतामे मलीमसंमानसमापुनातु ॥ ६ ॥

कालप्रदूध्वंसिफालप्रविलसितदृशासंभवे ! सुंभमाथ
प्रोच्चण्डे ! चण्डमुण्डार्दिनि! विशदतराराल दंष्ट्राकराले !

---

षेण्यांबुवाहः प्रावृषेण्यः प्रावृषि भवः प्रावृष एण्य इत्येण्यः अनुकंपैव वारि तस्य संभार स्संभरणं हृदय मेव मयूरं " मयूरो बर्हिणो बर्ही शुक्लापाङ्ग शिखावलः". इति वैजयन्ती नर्तयेत् परिस्पन्दयेत् हृदयं नवनवोन्मेषशालीकुर्या दिति यावत् आ समोद मिति क्रियाविशेषणं अनेन नर्तनप्रयोजकत्वस्य निष्कृत्यभावेऽपि भगवान् स्वकृतेन तुष्ये दित्युक्तरीत्या स्वय मेव तुष्ये दिति द्योत्यते अत्र सावयवं समस्तवस्तु विषयं रूपकं समस्तवस्तुविषयं श्रौता आरोपिता यदा अपाङ्गस्यावयविन अंबुवाहत्वेन अनुकंपाहृदययो रवयवयो र्वारित्वेन मयूरत्वेन चाऽरोपणात्. वसुमुनिविरति श्चे न्मालिनी नौमयौ यः. ५

उदारेत्यादि—कलं आप्नोतीति कलाप श्चन्द्रः बर्हं च सर्वांगेषु रंगन्तः व्याप्नुवन्तः विलसत्कलापा स्सर्पसमूहा यस्य रगि गत्यर्थः विलसन्त श्शोभमा नाः कलापा भूषणानि च कलापो भूषणे बर्हे तूणीरे संहता वपीत्यमरः स्थलीनिलीना कुलदेवते त्यनेन हरो हरि श्चोक्तौ मली मसं मलिनं ज्योत्स्नातमिस्रेति निपातः आ पुनातु आ समन्तात् शोधयतु तत्तदुचितशब्दार्थप्रतिबिंबनक्षमं करोत्विति भावः पूञ् पवने इह पवनं शोधनं तथा च पुनीते आत्मान मित्यादौ सकर्मकत्वं दृश्यते इति मा धवः अत्र हरिहरयो र्द्वयो रपि प्राकरणिकत्वा द्वयोः प्राकरणिकयोः श्लिष्टपदोपनि बन्धेनश्लेषोऽलंकारः विशेष्यस्यापि साम्ये द्वयो र्वोऽपादाने श्लेषः उपेन्द्रवज्रा जत जा स्ततो गौ सा दिन्द्रवज्रा यदितौ जगौ गः अनन्तरोदीरितलक्ष्मभाजौ पादौ यदी या वुपजातय स्ताः ६

कालेत्यादि—दृशाया नेत्रात् संभवो यस्या हलन्ता दपि टापं वे त्युक्त्या टाप् सुभमाथे सुंभस्य मथने मथे विलोटने भावे घञ् प्रोच्चण्डे अतिक्रूरे विशदतराभ्या

विश्वेशित्र्यंब ! शश्वद्वलयनिलयवासे ! नवांभोदवर्णे !
पादांभोजानतं मा मनुदिन मनुकंपाकुले ! पालयेथाः ॥ ७ ॥

कोदण्डं सशरं भुजेन भुजगेन्द्राभोगभाजा वहन्
वामेन छुरिकां विपक्षदलने दक्षेण दक्षेण च ।
कान्त्या निर्जितनीरदः पुरभिदः क्रीडाकिरातकृतेः
पुत्रोऽस्माकमनश्वरनिर्मलयशा निर्मातु शर्माऽनिशं ॥ ८ ॥

नीलापगानिलयवर्यविराजमाने
कालोल्लसत्कुवलयावलिकेलिकारे
नाथे ! समस्तजगतां रमतां मनो मे
रामे सदैव रमणीयगुणाभिरामे ॥ ९ ॥

---

मत्यर्थं धवलाभ्यां अरालाभ्यां वक्राभ्यां दंष्ट्राभ्यां कराले भीषणे विश्वस्य ईशितुं शील मस्याः ईश ऐश्वर्ये सुप्यजातौ णिनि स्ताच्छील्य इति णिनिः नियन्तृत्व मधिपतित्व ञ्च ईशनं अंब ! अंबार्थनद्यो रिति ह्रस्वः शश्वत् नित्यं वलयनिलयवासे वलयारण्यसन्निहिते अनुदिनं दिने दिने वीप्साया मव्ययीभावः नवांभोदस्य वर्ण इव वर्णो यस्या इति सप्तम्युपमानपूर्वपदस्य बहुव्रीहि रुत्तरपदलोप श्चेति बहुव्रीहि रुत्तरपदलोप श्चे ति केपियमुपमा त्रिलोपे च समासगा म्रभ्नै र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं ७

**कोदण्डमित्यादि**—आभोगः परिपूर्णता आभोगौ यत्नपूर्णते इति वैजयन्ती छुरिकां असिधेनुकां छुरति त्वगादिक मग्रेण च्छिनत्तीति छुरिका च्छुत् च्छेदन इति धातु रिति सुबोधिन्यां दक्षेण दाक्षिण्येन निर्जितो नीरदो येन अत्रोऽपमाऽऽक्षिप्ता शर्म निर्मातु मा माने मान मिहाऽन्तर्भावः तेनाऽकर्मकोऽपि अग्निमनुमाति गृहं निर्मातीत्यादौ सकर्मकत्व मुपसर्गवशेनाऽर्थान्तरवृत्त्येति माधवः ८

**नीलापगेत्यादि**—नीलापगानिलयवर्ये नीलापगाभिधाने क्षेत्रवरे विराजमान इति सान्निध्यातिशयो दर्शितः कालोल्लसत्कुवलयावल्या सह केलिं करोती ति

अत्यन्तोल्लसितं विभूषणगणै रुल्लाघतोल्लासकं
दीनानां गुरुमारुतालयगतं त्रैलोक्यभाग्याङ्कुरं।
निन्द न्निर्मलकान्तिकन्दलभरै रिन्दिन्दिरा निन्दिरा
लीलामन्दिर मिन्दुसुन्दरमुखं वन्दे परं दैवतं ॥ १० ॥

राज्ञा मेकावलंबे ज्वलनकुलभुवां शारदांभोदवर्णे
सव्ये भागे तुषाराचलसुकृतपरीपाकदेदीप्यमाने।
लक्ष्मीग्रामाधिवासे प्रणतिपरनृणां शश्व दक्षीणलक्ष्मी
दानोन्निद्रे दयार्द्रे रति रुदयतु नः कामदे वामदेवे ॥ ११ ॥

एता माशु कृतिं मम प्रथयता दद्धा सिताब्जप्रभं
गाढाश्लिष्टगलं श्रिया परिलसच्चन्द्रावतंसोज्वलं।

---

तथा कर्मण्यणित्यण् सदृशगुणेनैव हि क्रीडा क्रियते तत्सदृश इति यावत् वृत्तं वसन्त तिलकं तभजा जगौ ग इति ९

**अत्यन्तेत्यादि**—उल्लाघो नीरोग स्तस्य भाव उल्लाघता तस्या उल्लासक उत्पादकः उल्लासयतीत्युल्लासकः "राघृलाघृद्राघृसामर्थ्ये" इत्यस्मा द्दण्डकधातो न्निष्ठाया मनुपसर्गात् "फुल्लक्षीबकृशोल्लाघा" इति निपात्यते. दीनानां व्याध्यादिभि र्दुःखितानां त्रैलोक्यभाग्याङ्कुरं सकल मभीप्सित मेतत्भजनेन सिद्ध्यतीति भावः इन्दिन्दिरान् भृङ्गान्. "भृङ्ग भ्रमर भृङ्गाण मधुलिण् मधुपाऽलिनः अलि द्विरेफो लोलम्बो भसलः पुष्पलोलुपः इन्दिन्दिरो मधुकर श्चञ्चलीको मधुव्रत" इत्यभिधानरत्नमाला इन्दु रिव सुन्दर मिति "उपमानानिसामान्यवचनै" रिति समासः उपमाप्रतिपादकस्य लोपे लुप्तोपमा वादे लोपे समासे सा कर्माधारक्याचि क्यङि कर्मकर्त्रोर्णमुलि १०

**राज्ञा मित्यादि**.—ज्वलनकुल मग्निवंशः सव्ये वामे तुषाराचलसुकृतपरीपाक इति श्रीपार्वती हेतुहेतुमतोरभेदोपचारः सर्वान् कामान् ददाति कामं स्मरं द्यतीति च कामदः वामदेवः शर्वः ११

**एतामित्यादि**.—कृतिं प्रारभ्यमाणं प्रबन्धं "स्त्रियांक्ति" न्निति बाहुलक

नित्यं संभृतभूतिदंतिदमनं निश्शषभूतानतं
शश्वत्संश्रितसर्वमंगल मशोकावासवासं महः ॥ १२ ॥
लक्ष्मी मक्षीणरूपा मनिश मनुभवन् भूमिजां भूरिमोदं
तन्व न्नास्थां सुमंत्रे भुवि च तिलकयन् नन्वयं चित्रभानोः ।
विश्वामित्राधिकानन्ददविपुलभुजाविक्रमो विक्रमाख्यो
राजा रामाभिरामो जगदवनकलालालसी लालसीति ॥ १३ ॥

त् कर्मणि क्तिन् प्रथयतात् प्रख्यापयतात् प्रथ प्रख्याने भूवादिः "हेतुमति च" ति णिच् अद्धा अञ्जसा सिताब्जस्याऽसिताब्जस्य च प्रभेऽत्र प्रभा यस्य श्रिया नीलवर्णया कान्त्या च लक्ष्म्या च चंद्र एवाऽवतंसः शिरोलंकारः तेनोज्वलं चंद्रः स्वर्णे "स्वर्णोपि भूरिचंद्रौद्वा" वि त्यमरः तद्विकारो वतंसः किरीटं तेनोज्वल ञ्च भूति भस्म ऐश्वर्य ञ्च "भूति र्भसितं भस्म क्षारो रक्षा च निर्दिष्टा" इतिशब्दरत्नाकरः दन्ती गजासुरः "मेरुमन्दरसंकाशं गजरूपं महासुरं निहत्य तस्य कृत्ति न्तु कृतवा नंशुकं हर" इति स्कान्दे कुवलयापीड श्च तं दमयतीति तथा दमे र्णिजन्ता न्नन्यादित्वात् ल्युः "कर्मणिगम्यर्दि नाशिसूनिभ्य" इति नन्यादिगणे भोजश्च भूता भिंगिरिटिप्रभृतयः जना श्च संश्रिता सर्वमंगला पार्वती यत्तत् सर्वाणि मंगलानि च, यद्वा संश्रितानां सर्वमंगलं सर्वमंगलहेतुभूत मित्यर्थः हेतुहेतुमतो रभेदोपचारः अशोकावासे श्रीमदशोकपुरे वासः स्थिति र्यस्य तत् मह स्तेजः अत्र गुणगुणिनो रभेदो पचारात् तेजस्वी लक्ष्यते. तेजः प्राचुर्यञ्च फलं स च श्लिष्टविशेषणमाहात्म्यात् हरोहरि श्चे त्यायाति उक्तानांसर्वासामिष्टदेवतात्वेपि अत्रकृतिं मम प्रथयतादिति स्वप्रबन्धस्य प्रचयगमन प्रार्थनया त द्विषये स्या मशोकपुरवासिन्यां देवतायां कवे स्सविशेषा प्रतिपत्ति रनुक्तसिद्धा अत्रा पि द्वयोः प्राकरणिकयो रिति पूर्वोक्तश्लेषो लङ्कारः १२

अथ गुरुजनस्या पिदैवतेभ्यो भिन्नतया तदानीन्तनं निजगुरुभूतं राजानं भक्त्यातिशयेन चतुर्भि श्श्लोकै र्वर्णयति **लक्ष्मी मित्यादि**. अक्षीणं अत्र नञ स्तद्विरुद्धार्थवाचित्वात् परिपूर्णं रूपं सौन्दर्यं स्वरूप ञ्च यस्याः भूमिजां लक्ष्मीं सीतां अन्यत्र भूमिजा मिति विशेषानुक्त्या समस्ताचलांभोनिधिभ्यो जातां आयतिरूपां लक्ष्मीं समृद्धिं अनिश मनुभ्वन् अयोनिजायाः वनितायाः अखण्डभूमिजाया स्संपद श्चाऽनुभवन् भूरिमोद मिति क्रियाविशेषणम् आस्थां तात्पर्यं आदर मिति यावत् "आस्था

तन्वानो धर्मजातस्थिति मजितसुहृत्प्रोल्लसत्भीमसेनो
बद्धासङ्गो यमादौ सरसतरगवाकर्णसंमोददाता ।

त्रेष्ठ्यां प्रतिज्ञायां तात्पर्ये त्वत्रलंदने ' इति पै आस्था भावे दोष माह कामन्तकः " अप्रयत्नं धृतो मंत्रः प्रबल बन्धि । द्रुहेतु आतापसन्तत मन्त्रं संरक्षे त्तवर न्तुसत " इति सुमन्त्रे सुमन्त्राख्ये मन्त्रिवरे स्रावादिदोषराहत्या च्छोभने कार्यनिरूपणे च तिल कयन् तिलकवन्तं कर्वन् तत्करोती ति णिचि विन्मतो लुगिति मतुपो लुक् चित्रभानो रादित्यस्या ग्ने श्च " सूर्यवह्नी चित्रभानू " इत्यमरः विश्वामित्रस्य विश्वामित्रमुनेः वि श्वेषां सर्वेषां अमित्राणां च अधिकमानंदं ददाति यतीच. विश्वामित्राधिकानंददः राम इवा भिराम स्तत्तुल्य इत्यर्थः जगद्रक्षणे या कला शिल्पं " कला शिल्पे कालभे द " इति अमरः क्रियाभ्यासपूर्वको ज्ञानविशेष इति हरः गीतचित्रादिनपुण्य मिति टीकासर्वस्वे अत्र तु रक्षणविषयनैपुण्य तत्र लालसी औत्सुक्यवान् ' तृष्णातिरेके वाञ्छा या मौत्सुक्ये लालसा द्वयो ' रिति रुद्रः लालसो स्य.स्ती ति लालसी लस श्लेषण क्रीडनयोः यङ्लुगन्ता दस्मा ल्लसति विषये षु श्लिष्यति मनो नेनेति लालसः करणे घञ् तदन्ता दिनिः अनेन जगद्रक्षणनैपुण्य मेत्र सर्वदा संपादयती ति प्रकाशितं लाल सीत्यत्यर्थं शोभते यङ्लुक् अत्र प्राकरणिकाऽप्राकरणिकयोः श्लिष्टपदोपनिबन्धे श्लेषो लंकारः अयं तु विशेषणसाम्य एव भवति विशेषणस्य साम्ये त्वर्थप्रकरणादिनावाच्यार्थे नियंत्रिते यदर्थान्तरावगमनं त च्छब्दशक्तिमूलध्वनिविषयं स्यात् एव मुत्तरत्र तन्वा नइत्यत्रापि १३

तन्वानइत्यादि.—धर्मजातस्य धर्मसुतस्य स्थितिं रक्षां रिपुपराभूत्यभाव न स्वाराज्यपदस्थापन मिति यावत् धर्म समूहस्य प्रतिष्ठाञ्च अजितश्रीकृष्ण स्सुहृद्य स्य अजिताः केनाप्य परिभूताः सुहृदो यस्य अनेन दण्डापूपि कयासुहृदा मप्यजय्यत्वे किमुताऽस्ये त्युक्तं भवति. बलपराक्रमादिभिः प्रकर्षेणो ल्लसन्भीमसेनो यस्य प्रक र्षेणो ल्लसन्ती भीमा रिपुबलभयावहा सेना यस्येति च. यमयो र्यमलयोः नकुलसहदे वयोः आदिशब्देन द्रौपद्याभिमन्युषु च अहिंसा सत्यापरिग्रहब्रह्मचर्यरूपे यमे आदिश ब्देन नियमादय स्तेषु च. आसक्तः सरसतरया अत्यर्थं विषदिग्धया अतिरूक्षये ति यावत् गवा शरेण मधुरतरया गिरा च. " रसो रागे विषे वीर्ये तिक्तादौ पारते द्रवे " इतिअमरः " गौ र्नाऽऽदित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः स्त्री तुस्या द्दिशि भारत्यां

शश्वद्भद्रैकलोलो भृशमहितबलध्वंसनोदित्वरात्मा
सोऽयं शिशौरिशौरि विजय इव विजेजीयते भूरितेजाः ॥ १४ ॥

यस्याश्चितंगुणगणंभुवनेऽत्यसंख्य
ख्यासेदसाववििचिकित्सितमेवमित्सेत्
आधायसाधु कलधौतगिरिंतुलायां
वाराश्रिवावहहबाहुकताश्चवाञ्छेत् ॥१५॥

भूमौ च सुरभावपि नृस्त्रियो स्स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसिव्व" ति यादवः समासान्सा गमसंज्ञाज्ञापकगणनञ्निर्दिष्टा न्यनित्यानि समासान्तस्या नित्यत्वं द्वित्रिभ्यां पादमूर्द्धसु ब हुव्रीहा विति स्वरसूत्रे मूर्द्धग्रहणेकेर्ज्ञाप्यते द्विमूर्द्धे ति एवं सरसतरगवे त्यत्राऽपि समा सान्ताभावः कर्णस्य राधेयस्य कर्णयो श्श्रोत्रयो श्च सम्मोदं यति ददाति चे ति तथा "प्रिय मेवाभिधातव्यं सत्तु नित्यं द्विषत्सु च शिखी व तेषां मधुरः प्रियवा क स्य न प्रिय" इति कामन्तकः एकस्मिन् लोल एकलोलः भद्रायां भद्रेच एकलोलः भद्रैकलो लः शिवभागवतादिवत् समासः लोल स्सतृष्णः भृशमहितात् अत्यर्थं पूजितात् बल ध्वंसना च्छक्रात् उदित्वरः साधूदितः त्रैकाल्यतुल्यत्वात् अत्र भूते क्वरप् आत्मा देहो यस्य अहितबलानां ध्वंसने उदित्वर स्ताच्छील्ये नोद्यन् आत्मा मनो यस्ये ति च इण्न शिजिसार्तिभ्यः क्वरबि ति क्वरप् विजेजीयते अत्यर्थं जयति. जि जये जय उत्कर्षप्रा प्तिः भूरितेजाः अधिकतेजाः तेजः प्रभावे दीप्तौ च बले शुक्रे पी ति अमरः "अधिक्षे पो वमानादेः प्रयुक्तस्य परेणयत् प्राणात्यये प्यसहनं त त्तेज स्समुदाहृतं. राज्ञ तु स्वर्णवर्ण इति च "स्वर्णेपि भूरिचंद्रा" विति सिंहः १४

यदिति—सङ्ख्यातित् संख्यातु मिच्छेत् अविविकित्सितं असंशयं मित्सेत् मातुमिच्छेत् "सन्मिमीमाघुरभलभशकपतपदामचइस्" इती स् अत्र लोपोऽभ्यास स्ये त्यभ्यासलोप श्च कलधौतगिरिं सुमेरु कलधौतं रूप्यहेम्नो रित्यमरः वाराश्रिवौ तत्पु रुषे कृति बहुलग्रहणात् वाराश्रिध्यपांपति वाचस्पति दिवस्पत्यादिषु लुक् अहहे त्यद्भुते खेद इत्यमरः बाहुभ्यांतरती ति बाहुकः नौ द्व्यच ष्ठनि ति ष्ठन् वाञ्छेत् दीहेत वाछि इच्छायां अत्र असंभवद्वस्तुसंबंधा निदर्शना संभवताऽसंभवता वा वस्तुसंबंधेनगम्यम

क्षामोधर्मःक्ष्मायामयमखिलनयांभोनिधे रस्यरक्षा
शिक्षादाक्ष्यो दयाद्यत्समगतसकलः पूर्णभावेन तूर्णं ।
त न्मन्ये जातभीतिः कुहचन कुहनासंवृतात्मा निलिल्ये
"पापोद्यल्लालसोयं" कलि रिह कलिजेतार मेनं विभाव्य ॥ १६॥

स्वस्त्रीयोऽस्य खलु क्ष्मावलरिपो श्श्रीमानवेदाभिध
स्सुश्श्राव्य श्चरितं सुधाकरकुलक्षोणीभुजां पावनं
विद्वत्सम्मतचम्पुभारतनिबन्धस्याऽत्भुतार्थावली
सिन्धोः पूर्वतया च वर्ण्णयति त त्सन्तो लभन्ता म्मुदं ॥ १७ ॥

नं प्रातिबिंबकरणं निदर्शना कलधौतगिरितोलन मिव बाहुभ्यां वारान्निधितरण मिव चैतत् गुणसंचिख्यासे त्यर्थ स्सेत्स्यति १५

क्षामइत्यादि—क्षामः क्षीणः क्षायोम इति निष्ठातकारस्य मकारः रक्ष; चोरादिभ्यः पालनं शिक्षा वर्ण संकरादि निरसनं तयोर्दाक्ष्यं नैपुण्यं तस्योदयात् समगत संगतवान् "समोगमृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्य" इत्यकर्मकात् यमे स्तङ् "वाग म" इति कित्वपक्षे "अनुदात्तोपदेशवनतितनोत्यादीना मनुनासिकलोपो झलि क्ङिती" त्यनुनासिकलोपः तूर्णं अस्य लब्धप्रशमनसमय एव कुहना व्याजः निलिल्ये निलीनो ऽभूत् लिङ् श्लेषणे पापेषु पापकर्मसु उद्यती लालसा यस्य सः अनेन तत्कालीनाना मपि प्रायेण पारतन्त्र्यं द्योत्यते "पापोद्यल्लालसोय" मिति अस्य प्रबन्धस्य रचनासमयकलि दिनसंख्याऽपि विवक्षिता. कलेरात्मन स्तन्निरसनं उत्प्रेक्षाया हेतुः कलौ युद्धे जता च "कलि र्बिभीतके तस्य फलेऽनर्थे च संयुगे युगे चतुर्थे चे" त्यादि केशवः स्वरूपोत्प्रेक्षाऽत्रालंकारः मन्ये शंके ध्रुव मित्यादयः उत्प्रेक्षायोतकाः अध्यवसाये व्यापारप्राधान्य उत्प्रेक्षाविषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोध्यवसायः व्यापारप्राधान्यं नाम तस्य साध्यत्वं उत्प्रेक्षायां विषयस्य विषयित्वं प्रतिपाद्यमान मपि तदसाध्यत्व मेव प्रतीयते इति तत्र विषयविषयिणोः पारमार्थिकात्यन्ताभावभासनपर्यन्तस्या ध्यवसायस्या नि वृत्ते स्साध्यत्वं १६

अथ कवि स्स्वनामकथन पूर्वकं जिकीर्षितं प्रतिजानीते स्वस्रीय इत्या,

श्रीमा न्सीमातिगामी प्रसृमरमहिमा चन्द्रमा स्सान्द्रमोदम्
सेन्द्रै रास्वाद्यमान स्सकलसुरगणै रोहिणीप्राणनाथः ।
नेता दत्रेः पुराऽभू त्प्रभव उरुभुजाविक्रमाक्रान्तविश्व
क्षोणीचक्रान्तराणां भरतकुलभुवां भूभुजा म्मानभाजाम् ॥ १८ ॥

---

दि स्वस्वीय स्स्वसु रपत्यं स्वसुश्छ इतिछः अत्र खलु क्षमावलरिपो र्म्महीमहेन्द्रस्य विक्रमाख्यस्य राज्ञः सुश्राव्यं अवश्यं श्रवणीयं श्रु श्रवणे "ओरावश्यके" इति ण्यः सुधाकरकुलक्षोणीभुजां सोमवंश्यानां विद्वत्संमता य श्चम्पुभारतनिबंद्धः तस्य विद्वत्संमतस्या द्भुतार्थावलीतिन्यो श्चंपुकारतस्य पूर्तु र्ये त्यनेना स्मिन्नपि तद्गुणा स्सर्वे सन्ती ति अनुक्तसिद्ध मेव प्राचीनं चंपुभारत मिति चंपुभारतकृतो वच र मनुस्मृत्याऽत्र चंपुकारतानिरन्तरस्ये त्युदन्तस्वेनो क्ति र्नन्तां प्रार्थनानां लोट् डुलकर्णानौ संतो मुदं लभंता मित्यनेन "अस्ति भवद्य मपनुद्य गुणैकजीवा यद्यस्ति कश्चन रस स्सरिणो धयन्तु धूलीं विधूय विरसां मधु न मधूलीन्नालीकृतः कलयन्ति कि चञ्चलीका इति" श्रीकृष्णचंपूक्तरीत्या संत इदं काव्यं संशोध्या नुभवन्त्व ति भावः १७

अथ प्रबन्ध मारभते **श्रीमा नित्यादि** श्रीश्शोभा स्या स्ती ति श्रीमा न्त दस्या स्ती ति मतुप् "भूम निन्दाप्रशंसायां नित्ययोगे तिशायने संसर्गे स्ति विवक्षायां भवन्ति मतुबादयः" सीमा मतिक्रान्तु शील मस्ये ति विगृह्य सुप्यजाता णि निर्गिनौ प्राग्गतिसमासः पश्चा दुपपदसमासः सीमातिगामी तादृशः प्रसृमरः प्रसरणशीलो महिमा यस्ये ति पुन स्त्रिपदो बहुव्रीहिः "सृघस्यदः क्मरच्" इति क्मरच् "अवाप्य सुमह द्राज्यं सोम स्सोमवतां वर इयाज राजसूयं स सहस्रशतदक्षिणं होता स्यभवत्र अत्री रद्ध्वर्युर्भगवान् भृगुः हैरण्यगर्भश्चोद्गाताब्रह्मा ब्रह्मत्व मीयिवान् सदस्य स्तत्र भगवान् हरि र्नारायणः प्रभुः सनत्कुमारप्रमुखै राद्यै र्ब्रह्मर्षिभि र्वृतः दक्षिणा मददा स्सोमस्त्री ल्लोका निति नः श्रुतम् इति श्रीहरिवंशो क्त्य महत्वातिशयप्रख्यापना त्त सीमातिगामि प्रसृमरमहिमे त्युक्तं आह्लादक स्स निमीते सकल मिति चद्रमा श्चन्द्रः "इन्दु श्चन्द्रश्चन्द्रमा ओषधीश स्सोमो राजा रोहिणीवल्लभोऽब्जः ऋक्षेशः स्या दत्रिनेत्रप्रसूतिः प्रालेयांशु श्शीतगोचि र्मृगाङ्कः" इत्यभिधानरत्नमाला आस्वाद्यमानः स्वद आस्वादे कर्म्मणि शानच् पुराभूत् पुरि लुङिति लङ् प्रभवत्यस्मा दिति प्रभवः ऋदो रप् भरतकुलभुवां "भर्तव्योऽयं त्वया यस्मा दस्माकं वचना दिह तस्मा दयं भवत्व

गात्रे यस्य गुणोत्तरे समुदभू त्भूभारहारोद्यतः
पूर्णानन्दमय स्त्वय न्त्रिजगतिनाथ स्स नारायणः
अद्धा मूर्द्धनि य स्सदा भगवता संभाव्यते शंभुना
यस्याऽजायत विश्वलोकजननी लक्ष्मी स्स्वयं सोदरी ॥ १९ ॥

शश्व त्पादनिषेविविश्वजनतापच्छेदबद्धोद्यमः
कालोन्मीलितनीरजन्मसुषमाहारी तमस्तोमहा।

म्ना भरतो नाम ते सुतः भरतात् भारती कीर्त्ति र्येने दं भारतं कुलं अपरे ये च पूर्वे च भारता इति ते सुताः इति श्रीमहाभारतोक्त्या भरतात् पूर्वेषा मपि तत्कुलोत्पन्नत्वं १८

गोत्र इत्यादि—गुणै रुत्तरे श्रेष्ठे वंशस्य गुणा वंश्यानां उभयकुलपरिशुद्धत्वं यथाविधि विहितचत्वारिंशत्संस्कारसंस्कृतत्वं शौर्यादय श्च सम्यगनावृतत्वेन "त मद्भुतं बालक मंबुजेक्षण श्चतुर्भुजं" इत्याद्युक्तस्वरूपेण उदभूत् प्रादुर्बभूव असमासेप्येकत्वं न्नियमित मपि चिचनैश्चकिम आङः पञ्चम्यन्तेना ख्यातेनो पसर्गाणा मित्येकत्वनियमात् समुदभू दित्येकत्वं "तेप्राग्धातो" रिति ससुदोः प्राक्प्रयोगः भारहारशब्दौ कर्म्मभावघ ञन्तौ हारे उद्यत इति सप्तमीतियोगविभागात् समासः इहा तु क्तै स्समासार्थे द्वितीयेत्यादि खण्ड्यतां कृताबहुल मित्येतत् बाहुल्यं वा विजृंभता मिति सर्वस्वे आनन्दमय इत्यत्र तत्प्रकृतवचने मयडिति मयट् प्राचुर्येण प्रस्तुत आनन्द एवेत्यर्थः पूर्ण श्चा सा वानन्दमय श्च यद्वा मयट् तद्रूप इति केचि दिति वचनात् पूर्णानन्दस्वरूप इत्यर्थः तिसृणा ञ्ज गतीनां समाहार स्त्रिजगती तद्धितार्थे ति समासः अद्धा समक्षं संभाव्यते सम्मान्यते संपूर्वात् भ्वते र्हेतुमण्णिच् सोदरीनासिकोदरेत्यादिना वा ङिष् १९

शश्व दित्यादि—पादानां रश्मीनां "पादा रश्म्यंघ्रितुर्यांशा" इत्यमरः विश्वजनाना न्तापच्छेदे ऊष्मापनयने बद्धोद्यमः काले उन्मीलितानां नीरजन्मना न्निमीलयितृत्वेन सुषमाहारी. "सुषमापरमाशोभे" त्यमरः तमस्तोमं निबिडतरतिमिरं हन्ती ति तथा अत्र चतुर्विधनियमाभावेऽपि हिमहेत्यादे सार्वकालिकः क्विप्चे ति क्विबिति माधवोक्त्या क्विप् प्रसूनविशिख मतनु मातन्वन् बद्धय न्नित्यर्थः

आतन्व न्नतनुं प्रसूनविशिखं गौरीकृताशोदय
स्सेव्य स्सत्सदसा त्रिनेत्रसमितो यो वा बहुश्रीधरः ॥२०॥

अभव दथ बुधोऽस्मा दब्जत स्तारमुक्ता
मणि रिव शुभवृत्तो गुंफित स्सद्गुणेन ।

गौरीकृता धवलीकृता स्सर्वा आशा येन स गौरीकृताशः; तादृश उदयो यस्य सः सता न्नक्षत्राणां सदसा सेव्यः सेवितः "कृत्यल्युटो बहुल मिति बहुळग्रहणात् कर्म्ममात्रे कृत्यः "ताराभं रात्रिजं धिष्ण्यां स नक्षत्र मुडु न्नने" ति निघण्डुः. "नक्षत्र मृक्षभं ज्योति स्स न्ति तारोडु तारकास्ति स्त्री नपुंसके च स्यु" रिति शब्दरत्नाकरः बह्वीनां विपुलानां श्रीणां शोभाना न्धरः धरती ति धरः पचा द्यच् अत्र चन्द्रस्य त्रिनेत्रसमित इति च्छेदा द्धरसाम्यं बहुश्रीधर इत्यनेन हरिसाम्यञ्च प्रतीयते त्रिनेत्रेस मित स्समकृतः सदृश इति यावत् बहुश्रीधरः प्रायेण श्रीधरतुल्यः विभाषा सुपो बहुच् पुरस्ता त्तु इति बहुच् कीदृशौ तौ शश्वत् पादनिषेविण्या विश्वजनताया आपच्छेदे बद्धोद्यम इत्युभयत्र तुल्यम् भृङ्गसञ्चलनादिकं विना विकसनोचितसमये स्वयमेवउन्मीलितानां सिताब्जानां सुषमाहा री ति हरे ललयोरभेदात् काल ञ्च तदुन्मीलित श्चे ति विशेषणं विशेष्येणेत्यत्र बहुलग्रहणात् कुब्ज खञ्जवत् समासः तचनीरजन्मच कालोन्मीलितनीरजन्म नीलोत्पलं तस्य सुषमाहारी ति हरौ तमस्तोममविद्यार्जितपापसञ्चयं अज्ञानपूगञ्च हन्ती ति तथा एव मुभयत्रापि समानं "तमस्तुक्की पापेनरकशोकयो" रिति निखण्डुः प्रसूनविशिख मतनु मातन्वन् तृतीयनयनाग्नौ शलभतां प्राप्य न्निति हरे अतनुं प्रसूनविशिख मातन्वन् दग्धं कामं प्रद्युम्नात्मनो द्भादय न्निति हरौ कामदहनोत्पादनयोः प्रवाहनित्यत्वा दातन्वन्निति वर्त्तमाननिर्द्देशः गौर्यां पार्वत्यां कृत आशोदयो येन स इति हरे गौर्यां सरस्वत्यां कृत आशोदयो येन सः गौरीकृताशः ब्रह्मा तस्यो दयो यस्मात् स इति हरौ "गौरी शिवासरस्वत्यो" रिति केशवः सन्त स्साधवे भक्ता स्तेषां सदसा सेव्य इत्युभयत्र अत्र विशष्यस्य पृथगुपादाने प्राकरणिका प्राकरणिकयो श्लिष्टपदोपनिबन्धे श्लेषोलंकारः २०

**अभवदित्यादि**—अस्मा चन्द्रा दब्जत शशङ्खादब्जौ शङ्खशशाङ्कौ चेत्यमरः "द्विपेन्द्र जीमूत वराह शङ्ख मत्स्या हिशुक्त्युत्भव वेणुजानि मुक्ताफलानि प्रथितानि लोके तेषान्तु शुक्त्युत्भव मेव भूरि इत्यगस्त्यरत्नशास्त्रे शङ्खस्यापि मुक्तोत्प

अतिललित महेलावर्त्तुलोत्तुंगपीन
स्तनभरपरिषंगश्लाघितो लब्धवर्ण्णः ॥२१॥

निखिलजगतीचक्रव्याप्तोरुकीर्त्ति रतो बुधा
दिह शुभकृता माद्यो नाम्ना नृपोऽथ पुरूरवाः।
द्विजवरकुले संभूताना मशेषमहीभुजां
प्रथम मुदभू न्मन्त्रौघाणा मयं प्रणवो यथा ॥ २२ ॥

योऽसा विलापति रिलातनयो विचित्रं
स्त्रीमातृकोऽपि खलु पूरुषमातृकश्च ।

त्तिस्यानत्व मुक्तं तार उज्वलं वृत्त ञ्चरित्रं निस्तलत्व ञ्च "वृत्तं पद्ये चरित्रे त्रिष्व तीतदृढानिस्तले" इत्यमरः गुंभितः ग्रथितः संबन्धश्च गुफगुंफग्रन्थे गुण स्सूत्रंवंशवीर्यादय ष्षण्णवतिराजगुणा श्च षण्णवतिराजगुणा इति रत्नकोशः गुणेने ति जातावेक वचनं गुण्यन्ने प्रार्थ्यन्ते सद्भि रिति गुणाः महेला स्त्री महती इला मनुसुता च लब्धवर्णः प्राप्तकान्तिः अनेन षाण्मासित्व मुक्तं विचक्षण श्च अत्रश्लेषानुगृहीता वाक्यार्थोपमालङ्कारः २१

**निखिलेत्यादि**—निखिलजगतीचक्रे सर्वैः क्रियमाणत्वा दन्यत्र प्रशस्यमानत्वा च्च व्याप्ता उर्वीमहती पूजिते ति यावत् कीर्त्तिः कीर्त्तन ञ्जपः यशश्च यस्य सः कीर्त्तिः पुण्यकर्मप्रथा अत्र हेतु श्शुभकृतामाद्य इतिशुभकृतां शुभकरणानां पुण्यकर्तृणा श्च द्विजवरकुले ब्राह्मणसमूहे संभूतानान्तै र्दृष्टाना मित्यर्थः मन्त्रौघाणां प्रथम आदिभूतः इतरत्र सोमवंशोत्भूताना मशेषमहीभुजा न्नास्तिशेषोन्यत्र स्थित एषा मित्यशेषाः मन्त्रौघाणा मित्यत्र प्रातिपदिकान्तनुंविभक्तिषुचे ति अधिकारे कुमतिचे ति णत्वं अत्र नुट आ म्विभक्तित्वा न्नामीत्यस्य विभक्तित्वे अय मित्यनेन महिम्नः प्रत्यक्षत्वं प्रदार्शितम् प्रणवो यथा प्रणव इव स्थितः नसमरसला ष्षड्भि र्वेदै र्हयै र्हरिणी गुरुः २२

**योसा वित्यादि** इलापतिः भूपति रिलातनयः इळा नाम मनो रपत्यार्थयज्ञानन्तर मेवो त्पन्ना तनूजा तस्या स्तनूजः स्त्रीमातृको पि अन्येषा मिवा स्या प्र

वाणीविराजिवदनाम्बुरुहोऽपि नित्यं
वाणीविदूरतर एव वरीवृती ति ॥२३॥

अभूदभूतोपमभूरिभूति
र्नृपोनृपालावलिमौलिभूतः ।

स्त्री एव माता तथा पि पूरुषमातृकः सैव पुन रिला वसिष्ठप्रभावा त्पुंस्त्वं प्राप्य सुद्यु म्नसंज्ञः मृगयाप्रसंगेन इलावृतं स्त्रीजनैकसेव्य मुपगम्य भगवतो परमेश्वरस्य शापात् स्त्री भूत्वा पुनर पि वसिष्ठप्रार्थनया परमेश्वरानुग्रहात् पर्यायेण मासं पुमान् मासं स्त्री चा भू दिति श्रीभागवते वाणीविराजिवदनाम्बुरुह इत्यनेन वदनाम्बुरुहे सरस्वत्या नित्यसा न्निध्य मुक्तम् अनेना स्य समस्तविद्यानिष्णातता तत्तदौचित्येन प्रस्तुतेषु वाग्विलासे षु दृश्यत इति द्योत्यते वाण्या वाचा विदूरतर एव दूर एव अल्पाच्चतर मिति व त्स्वा र्थे तरप् परीवृतीति अत्यर्थं वर्त्तते वृतु वर्त्तने यङ्लुक् यद्वा अतिशायन एवतरप् वरी वृतीति पौनः पुन्ये च एवंसति वाचो त्यर्थ न्दूर एव पुनःपुनर्वर्त्तत इत्यर्थः संपद्यते अनेना स्यगुणगणाना मपरिच्छेद्यतया वर्णयितु मशक्यत्वे पि गुणप्रशंसनलोभात् जना नां पौनः पुन्येन वाचां प्रवृत्तिः द्योत्यते अत्र विरोधो लङ्कारः वि रुद्धाभासत्वं विरोधः अयंविरोध स्समाधानं विना प्ररूढो दोषः सति तु समाधाने प्र मुख एवा वभासत्वा द्विरोधाभासः अत्रापि शब्दः प्रतिभासमाने र्थेविरोधार्थः त्विरो धाभावे च शब्दार्थः. २३

**अभूदित्यादि**—अभूतोपमा अन्यत्रा दृष्टपुर्वे त्यर्थः भूरि र्बह्वी भूति स्सं प द्यस्य मौलिभूतः प्रधानभूत इत्यर्थः सुप्सुपेति समासः अहीना मखण्डा ङ्कलयन् स्वा धीनतरा ङ्कुर्व न्नित्यर्थः सदा नन्दं करोति असदानन्दं छिन्दती ति च क्विप्डुकृञ् करणे कृती छेदने अत्र करोतिकृन्तत्योः प्रकृत्यो रपि तुल्यं रूप मिति प्रकृतिश्ले षः तदुक्तं सरस्वतीकण्ठाभरणे "प्रकृतिप्रत्ययार्थौ तौ विभक्तिवचनाश्रयौ पदभा षो त्भवौ चे ति शब्दश्लेषाभवन्ति षडिति असतां प्रतिषेध श्च सता ञ्च परिपालनं एव राज्ञां परो धर्म्म स्समरे चापलायन मिति श्रीमहाभारते" अत्र छेकानुप्रासः सं ख्यानियमे पूर्वे छेकानुप्रासः अत्र नृपो नृप इति द्वौ व्यञ्जनसमुदायौ मिथ स्सद शौ एवं महीमहीनां सदासदे त्यनेकप्रकारत्वं किं न्नाम मदूरदूरध्यवसायसाय मित्या दिवत् शब्दपौनरुत्क्य न्तु व्यञ्जनमात्रपौनरुक्त्य मित्यत्र रामशब्देन स्वरसाम्यनिय

महीं महीना ङ्कलयन् कराग्रे
सदा सदानन्द कृदायुरस्मात् ॥२४॥

अजायना जातसपत्नजात
स्सुजातजन्मा नहुषोऽथतस्मात् ।
नन्नम्यमानावनिपालमौलि
नेनिज्यमानामलपादपीठः ॥२५॥

निघ्न न्नसत स्सततं स सत स्सति योजय न्पथि प्रथितः,
भुव मभुनक् जलधिमितां भुजबलनिर्द्धूतदुर्मदारितति: ॥ २६ ॥

---

मो व्यावर्त्त्यते न तु तदभावः प्रतिपाद्यते अतो महीना मित्यादौ स्वरसाम्य न्नदोषाय प्रथमपादे तु "भूभू" इति केवलव्यञ्जन सादृश्यरूपो वृत्यनुप्रासः तस्मा दनयो स्सं सृष्टिः उपेन्द्रवज्रा जतजा स्ततो गौ. २४

अजायते त्यादि—जातः जनीप्रादुर्भावे श्यन् "ज्ञाजनोर्ज्ञा" अजात मनुत्पन्नं सपत्नजातं शत्रुसमूहो यस्य प्रभावातिशयेन नको प्यमुं परिबुभूपति से ति भावः सुजातं ग्रहपञ्चकोच्च स्थित्यादिभि श्शोभनं जन्म यस्य सः अनेन दिव्यभाव त्व मुक्तम् नन्नम्यमानाः अत्यर्थं पौनःपुन्येन नमन्तः मौलिः किरीटं तेन नेनिज्यमानः अत्यर्थं शोध्यमानः णिजिर् शौचपोषणयोः अस्मा द्यङन्ता यक् "अतो लोप" इत्य कारलोपः नपदान्ते ति तस्य स्थानिवत्वनिषेधा द्यस्य हलइति यलोपः ॥२५॥

निघ्न न्नित्यादि—असतः निघ्न न्नत्र शेषत्वे नाऽविवक्षितत्वा ज्जासिनिप्रह णे ति षष्ठ्यभावः अभुनक् रक्षितवान् भुजोनवन इति पालने तङो निषेधात् परस्मैप दम् "आर्याप्रथमदलोक्तं यदि कथ मपि लक्षणं भवे दुभयोः दलयोः कृतयतिशोभा न्ता ङ्गीति ङ्गीतवान् भुजङ्गेशः ॥ २६ ॥

आमोदे त्यादि—आमोदः सौरभ्यं हर्षश्च मुद हर्षे आङ्पूर्वे स्सुरभिभावे च आमोदौ हर्षसौगन्ध्ये इतिच सुमनसः पुष्पाणि सन्त श्च वदान्यो बहुप्रदः राजपक्षे

आमोदभाजां सुमनोगणाना मालम्बभू राविरभू दमुष्मात्
मान्यो वदान्यो नृपति र्ययातिः पयःपयोधे रिव पारिजातः॥ २७ ॥

तस्मि न्नीतिविनीतिविक्रमनिधौ विन्यस्य विश्वंभरा
भारं भोगपरंपरा मतिचिरं बोभुज्यमानो वसन् ।
भूयो भूरितरेण पुण्यनिकरेणाऽसादितोऽसौ दिवं
सद्यस्संभृतसम्मदै स्सुमनसां संघै श्च संभावितः ॥ २८ ॥

॥ ग ॥ तत स्स वृत्रासुरवधागसा वित्रासिते सुत्रामणि कुत्रा पि सपदि नाकलय मपि ना कलयति रोहिते रोहिताश्वमुखै रखिलै रपि बर्हिर्मुखै रराजकतया जातशोकै र्नाकलोकाधिपत्ये कृताभिषेको यथा भिलाष मखिल मपि भोगजात मनुदिन मनुबोभूयमानः कदाचन वलवैरिजायां वलजां पुलोमजां विलोकयन् विषमेषुविशिखविदूषितम

---

वल्गुवागि त्यपि "वदान्यो वल्गुवा ग्दात्रो" रितिवै ॥२७॥

तस्मि न्नित्यादि—नीति र्नयः विनीति र्विनयः बोभुज्यमानः पौनःपुन्ये ना त्यर्थं अनुभवन् आसादितः प्राप्तः आङ्ष्षदः पद्यर्थे पद्यर्थो गतिः आ धृषा द्वे ति विकल्पिपिति णिचकः सम्मदो हर्षः प्रमदसम्मदौ हर्ष इति निपातः संभावित श्चाभू दि ति शेषः अत्रनीतिविनीतिविक्रमनिधा विति राज्यभारविन्यासस्य हेतुतयोक्तत्वात् का व्यलिङ्ग मलङ्कारः "हेतो र्वाक्यपदार्थत्वे काव्यलिङ्गम्". ॥२८॥

* तत इत्यादि—वृत्रा सुरवधागसे ति वृत्रहत्याया म्मलिनतरं युवतिरूपमा साद्याऽभिसरन्ती मालोक्य वृत्रारिः पलायमानः कुत्राऽपि बिसविवरे बहुकालं गूढ म वात्सी दिति श्रीभागवतोक्तेः कर्त्तरि तृतीया अत एव त्रासित इति णिच् नाकस्य ल यो नाकलयः त न्नाऽऽकलयति अगणयति अनेन भीत्यातिशयः प्रकाश्यते सुप्सुपेति नशब्दस्य समासः रोहिताश्वमुखै रोहिताश्वोऽग्निः भुज्यत इति भोगः भोगवस्तु अनुबोभूयमानः अत्यर्थ मनुभवन् वलजां वल्गुदर्शनां वलजावल्गुदर्शने त्यमरः पुलोमजां शचीं वाहकभावः वाहकत्वं अपात्रं पात्रं कृतः पात्री कृत अभूतत द्भाव इति

ना स्सपदि तदभिसरणेहया वाहकभावपात्रीकृतमैत्रावरुणिशापा द्वा
हसभावं समीय भूयः क्षिप्रजाततत्प्रसादा न्निजवंशजा देव भवित्रीं
शापमुक्तिं प्रतिपन्नमोदं प्रतिपालय न्यामुनाभिधानस्य गिरिवरस्य ग
रीयसी न्दरीं कष्टतरदिष्टबला दध्यशायिष्ट ततो ययाति स्तु पुरुहू
तेन पुरा पुरूरवसे प्रतिपादितं प्रतिष्ठानाभिधान मखिलविभवाधिष्ठा
नभूत मधिष्ठानवर मधिष्ठायऽभीष्टदानैः प्रतीष्टमोदाः क्षरदमृताक्षरै
रुदितै रञ्जसा रञ्जिताः प्रजाः प्रजा इवनिजाः परिपालय न्प्रत्यर्थित
ल्लजा नत्यर्थ मुल्लापयमानो विश्वविश्वंभरावलयवर्त्तिना निश्शेषराजके
न करंहारय न्नाशावशा दाशावलया दागत्य भूतेषु सकलभूतेषु गव्य

---

न्विः मैत्रावरुणि रगस्त्यः वाहसभाव मजगरत्वं "अजगरे शयु र्वाहस इत्युभा
वित्यमरः समीय संप्राप्य ईङ् गतौ ल्यप् क्षिप्रजातेत्यनेन तत्क्षण मेव प्रणिपातादि
भिः प्रसादितवा निति दर्शितं निजवंशजा द्धर्म्मसूनोः भवित्रीं भाविनीं सार्वका
लिक स्तच्च गरीयसी ड्गुरुतरां द्विवचनविभज्ये तीयसुनि प्रियस्थिरे ति गुरुशब्दस्य
गरादेशः उगितश्चेति ङीप् दिष्ट न्दैव न्दरी मित्यधिशीङि त्याधारस्य कर्मसंज्ञा अध्य
शयिष्ट शयितवान् "अपादपदसन्तानो गद्य माख्यायिका कथे ति तस्य प्रभेदो
द्वौ तयोराख्यायिका किलनायकेनै व वाच्याऽन्या ना यकेऽने तरेण वा "इति द
ण्डी " पादाना न्नियमो नास्ति च्छन्दो यत्र न विद्यते समासपदभूयिष्ठ न्त त्तु गद्य
न्निगद्यत " इति मानसोल्लासे.

तत इत्यादि — प्रतिपादितं दत्तं प्रतिष्ठानाभिधानं प्रतिष्ठानसंज्ञं अधिष्ठान
वरं पुरश्रेष्ठं अधिष्ठान न्तु नगरे रथचक्रप्रभावयो रित्यमरः प्रतीष्टः परिगृहीतः इषु
इच्छायां क्षरदमृताक्षरै अक्षरशब्देन प्रमुखत एव माधुर्यं ध्वन्यते उदितै र्वचनै
र्नपुंसके भावे क्तः अञ्जसा यथाव द्राञ्जिताः रञ्ज राग इत्यस्मा द्धेतुमण्णिचि क्तः
"प्रजा स्या त्सन्ततौ जन " इत्यमरः प्रत्यर्थितल्लजान् रिपुश्रेष्ठान दुर्जया नित्यर्थः
प्रशंसावचनै श्चे ति समासः उल्लापयमानः न्यग्भावयन् निजनिदेशवर्त्तिनिखिलवृ
त्तीन् कुर्व न्नित्यर्थः लीङ श्लेषणे लिय स्तंमानने ति शालीनीकरणेआत्मनेपद न्य
ग्भावन न्त द्विभाषालीयते रित्यालें पुक् राजकेन राजसमूहेन गोत्रोक्षेत्यादिना

तो जनात् गव्यया ग्रामीयतो ग्रामतया केदारीयतः कैदारिकेण भि क्षीयतो भैक्षेण च यथामनोरथं सर्वदा संप्रदानीकुर्वन्पुरुहूत इव भू भृत्कुलाधिनेता वैश्वानर इवा श्रिताशापूरणमनाः कृतान्त इव क्रूर दण्डधारणदत्तचित्तो निरृति रिव पुण्यजनपरिशोभितपार्श्वभागो व रुण इव भृशमहितपाशो द्धर्ता समीरण इव सदागमलोलः कुबेर

---

वुञ् अत्र हृक्रोरन्यतरस्या मिति कर्मसंज्ञाया विकल्पितत्वात् कर्त्तरि तृतीया आगत्य भूतेषु आगते ष्वित्येवार्थः मयूरव्यंसकादय श्चे ति समासः गव्यतः आत्मनो गा मि च्छतः ग्रामीयत इत्यादिषु त्रिष्वप्येवं सुप आत्मनः क्यचिति क्यच् गव्यया गो समूहेन खलगोरथा दिति यत् ग्रामतया ग्रामसमूहेन ग्रामजने तितल् कैदारिकेण के दारसमूहेन केदारः क्षेत्र केदारा यञ्चे ति वर्त्तमाने ठञ् कवचिनश्चेतिठञ् भैक्षेण भिक्षासमूहेन भिक्षादिभ्यो ण्यिण् संप्रदानीकुर्वन् संप्रदीयतेऽस्मादिति संप्रदानं ग्र हीता ग्रहीता संप्रदानं स्या दिति कारकसंग्रहे गव्यादिभ्यो यथाकामं तत्तत्प्रयच्छ न्नित्यर्थः भूभृत्कुलानां गिरिसमूहानां राजसमूहाना ञ्च आधिनेता आधिनेता नाय क श्च आश्रितस्य स्वाधिष्ठितस्य काष्ठादे राशेन अदनेन यदापूरणं तत्र मनो यस्य इति वैश्वानरे आश्रितानामाशायाः पूरण मित्यन्यत्र क्रूरस्य दण्डस्य धारणे क्रूरेषुपाप कृत्सुदण्डधारणे चतुर्थोपायप्रयोगे च पुण्यजना राक्षसा स्सन्त श्च "यातुधानः पुण्य जनो नैरृतो यातु रक्षसी" त्यमरः "यक्षसन्तौ पुण्यजना" विति वै भृशमहित स्याऽत्यर्थमहितस्य पाशस्य उद्धर्त्ता धारकः अहितपाशा नां याप्ये पाशबिति पाशप् याप्यः कुत्सितः कुत्सिताना महिताना ञ्च उद्धर्ता उन्मूलयिता च हृञ् हरणे सदा सर्वदा गमे गमने "ग्रहवृदृनिश्चिगमश्चे" त्यप् सदागमेषु सच्छास्त्रेषु आगम स्तूपदे शेऽपि शास्त्रे प्यागमने पिचेति केचन: गुह्यकाना सर्वस्वामी अर्थस्वामिनैश्ययो" रि ति निपातः गुह्यं कार्यं यस्य "शासिदुहिगुहिभ्योवेति वक्तव्य मिति क्यप् स्ववाक्चा पला दातपरंपराया मुखरागादिचिह्ना द्वा अतृतीयगामिमन्त्र इत्यर्थः वृषाकपि रिव "हरविष्णू वृषाकपी" इत्यमरः वृषो वृषभः वृषा इन्द्रः वृषो धर्म श्च "वृषाकपा यी श्रीगौर्यौ" वित्यमरः हारं हरसंबन्धि हरिसंबन्धि च तस्येदमित्यण् यस्ये ति चे त्यकारेकारयो लोपः तच्च उज्ज्वल श्च अंगं हाराज्वलाङ्गं तत्र कान्ति रिच्छा यस्या स्सा कमु कान्तौ कान्ति रिच्छा हारो मुक्तावली तेनो ज्ज्वला अङ्गकान्ति श्शरीर शोभा यस्ये ति च क दीप्तौ सत्ये सत्यजाके सत्यायां सत्यभामायां सत्यां सतीदेव्यां

इव गुह्यकार्यः वृषाकपि रिव वृषाभिरक्षी वृषाकपायीव हारोज्वलांग कान्ति र्मूर्त्तित्रयीव सत्यालीनमना इन्द्रावरुणा विव विततगोराजी विनतविमतनृपतिविततिविकटमकुटतटघटितमणिघटामरीचिवीचिनीराजितपदपल्लव स्सन्ततसन्तन्यमानदानबंभज्यमानमानदिव्यपादपोऽयमदेदीप्यत ॥ १ ॥

क्षत्राधिनाथान्वयसंभवो पि नक्षत्रनाथान्वयसंभवोऽसौ ।
हितप्रदाताऽप्यहितप्रदाता कथ ञ्चरित्रं कथयेऽस्य चित्रम् ॥ २९ ॥

येन स्वसमता न्नीताश्शश्व द्विश्वेऽपि बान्धवाः ।
अभूव न्मेदुरामोदा स्सोदरा इव सादरम् ॥ ३० ॥

---

सत्ये तथ्ये च आलीनं मनो यस्य इन्द्रावरुणौ देवताद्वन्द्वे चे त्यानङ् वितता गोराजिः नेत्रसमूहो जलसमूह श्च ययोः विततायां विस्तृतायां रवि भूमौ वितताभि र्गोभि र्वा ग्भि र्वा राजितुं शील मस्ये ति सुप्यजाता विति णिनिः विमतनृपतय श्शत्रुभूपा स्सन्तन्यमानेन यथावत्क्रियमाणेन दानेन हेतुना बंभज्यमान; अत्यर्थं भज्यमानः यङन्तात् कर्मणि यक् भञ्जो आमर्द्दने तादृशो मानो यस्य दिव्यपादपस्य अदेदीप्तत शुशुभे. पुरुहूत इवेत्यादि रुपमा त्र भूभृदित्यादीनां श्लिष्टतया साधर्म्यं तदुक्तं स्फुटमर्थालङ्कारा वेता वुपमासमुच्चयौ कि न्त्वाश्रित्य शब्दमात्रं सामान्य मिहा पि संभवत इति हारोज्वले त्यत्र लिंगश्लेषः गोराजीत्यादिषु वचनश्लेषः ॥१॥

क्षत्रे त्यादि—क्षत्राधिनाथान्वयसंभवः क्षत्रवंशजातः अहितप्रदाता शत्रुखण्डयिता दो अवखण्डने तृच् अत्र विरोधो लंकारः ॥२६॥

येने त्यादि—स्वसमतां शयनवसनभोजनादिषु सार्वभौमेनाऽऽत्मना तुल्यतां प्रापिताः एत दामोदमेदुरत्वे हेतुः विश्वे सर्वे मेदुरः वर्द्धनशीलः भञ्जभासेतिघुरच् नीतो बन्धुजन स्तयाऽत्मसमता मिति श्रीहर्षः श्लोके षष्ठं गुरु ज्ञेयं सर्वत्रलघु पञ्चमम् ॥३०॥

कि मित्यादि—रिपु मपि चाऽऽत्मनासमानं व्यातेने किं ब्रूमः अत्यद्भुत

किं ब्रूम स्सपदि महापदं प्रपन्नो यःकान्तारमित उदञ्चितप्रतापः।
उद्धर्त्ता स्वजनपदस्य कण्टकानां व्यातेने रिपु मपि चा त्मना समानं ॥३१॥

उद्धारं परभूभृतां विरचय न्नद्धा य मिद्धादरं
श्रद्धालुःकलधौतराशि मनिशं पृथ्वीसुरेभ्यो दिशन्।
उद्धृत्या र्पयितै व मा मपि बतेत्यार्त्तस्स कार्त्तस्वर
क्ष्माभृ द्रूप्यधरो प्युदित्वरझरीनादा दरोदी दरम् ॥ ३२ ॥

गोपाया मास धात्री श्चतुरुदधिमितां सो य मुर्वीमहेन्द्रो
मर्त्याधीश स्सुधर्मा स्थिति महितमति र्मत्तमातंगयानः।

मेत दित्यर्थः कथ मेत दित्याह मह च्च तत् पदं स्थान ञ्च महती सा च आप च्चतां कान्तया रमितः कान्तयेति कर्तृत्वोक्त्या रागातिशयो व्यज्यते तेन रागनिमित्ताना न्त स्य सौभाग्यादिगुणाना मुत्कर्षः कान्तार म्महारण्य मित श्च महारण्ये दुर्गपथे कान्तार मित्यमरः प्रतापः दूरा देवा रीणां भयजनकत्वं प्रकृष्ट स्ताप श्च स्वस्मिन् जनपदे तिष्ठ न्ती ति स्वजनानां प्रियात्मजादीनां पदे तिष्ठन्ती ति च स्वजनपदस्याः ते च कण्टका श्च कण्टका दुष्टा स्सूच्यग्राणि च अत्र तृतीयप्रकारश्लेषोऽलंकारः अय न्तु प्रकारो विशेषणसाम्य एव भवति अन्यथा ध्वनित्वापत्तेः म्नौ ज्रौ ग स्त्रिदशयतिः प्रहर्ष णीयं ॥३१॥

**उद्धार मित्यादि**—भूभृतो महीधरा राजान श्च अद्धा अञ्जसा श्रद्धा लु रास्तिक्यवान् श्रद्धास्तिक्याभिलाषयो रिति वै कळधौतराशिं कळधौतं रूप्यहेम्नो रित्य मरः अर्पयितैव अचिरेण कालेन दास्यत्येव कार्तस्वरक्ष्माभृत् स्वर्णशैलः रूप्यधरः रज तशैल उदित्वरी उद्गमनशीला इण्नशिजीति क्वरप् झरी निर्झरः तस्या नादात् नादमप दिश्य झरीना दव्याजा दित्यर्थः ल्यब्लोपे कर्मणि पञ्चमी वक्तव्येति पञ्चमी अत्र प्रकृ तं झरीनाद मपह्नुत्य रोदनत्वेन संभावितत्वात् सापह्नवोत्प्रेक्षा सा च इवादिविरहा त् प्रतीयमाना अस्या श्च परभूभृता मित्यादिश्लेषो नुग्राहकः तत्बलेन तस्या स्समुत्था पनात् सा च समुत्थिता समुत्थापकस्य चमत्कारनिबन्धन मित्यनयो रङ्गाङ्गिभावेन सङ्करः ॥३२॥

अश्रान्त न्दानवारिप्रकरपरिलसत्पादपीठोपकण्ठो
यद्व त्प्रोद्दामधामा निखिलदिविषदा न्नायको नाकलोकम् ॥ ३३ ॥

कालेऽस्मिन् जन्य मासी त्गतमलवलभित्पालिते नाकलोके
त्रैलोक्यैश्वर्यलिप्सातरलितमनसा न्देवदैत्येश्वराणां।
नीत्या मुक्तःपरं विक्रम इह विजये न क्रमेते ति मत्वा
देवा वेगा त्प्रपन्ना धिषण मुरुनयं भार्गव म्पूर्वदेवाः ॥ ३४ ॥

जन्येजञ्जन्यमाने पुन रसुरजना जीवनीविद्यया ते
काव्येनाऽव्याकुलेन त्रिदशविशसिताः प्राणिता प्रीणिता श्च।

---

एवं ततोययाति रित्यारभ्या ऽरोदीदरमित्यन्तै ग्रन्थै रस्य गुणगणा ननुवर्ण्य तादृग्गुणवत्वे संभाव्यमानं फल मप्य स्मि न्जात मिति दर्शयन् वर्णन मुपसंहरीत. **गोपाया मासेति** गोपाया मास रक्षितवान् गुपू रक्षणे गुपूधूपीत्यायः कास्प्रत्ययग्रा दित्यामप्रत्ययः कृञ्चेत्यस्ते रनुप्रयोगः अमर्त्त्याधीशः मर्त्त्याधीश श्च सुधर्मायां स्थितौ महिता प्रवृद्धा मति रिच्छा यस्य शोभने धर्मे आस्थिति रास्था तया महिता पूज्यमाना मति बुद्धि र्यस्य सः मत्तमातंगः यानं वाहनं यस्यसः मत्तमातङ्गस्य यानमिव यानं ग ति र्यस्य सः दानवारयस्सुराः दानवारि दानजलञ्च यद्वत् यथा अत्र श्लेषानुगृहीता वा क्यातर्थोपमा ॥ ३३ ॥

अथ ययाते र्देवयानीशर्मिष्ठयो र्यादृच्छिकीं विवाहघटनां वक्तुं कथान्तर मार भते **कालइत्यादि.** गतमलेन वृत्रहत्यापापविमुक्तेन वलभिदा त्रयो लोका एव त्रैलोक्यं चातुर्वर्ण्यादित्वा त्स्वार्थे ष्यञ् लिप्सा लब्धुमिच्छा धातोः कर्मण इति सन् सनमीमे तीस् अत्र लोपोऽभ्यासस्ये त्यस्यासलोपः "स्कोस्संयोगाद्यो" रिति सलो पः हलन्ता च्चेति कित्वात् गुणाभावं देवेश्वरा दैत्येश्वरा श्च तेषा न्द्वन्द्वः परं श्रूयमाणं सर्वत्राऽव्यभिचारि नीत्या मुक्तः परं विक्रम इति केवलं पराक्रम एवेत्यर्थः न क्रमेत अप्र तिबन्धेन नक्राम्येत् वृत्तिसर्गेति तङ् वृत्ति रप्रतिबन्धः धिषणं बृहस्पतिं उरुनय मिति उभयो र्विशेषणं भार्गवं शुक्रं देवत्वात् श्रेष्ठा इति पूर्वदेवा असुराः ॥३४॥

**जन्य इत्यादि**—जञ्जन्यमाने उभयेषा मपि नयविक्रमसम्पत्या हसता

भूय स्तै रस्तशंकै र्निजबलविलया न्निर्जितो निर्ज्जरेन्द्रो
निन्ये दुस्था मवस्था ममरपरिषदा साक माकम्पभाजा ॥ ३५ ॥

उचित मिदं खलु मन्ये जन्ये विजितो य देव शतमन्युः ।
कस्य नु गुरुविद्वेषिण इह खलु न स्या त्पराजयो भूयान् ॥ ३६ ॥

॥ ग ॥ तदनु तेन मन्युशतेन वशीकृते नाकलोके दनुजचक्रेणा क्रान्ते पुन रपि निजवशापादनाशये व विधिविहितबहुमन्युना शत मन्युना विबुधनिवहेन सह विचार्या चार्यतनयः कचो निभृत मेव

दत्यर्थ ज्ञायमाने जीवनीविद्यया मृतसञ्जीवनी संज्ञया विद्यया अव्याकुलेन एकाग्रचि त्तेन विशसिताः हिंसिताः शसु हिंसायां अस्य "धृषिशसी वैय्यात्य" इति वैय्यात्य एवाऽनिट्त्वनियमा दन्यत्र सेट्त्वं प्राणिता जीविताः अत एव प्रीणिताः प्रीतिं प्रापि ताः धूञ् प्रीञो र्नुग्वक्तव्य इति नुक् निजबलविलया न्निर्जितो निर्जरेन्द्रः भूयः अस्त शङ्कै स्तै र्दुस्था मवस्था न्निन्य इत्यन्वयः अस्तेति उदित्वेन विभाषितेट्कत्वा द्यस्य वि भाषेति निष्ठाया मिडभावः स्वसैन्यनाशा द्धेतोः पराजितो देवराजः पुन रस्तमरणभ यै रसुरै र्दुस्थां दुःखदुःखात्मना तिष्ठती ति दुस्था तां दुःखरूपा मिति यावत् सुपिस्थ इति कः अवस्थां कालकृतान्यथावस्थिति रवस्थेति सुबोधिन्यां निन्ये प्रापितः कर्मणि लिट् स्वनगरा च्च्यावन मिह दुरवस्थाप्रापणं ॥ ३५ ॥

उचितमित्यादि—योग्यं "उचित न्तु स्वभावे क्री निश्चिताभ्यस्तयोः पुनः योग्येचिरानुयाते च इति" केशवः शतमन्यु रिन्द्रः गुरवो बहवो विद्वेषिणो यस्य मृता नां पुन श्शुक्रेण जीवितत्वात् इहलोके भूयान् अतिशायने बहोर्लोप इतीयसुन ईकारस्य लोपः बहो र्भूभावः श्च अत्र गुरुषु निजाचार्येषु विद्वेषः गुरुविद्वेषः सोऽस्यास्ती ति गुरु विद्वेषी ति व्यज्यमानोऽर्थो वाक्यार्थ मुपस्करोति ॥३६॥

* तदन्वित्यादि—मन्यूनां क्रतूनां दनुजचक्रेण असुरसैन्येन " वरूथिनी बलं सैन्यं चक्र मानीक मस्त्रिया " मित्यमरः विधिविहिता बहवो मन्यवः क्रतवो येने ति प्रमुखतः प्रतीयमानं अर्थ मवेक्ष्य पुन रपीत्याद्युत्प्रेक्षा विधिना दैवशक्त्या विहि तो बहु विं पुलो मन्यु श्शोको यस्य तेन आचार्यतनयः बृहस्पतिपुत्रः आहितमध्ये वसति

मृतसञ्जीविनीविद्या मध्येतु महितमध्यवसते रूर्ज्जस्वतीदयितस्य भार्गवस्य वसतिं प्रति प्रस्थापयामासे अनन्तर मन्तरंगसंगृहीतवलशासिशासनः कलितकमनीययौवनः कचो य मयत्नेन सपत्नसंहतिमभिबुभूष त्वराते रारातीय मपि दितिसुताचार्यं क्षणा दभिबुभूषमाणो महत्तरगुणोत्तरे मुहूर्त्ते स्वर्गतो निर्गत्य सर्वगीर्वाणदुर्वारगर्वनिर्वाणं कुर्वाणं विकुर्वाणं वृषपर्वाण म्प्रकुर्वाणं कार्त्तिकेय मिव चित्रशिखण्डिजाताधिरोहं वान्मीकि मिव सिताच्छकाव्याभिख्यातं सकलतापरहित

---

र्वासो यस्य तस्य अनेन तस्य दुष्प्रापत्वं विचार्य कचः प्रस्थापयामास इत्यनेन तस्यै व तत्र सामर्थ्य मिति प्रकाश्यते ऊर्जस्वती दयितस्य अत्र बहुव्रीह्याश्रयणेन तस्या न्तद्बन्धुषु चाऽस्य प्रेमाविष्टता व्यज्यते तेन च तदनुसरणद्वारा कार्यसिद्धि रिति भार्गवस्य शुक्रस्य वसति न्निलयं प्रस्थापयामासेन्द्रस्यानं कारितः कर्मणि लिट्.

**अनन्तर मित्यादि**.—अन्तरङ्गम्मनः सङ्गृहीते त्यनेन स्वसाध्यस्य परैरलक्ष्यत्व मुक्तं कमनीयेत्यनेन यौवनस्य प्रारंभावस्था प्रकाश्यते तेन वक्ष्यमाणदेवयान्यभिलाषस्य युक्तता अभिबुभूष न्नभिभवितु मिच्छन् सनन्ता ल्लक्षणहेत्वो रिति शता हेतुः प्रयोजन ञ्च कारणञ्च अत्र कारणं सच प्रार्थीच्छायाः आरातीयं आरात् समीपे भवः वृद्धाच्छः अव्ययानां भमात्रे टिलोपो वक्तव्य " इत्यस्याऽनित्यत्वा ल्लोपाभावः बहिर्षाष्टिलोपोऽयञ्चे त्यत्र टिलोपवचन मस्याऽनित्यत्वज्ञापकं.

**दितिसुतइति**—"कृदिकारा दक्तिन " इति वा ङीष् अभिबुभूषाणः प्राप्तु मिच्छन् भू प्राप्तौ सनन्ता च्छानच् गुणोत्तर इत्यनेन ईप्सितकार्यसिद्धि रवश्यं भविष्यती ति द्योत्यते निर्वाणं विनाशं विकुर्वाणं हृष्टं "हर्षमाणो विकुर्वाणः प्रमनाः हृष्टमानसः " इत्यमरः वृषपर्वाणं प्रकुर्वाणं सेवमानं गन्धनावक्षेपण इति सेवन आत्मनेपदं चित्रशिखण्डिनि विचित्रमयूरे जात मधिरोहणं यस्य चित्रशिखण्डिजातस्य बृहस्पतेः आधिरोहण ञ्च बाहुलकात् कर्त्तरि ल्युट् सिताच्छकाव्याभिख्यातं बद्धनिर्मलकाव्यत्वा दभिख्यातं प्रसिद्धं सित श्चाऽच्छश्चकाव्य श्चेत्याभिख्यात माम्नात ञ्च कवि रेव काव्यः चातुर्वर्ण्यादित्वा त्स्वार्थे ष्यञ् सकलतापै राध्यात्मिकादिभिः रहितं सकलतापसानां हित ञ्च खट्वां पर्यङ्कं खट्वा मारूढ मिति [illegible] समासाभावः क्षमाया मारूढं भूमिष्ठं क्षमया आरूढ ञ्च यज्ञे अभिलाषः नयं [illegible] उपशल्यं लक्ष

मपि सकलतापसहितं खट्वा मारूढमपि क्षमारूढं यज्ञाभिलाषिण मपि नयज्ञाभिलाषिणं निजतनूजया देवयान्या परिशोभितोपशल्य माद्यया विद्यया लापयमानमेनं भृगूणा माद्य मासाद्यऽऽभिवाद्य निर वद्यां गिर मिति गृणाति स ॥ २ ॥

आम्नायपारगमुनीन्द्र! कचो स्मि नाम्ना
धाम्नान्निधे भृगुवरां गिरसांगजन्मा ।
विद्यां वरा मधिजिगांसु रयासिष न्त्वां
वत्स्यामि वत्सरसहस्रक मत्र वर्णी ॥ ३७ ॥

वाचं कचस्य विशदा मुशना निशम्य
विद्वा न्विचार्य बहुधा बहुधामधाम्नः ।

---

ल्या समीपमात्रवचनः पादोपशल्य इतिप्रयोग श्च आद्यया श्रेष्ठया मृयसञ्जीविन्येत्यर्थः आलापयमानं पूजां प्राप्नुवन्तं लियस्सम्माननशाली ति सम्मानन आत्मनेपदं लिङ् श्लेष णे विभ्माषालीयते रित्यात्वे पुक् अभिवाद्यते आभिमुख्येन वाद्यते आयुष्मन् भवेत्याशी र्वादः कार्यतेनेनेत्याभिवादनं तूष्णीं स्थिते दोषस्मरणात् गृणातिस्म उक्तवान् अत्र सक लतापरहित मित्यादौ विरोधोऽलंकारः ॥ २ ॥

**आम्नायेत्यादि**—भृगुवर! अहन्नाम्नाकचो स्मि आंगिरसस्य बृहस्पते रङ्ग जन्मा पुत्रः किमर्थमिहागतो स्मीत्यत्रा ह वरां श्रेष्ठां विद्यामधिजिगांसुः अध्येतुमिच्छुः इङध्ययने इङिकावद्ध्युपसर्गत्र व्यभिचरतः इङश्चेति सानिगमिरादेशः अज्झनगमामिति दीर्घः सनाशं सेत्युः विद्या मित्यत्र नलोके ति षष्ठी निरोध; त्वा मयासिषं प्राप्तवान् अस्मि याप्रापणे यमरमेऽति सगिटौ अत्र विद्या मित्येव वक्तव्ये गुरा वनृतोक्ते रयुक्तत या मृतसञ्जीवनी मभिप्रेत्य परा मिति विशेषितवा निति मन्तव्यं आम्नायपारगेत्यनेना ऽध्ययनार्थ मागते रौचित्यं वत्सरसहस्रकं कालाद्ध्वनोरत्यन्तसंयोगे द्वितीया अनेना ऽध्ययनस्याऽन्तरानुपरमः प्रतार्यते वर्णी ब्रह्मचारी अनेना ध्ययनौचित्यं ॥ ३७ ॥

**वाचमित्यादि**—विशदा मसन्दिग्धार्थां सम्यक् विहितनिजाकूतार्थां इत्य

पुत्र म्पुरन्दरगुरो रुररीचकार
विद्यार्थिनी ह गुरवः परमानुकम्पाः ॥ ३८ ॥

मधुरै र्विविधैः श्लोकै र्विबुधामोद मादधत्
अथ तं सरलं प्रोचे स कवि र्बुद्धिशक्तिभाक् ॥३९॥

हे वत्स गीष्पतिसुता ऽधिजिगांससे य
न्मत्सन्निधे स्त दधिका म्मुद मुद्वहामि।
अद्धा सदा ध्ययनजागरिता निषीद
मद्धामनी द्धसुख मीप्सितसिद्धये त्वम् ॥ ४० ॥

प्रसन्नं सद्वृत्तं स खलु सदलंकार ममलम्
गुणाना मावासं सहृदयजनज्ञेयहृदयं।

---

र्थः विद्वान् विचारकुशलः बहूना न्धाम्नां तेजसां धाम सद्म तस्य बहुधामधाम्नः पुरन्दरगुरोः पुत्र मिति बहुधा विचारे हेतुः अत्रा र्थान्तरन्यासो लंकारः भृगोः कचोरीकरणस्य विशेषरूपस्या र्थस्य विद्यार्थिनीत्यादिना सामान्यरूपेणा र्थेन समर्थनात् सामान्यविशेषकार्यकारणभावाभ्या न्निर्दिष्टप्रकृतसमर्थन मर्थान्तरन्यासः ॥ ३८ ॥

**मधुरैरित्यादि**—श्लोकै र्यशोभिः पद्यै श्च पद्ये यशसि च श्लोक इत्यमरः विबुधाः देवाः विद्वांस श्च तेषा मामोद ममोद ञ्च बुद्धे श्शक्ति रकुण्ठितत्वं बुद्धि श्च शक्तिः कवित्वबीजरूप स्संस्कारविशेष श्च कवि श्शुक्रः काव्यक्र च ॥२६॥

**हे वत्से त्यादि**—अधिजिगांससे अध्येतु मिच्छसि जागरिता जाकरूकः ॥ ४० ॥

**प्रसन्न मित्यादि**—मुखविकासादिना प्रकटितप्रसादं अन्यत्र शुष्केन्धनादिवत् स्वच्छजलवत् सहसैव यद्व्याप्नोत्यन्यत् प्रसादो सौ सर्वत्रविहितस्थितिः अन्यच्चित्तं सर्वत्र सर्वेषु रसेषु इत्युक्तलक्षणप्रसादगुणयुक्तं सद्वृत्तं शुभचरित्रं "आचारवृत्तचारित्रचरित्रचरणानिच" इतिवे सद्भि श्शोभनै स्तत्तद्रसानुकूलै र्वृत्तै र्युक्त ञ्च सद

महाशय्याविष्टं सुमहितपदं हृद्यचरितम्
सदासेव्यं काव्यं स्फुटरस मसेविष्ट च कचः ॥४१॥

प्रकृतिरुचिर मारा त्प्रेक्ष्य सा पक्ष्मलाक्षी
कच मचकमतैन न्देवयानी तदानीम्

लंकार प्रकाशाधिक्यात् कुजादिताराग्रहेषु " मध्ये श्रेष्ठ मित्यर्थः " शक्रुबुगुशुचसाद्या वृद्धितोवीर्यवन्त " इतिवराहमिहिरः सन्तः प्रशस्ता अनुप्रासादय श्शब्दालङ्कारा उप मादयो ऽर्थालंकारा श्च यत्र त दमल ङ्क्रामादिभि र्दोषै रहितं मुख्यार्थहतिप्रभृतिभि श्च गुणाना माश्रितवात्सल्यादीनां माधुर्यादीना ञ्च प्रसादस्य गुणान्तर्भावे ऽपि पृथगुक्ति रोजसि माधुर्ये चा वश्यकत्वेन प्राधान्यात् आवासं आवसत्यस्मिन्नित्यावासः स्थानं अधि करणे घञ् सहृदयजनै र्निपुणमातिभिः प्रशस्तहृदयेन सह वर्त्तत इति सहृदय इति सुबोधिनी सूक्तिविचारदक्षै र्जनै श्च ज्ञेयं हृदयं हृत्गतं वस्तु गूढो ऽभिप्राय श्च महती बृहती पूजिता च शय्या तल्पं " पर्यङ्कं शयनं शय्या तल्प ञ्चतल्पिमं स्मृत " मित्यभि धानरत्नमाला तस्या माविष्टं शय्या ग्रन्थगुंफः तया आविष्ट ञ्च " शय्या तल्पे ग्रन्थगुंफ" इति वै सुमहिते सर्वैः पूजिते पदे चरणे यस्य यद्वा सुमहिते सुमनोहरे एत त्सर्वाङ्गसौ न्दर्योपलक्षणं " भृगु स्सुखी कान्तवपुस्सुलोचनः कफानिलात्मा सितवक्रमूर्द्धज " इति वराहमिहिरः सुमहितानि तत्तद्रसानुगुणानि पदानि च यत्र हृद्यं हृदयप्रियं चरितं कर्म यस्य चरित मितिवृत्त ञ्च सदासेव्यं सद्भिरासेव्यं आसेवितं कर्ममात्रे कृत्यः सदा सर्वस्मिन् काले सर्वैकान्येति दा सर्वस्य स इति सादेशः आदिमे मध्यमे ऽन्तिमे च वय सि व्युत्पत्तिविधायित्वा त्सरसत्वात् प्रायेण भगवत स्तद्भक्ताना ञ्च चरितवर्णनरूपतया परमपुरुषार्थसम्पादकत्वा च्च सेव्यं अवश्यं सेवनीयं आपकेकृत्यः काव्यं शुक्रं कविकर्म च स्फुटःस्निग्धवीक्षणादिभि स्पष्ट आत्मविषयो रागो स्नेहो यस्य स्फुटा श्शृंगारादयो रसा यत्र अत्र शब्दशक्तिमूलो वस्तुद्ध्वनिः " अलंकारो ऽथ वस्त्वेव शब्दा द्यत्रा वभास ते प्रधानत्वेन स ज्ञेय श्शब्दशक्त्युद्भवो द्विधा " ॥४१॥

**प्रकृतीत्यादि**—प्रकृतिरुचिरं स्वतो मनोहरं आरा त्समीपे दूरेच आरा द्दूरसमीपयो रित्यमरः अचकमत चकमे कमे रूपसंख्यान मिति चङ् धवलं स्त्रीणा न्निसर्गरमणीयं श्वेत ञ्च निसर्गरमणीयो य स्स्त्रीणां स धवल स्मृतः रसो रागः जल ञ्च तर्ष स्पृहा पिपासा च एत द्द्वयाकुलत्वे हेतुः देवयानीप्रेम्णो ऽपि कचस्य विद्याव

धवल मधिकतर्षशारद न्नीरदाभ्रं
रसरहित मुदारं व्याकुला चातकीव ४२॥

॥ ग ॥अनन्तर मन्तेवासिसन्तानै र्निखिलनिगमागमनिपाठनिरतै स्संख्यावद्भि रप्यसंख्यावद्भिः परिगतपरिसरो भृगुकुलभाग्यां कुरो भार्गव शिष्यान्तरादृष्टचरगुणसंदोहसंदर्शननानन्द्यमानमानसो निरवद्यया मेधया निखिला मपि विद्या म्मुदा मेधायन्तं सकलसंदेहपंक्तिविक्तिनिजवचनचातुरीविशेषविचनीकस्यमानवदनारविन्द ममराचार्यनंदन मिम न्नन्दनीय न्नद्धा यमध्यापिपत् ॥३॥

दुर्ज्ञानार्थविबोधफुल्लहृदया वृत्तिः कचस्य ऽद्भुता
सै षा सम्यगतूतुष त्भृगुवर न्त न्देशिकाग्र्य न्तदा ।

---

त्तिहेतुभूतत्वा दिद मत्रोक्तम् ॥४२

अनन्तरमित्यादि—अन्तेवासिसन्तानै शिष्यसमूहैः अयवासेत्यलुक् निगमा वेदाः आगमा श्शास्त्राणि "आगम स्तूपदेशेऽपि शास्त्रेऽप्यागमेऽपि चे" ति के निपाठः पठनं नीएरनदेत्यपो विकल्पे धञ "निपाठनिपठौ पाठ" इत्यमरः संख्यावद्भिः पण्डितैः संख्यावान् पण्डितः कवि रित्यमरः असंख्यावद्भि रियत्तारहितैः अदृष्टचरस्य अदृष्टपूर्वस्य भूतपूर्वे चरडि ति चरट नानन्द्यमान अत्यर्थं हृष्यत् मेधया धी र्धारणावती मेधे त्यमरः एत च्छुश्रूषाश्रवण श्चै व ग्रहण न्धारण न्तथा ऊहाऽपोहार्थविज्ञान न्तत्वज्ञान ञ्च धीगुणा इत्युक्ताना मन्येषा मप्युपलक्षणम् मेधायन्तं आशुगृह्णन्त कण्वादिभ्यो यगिति यक् मेधा आशुग्रहण इति कण्वादौ सुत्धातुर्वृत्तिः चातुरी चातुर्यं विचनीकस्यमानं अत्यर्थं विकसत् कस गतौ यङ् नीग्वञ्चिति नीगागमः नन्दनीय न्नन्दन मिवाचरन् उपमाना दिति क्यच् अध्यापिप दध्यापितवान् इङध्ययने विभाषा लुङ् लृङो रिति गाङभावे रूपम् ॥३॥

दुर्ज्ञानेत्यादि — दुर्ज्ञानः दुःखेन ज्ञायमानः आतो युजिति खलर्थे युच् फुल्लं विकसित आदृता अर्चिता अतूतुषत् तोषितवती तुष प्रीतौ लुङि णिश्रीति चङ्

वेलातीतरतान्तरेषु युवते स्सद्यो निरुद्योगता
रुन्धे मन्मथपावकेद्धमनसः पुंसो रिरंसा म्पराम् ॥४३॥

॥ ग ॥ तदनु तेन दनुजदेशिकेन निजानुवर्त्तनवरीवृत्यमानमोदया तदीयतनयया देवयान्या च सतत मपि परिलाल्यमानो य मप्रमाद्य न्नेव विद्याप्रपञ्च मस्मा दधीय न्पञ्चशतहायनी मतिवाहयांबभूव ॥ ४ ॥

॥ ग ॥ तदनु कदाचन काव्यकन्यकानियोगात् कान्तारान्तरसञ्चरसञ्चारितमहितमाहाकुलपालनाकुलो महाकुल स्स महेन्द्रगुरुनन्दन स्स्फुटतर मवगताकूतै रवसरप्रतीक्षै स्तत्क्षणविकस्वरामर्षदीप्राक्षैः पार्श्विकै रायश्शूलिकैः कालव्यालकरालकरवालकरम्बितकरै रसुरनिकरैः करोपकर्षगृहीतो गीर्वाणगृह्य इत्यकृपायमाणैः कृपाणघातं हत्वा

वेला मर्यादा रुन्धे रुणद्धि रुधि रावरणे स्वरितेत् रिरंसां रन्तु मिच्छां अत्र दृष्टान्तोऽलंकारः बलवैधर्म्येण तोषहेतो वृत्ते विरुद्धस्वभावाया निरुद्योगतया प्रतिबिंबत्वेनोपादाना त्तस्याऽपि बिंबप्रतिबिंबभावे दृष्टान्तः तस्याऽपि साधारणधर्म्मस्याऽपि न केवल मुपमानोपमेययोः ॥४३॥

* तदन्वित्यादि—निजानुवर्त्तनेन वरीवृत्यमानः अत्यर्थं वर्त्तमानः मोदो यस्याः यङन्ता च्छानच् रीगृदुपधस्येति रीक् अप्रमाद्यन् सावधान स्सन् मदी हर्षे अस्मा दधीयन् आख्यातोपयोग इति पञ्चमी उपयोगो नियमपूर्वकं विद्याग्रहणं अधीयन् अर्कचक्रेण पठन् इङधार्यो श्शत्रकृच्छ्रिणी ति शता पञ्चशतहायनीं पञ्चशतं वत्सरान् अतिवाहयांबभूव अति वाहितवान् ॥४॥

तदन्वित्यादि—सञ्चरो मार्गः गोचरसञ्चरेति निपातः माहाकुलं गोकुलं माहाकुलः महाकुलस्या ऽपत्यं महाकुला दित्यञ् आकूत मभिप्रायः मृतसञ्जीवनी जिघृक्षा रीष्पतिसुतस्य विद्यार्थं मार्गीतिः माहाकुलत्वे निकृष्टकर्मणाऽपि गुरुप्रसादनाभिसन्धि श्चाकूतावगतौ हेतुः अवसरं प्रतीक्षन्त इत्यवसरप्रतीक्षा ईक्षि क्षमिभ्याञ्चे

प्रत्यवयवं शकलीकृत स्सहसा वृकसमुदायायोदीयमानमोद मदी
यत ॥५॥

विलय न्त न्नयन्तो थ छलयन्तो भृगूद्वहम्।
कलयन्तः परा म्प्रीतिं त्रिलय न्ते निजं ययुः ॥४४॥

याते जीवात्मजाते वन मतिविधुरा भार्गवी मार्गवीथी
दत्ताक्षी साय मेषा धृतकुतुकभरा त म्प्रतीक्ष्यैव तस्थौ।
गोत्रां गोप्त्रा वियुक्ता मथ समुपगतां वीक्ष्य सा कातराक्षी
तात न्तातप्यमाना निजहितनिरतं गद्गदां गा मगादीत् ॥४५॥

---

ति णः विकस्वरः विकसनशीलः स्थेशभासेति वरच् दीप्रे दीपनशीले नमिकंपीति रः पार्श्वकैः पार्श्वास्थिवत् कुटिल उपायः पार्श्वं तेना र्था नान्विच्छन्तः पार्श्वकाः पार्श्वेना न्विच्छतीति कन् आयश्शूलिकैः तीक्ष्णोपायोऽयश्शूलंतेना र्था नन्विच्छन्तः आयश्शूलिकाः अयश्शूलेति ठक् करंबितो युक्तः "पृक्तः करंबितो मिश्रः च्छुरितो मिलित स्तथा" इति शब्दरत्नाकरः करोपकर्षं करे उपकृष्य सप्तम्या श्चेति णमुल् गीर्वाणगृह्यः देवपक्ष्यः पदास्वै रिति गृह्येः क्यप् कृपावन्तो भवन्तः कृपायमाणाः तेभ्यो न्ये अकृपायमाणा भृशादिभ्य इति कर्म्मणि क्यङ् कृपाणघातं हत्वा कृपाणेन हत्वा करणे हन इति णमुल् कषादिष्विति तस्यैव धातो रनुप्रयोग. समुदय स्समूहः ॥५॥

**विलयमित्यादि.**—विलय मन्तं ली द्रवीकरणे एरच् च्छलयन्तः च्छो च्छेदने च्छ्यति छिनत्ति धर्मार्थानुसारिणं मार्ग मिति च्छद्म तत् कुर्वन्ती ति च्छलयन्तः कलयन्तः प्राप्नुवन्तः कल गतौ संख्यानेच ॥४४॥

**यातइत्यादि.**—मार्गवीथीति अत्र वीथीशब्देन पङ्क्तिवाचकेन मार्गस्य ऋज्वायतत्वं लक्ष्यते तं प्रतीक्षत इति तत्प्रतीक्षा टाप् गोत्रां गोसमूहं खलगोरथादि नित्रकृड्यच श्चेति त्रः गोप्त्रा पालकेन तातप्यमाना अत्यर्थं तापयुक्ता तप सन्तापे यङन्ता च्छानच् गद्गदां स्खलिताक्षरां ॥४५॥

यातो वनाय स गवा मवनाय तात
ना गा स्कच रस तु गवां समज रसमागात् ।
हा हन्त हन्त कि मिद न्तमसा दिगन्त
मावृण्वतीय मयते क्षणदा क्षणेन ॥४६॥

श्रुत्वा ता न्दुश्रवां गा म्मृत इति मृतसञ्जीवनीविद्यया द्यं
शिष्याणा माजुहाव त्रिदशगुरुसुतं भार्गवो भर्गधामा ।
भित्वा भित्वा वृकाणा मथ जठरतल म्पूर्ववत्तूर्णकायो
जीव ञ्जीवातरजो सौ सपदि निजगुरो रग्रतः प्रादुरासीत् ॥४७॥

तदनु गुरुचरणपरिचरणधुरीणधिषणो सौ धिषणसूनु र्गुरुणा करुणा भरेणैव गुरुणा मुना प्रतिपादितप्राणो ह मिति सत्वरविस्तृतभक्ति भारभरितान्तरंगो मुहुर्मुहु रमु म्प्रमरप्रेमरसपरिप्राण म्प्राणं सीत् ॥६॥

यातइत्यादि — वनाय वनं यातः गत्यर्थेति चतुर्थी सः तेन नीतः गवां समजः गोगणः तु अजगतिक्षेपणयोः समुदो रज इत्यप् समागात् सम्यगागतः किमिद मत्र हेतुः कः हाहन्तहन्तेति विषादाधिक्ये पथि केना पि हेतुना विलंबितः स्यात मायास्यति चेत्यत्राह तमसेत्यादि आवृण्वती तिरोदधाना अयते अय पय गतौ क्षणेन वेगेन कचागमशंकाविद्धत्वेन निशायते वेगातिशयवत्वप्रतीतिः ॥४६॥

श्रुत्वेत्यादि, — दुश्रवां दुःखेन श्रूयमाणां जीवनीविद्यया आजुहाव साह्व नामयुक्तं तन्मन्त्र उच्चारितवान् इत्यर्थः शिष्याणा मायं अनेन वात्सल्यातिशय उक्तः त्रिदशगुरुसुत मित्यनेन लोकाक्रोशभीत्या पि तस्य प्रत्युज्जीवनीयत्व मुक्तम् भर्गधामेत्यनेन कुत्रापि अस्य प्रवृत्ति र्नव्यभिचरतीति प्रादुरासीत् प्रादुर्बभूव ॥४७॥

* तदन्वित्यादि — गुरुचरणपरिचरणधुरं वहती ति गुरुचरणपरिचरणधुरीणः तद्वहतीत्यर्थे खः सर्वधुरा मित्यत्र ख इति योगविभागात् उत्तरधुरीणइत्यादिवत् खः आय नादय ईनेनादेशः अनेन केना प्यननुभूतचर मवस्थान्तर मनुभूया पि

वीक्ष्य तज्जीवितम्मोदादीक्ष्यमाणन्तनूजया ।
नन्नम्यमानं पदयोर्नानन्दामास भार्गवः । ४८॥

जाल्मोऽयञ्जीवजन्मा नतजनवशगाद्देशिकादस्मदीया
दाद्यां विद्याञ्जिहीर्षुर्न्निहतइती मुदा साञ्चितास्सञ्चरन्तः ।
दैतेया जीवितन्द्रागिह तु गुरुगृहे वीक्ष्य तं विस्मयाधि
क्रोधाविष्टान्तरङ्गाः पुनरपि निधने यत्नमेते वितेनुः ॥४९॥

कचस्तु निरस्तभयमिह पुरोवदेव गुरोरधीयानो वसन्पुनरपि कदाचित् कुश कुसुमादिकानयनायानया दिष्टो विपिनमाविष्टो दुष्टाशयैरमरवैरिभिर्दृष्टो दिष्ट्या यमाक्षिगतोऽस्माकमाक्षिगतइत्युदीयमानमोदैर्जीवग्राहं गृहीतो माष

---

स्वाभिप्रेतविद्याग्रहणं प्रत्यस्य व्यवसायातिशय एवासीदिति प्रकाश्यते. भरितं पूर्णं प्रस्मरः प्रसरणशीलः "सृघस्यदः क्मरच्" परिप्राणं परिपूर्णं प्रा पूरणे "संयोगादे" रिति निष्ठानत्वं प्राणंसीत् प्रणतवान्. णमु प्रह्वत्वे लुङ्. ॥६॥

**वीक्ष्येत्यादि**—जीवितं कर्तरि क्तः नन्नम्यमानं पुनःपुनर्न्नमन्तं यङ् नुगत इति नुक्. नानन्दामास अत्यर्थं ननन्द. यङ्लुगन्तात्लिड्याम: "कृञ्च" त्यस्तेरनुप्रयोगः मोदादीक्ष्यमाणन्तनूजयेत्यनेन गुरुवत् गुरुपुत्र्योऽप्यत्युक्तस्य सम्यगाचरणं प्रकाश्यते. अतो नन्दनाधिक्योपपत्तिः ॥४७

**जाल्म इत्यादि**—"जडोजाल्मश्च दुर्बुद्धो स्तब्धेऽनालोच्यकारिणी"ति वै विद्यां "नलोके"ति षष्ठीनिषेधः. जिहीर्षुः हर्तुमिच्छुः सनन्तादुः साञ्चिता व्याप्ताः जीवितमिति णिजन्तात् कर्मणि क्तः निहतस्य पुनर्दर्शनाद्विस्मयः. शठोऽयंविद्यांग्रहीष्यतीत्याधिः निजप्रवृत्तिवैफल्याद्क्रोधः. ॥४६॥

**कचइत्यादि**—दिष्ट्येत्यानन्दे आक्षिगतो द्वेष्यः "द्वेष्यस्त्वक्षिगत"इत्यमरः अक्षिगतोलोचनमार्गगतः जीवग्राहं जीवेती"गुपधात्" कः "समूलाकृते" ति णमुल् जीव एव गृहीतः जीवन्नेव गृहीत इत्यर्थः. माषपेषं माषामिव पिष्ट्वा "उपमानेकर्मणिचे"ति णमुल्. परिमेलितः संयोजितः मिळ श्लेषणे णिजन्तात् क्तः. गुणपुञ्जस्य सञ्जानत्या गुणपुञ्जं सोत्कण्ठं स्मरन्त्या "अधीगर्थे"ति षष्ठी. आध्यानत्वात् "संप्रतिभ्या

पेषं पिष्ट्वा पयोधिपयसि परिमेलितस्तदीयगुणपुञ्जस्य सञ्जानत्या दुर्विषहेण विरहेण शुचंकलयन्त्या कचं घातयन्त्या निजतनूजया नुनाथितेन तेन पूर्वदेवदेशिकेन पूर्ववदेव जीवितेन योजितोऽभूत् ॥८॥

पुरुहूतगुरोः पुत्रः पुरुभूतमुदा युतः ।
आपदाचार्यपादानामापदामपदम्पदं ॥६०॥

॥ग॥ अथ कथयामास च व्यथितमानसामसा वौशनसीम् ॥८॥

देशिकस्य दययैव जीवन न्देवयान्यहमयासिषं क्षणात् ।
किन्तु नाम जगतीह दुर्लभम् कीरवाणि करुणाबलात्गुरोः ॥५१॥

॥ग॥ भूयोऽपि भृगुकन्याया वन्याया वन्यान्यानयेति नियोगेन मान्यतरुलतानिकरधन्यायां वनावन्यां वितन्यमानचरणविन्यासः कचइह कचे गृहीतो गलोपपीडं हृतो गुरुकुलापीडः पुष्टरोषं प्लुष्ट्वा

---

मनाध्यान" इत्यात्मनेपदाभावः. उत्कण्ठापूर्वकं स्मरणमाध्यानं कलयन्त्या प्राप्नुवन्त्या कचं घातयन्त्या कचवधमाचक्षाणया "आख्यानात्कृतस्तदाचष्ट" इति णिच् कृल्लुक् प्रकृतिप्रत्यापात्तिः "प्रकृतिवच्चकारकमिति" णिजादि. अनुनाथितेन याचितेन "णाथृनाधृयाच्ञोपतापैश्वर्याशीःषु" जीवितेनेति भावे क्तः. ॥७॥

**पुरुहूतेत्यादि**—पुरुर्भूता पुरुभूता "सुप्सुपेति समासः. भूतेत्यनेनानुभावमुखेन बहिः प्रकटेति सूच्यते. आचार्यपादानां पादशब्दः पूज्यवाची अपदमस्थानं पदं स्थानं. ॥७०॥

**अथेत्यादि**—व्यथितमानसां निजघातानुस्मरणं व्यथाहेतुः. उशनसोऽपत्य मौशनसी. ॥७॥

**देशिकस्येत्यादि**—अयासिषं प्राप्तवानस्मि कीरश्शुकः कीरवाणीत्यनेन तद्वचोमाधुरी देशिकदयायाहस्तावलंबनं करोतीति द्योत्यते. ॥७१॥

**भूयोपीत्यादि**—वन्याया वनसमूहात् "पाशादिभ्योय" इति यः तल्वृन्देयानि कड्यचत्रा इति लिङ्गशास्त्रात् स्त्रीत्वम्. वन्यानि वने भवानि "दिगादियगन्येभ्योऽपि

कर्पूरपेषं पिष्टो धर्मरतनिर्मूलनकर्मणि परमलङ्कर्मीणैर्व्याजजालस्य जानानैरपुनरुत्थानमीहमानैरसुरैरपि सुरायां संयोज्य गुरुसमीपमुपनीय गुरुप्रमोदकरं सुरारसमिमं पिबेति प्राभृतीकृतस्सन्नशनैरुशनसा सरलमनसा विधिबलादपापोयसपेपीयत ॥ ९ ॥

ततश्च.

कान्तो हन्त कचः कुतो नु न वनादागात्प्रियंभावुको
दैत्यौघैः किं मघानि तात गमितः किं श्वापदैरापदं ।

---

तिस्वामी गळोपपीडं गळे उपपीड्य "सप्तम्याञ्चे"ति णमुल्. गुरुकुलस्य "कुलं गेहेऽन्वये व्रात" इति निघण्डुः. आपीडाश्शिरोलंकारः "शिखास्वापीडशेखरा"वित्यमरः क्षुद्वा दग्ध्वा कर्पूरपेषं पिष्टः कर्पूरमिव पिष्ट इत्येवार्थः. "उपमान" इति णमुल्. धर्मरतानां निर्मूलनकर्मणि मूलोच्छेदे परमत्यर्थं अलङ्कर्मीणैः कर्मणेऽलं कर्मणे शक्ता अलङ्कर्मीणास्तैः "अषडक्षे"त्यादिना स्वार्थे खः. व्याजजालस्य जानानैर्व्याजजालेन प्रवर्तमानैः "ज्ञोऽविदर्थस्ये"ति करणे षष्ठी "अकर्मका"च्चेति जानातेरात्मनेपदं ईहमानैरिच्छद्भिः "ईहालुलिप्सोद्यमयो"रिति वै. असुरैरपि अविद्यमानसुरैरित्यपि स्फुरति. गुरुप्रमदकरं अधिकं मदकरं गुरोर्बृहस्पतेः प्रमदकरं हर्षकरं च सुरारसं मद्यरसं सुरेष्वाभीक्ष्ण्येन रसो यस्य तंच. सरळमनसा सरति परेच्छामनुसरतीति सरळं. दाक्षिणं परच्छन्दानुवर्ति सरति गच्छतीति सरलमृजु वा. पाप इति अभेदोपचारान्मतुब्लोपाद्वा तद्वति वर्तते. तस्मादन्योऽपापः नञिति समासः. अपेपीयत अत्यर्थं पीतः पिबतेर्यङन्तात् कर्मणि लङ् यक् भृशार्थेनात्र साकल्यं लक्ष्यते. ॥८

**ततश्चेति**—अस्योत्तरत्र संबन्धः.

**कान्त इत्यादि**—नागात् नप्राप्तवान् इण् गतावित्यस्माल्लुङ्. "इणोगालुङी"तिगाडादेशः. प्रियं भावुकः प्रियोभवन् "कर्तरिभुव"इति खुकञ्. अत्र च्व्यर्थे विधीयमाने नखुकञा प्राग्देवपक्षीयत्वात् अप्रियत्वेऽपीदानीमेवं प्रियोजातइति प्रकाश्यते. अघानि किं हतः किं. कर्मणिलुङ्. "चिण्भावकर्मणो"रिति च्लेश्चिणादेशः. श्वापदैः "व्याघ्रादयो वनचरामृगास्स्युश्श्वापदाभिधाः" असाह्वानसहनस्सन् "दाश्वान्साह्वानिति निपातः दाश्वानित्यादयश्छन्दसिभाषायाञ्च विशेषेणनिपात्यन्तइति काशिका. आह्वादाहूतवान्

एवं व्याकुलयानया निगदितः पीडाभसाह्वानसा ।
वाह्वज्जीवनदायिनाथ मनुना शिष्यम्पुरेवादरात् ॥५२॥

सोऽय माहूयमानोऽपि नागादेव ततो भृगुः ।
संस्तंभ्य धीरधीश्शोकं निजगाद निजां सुताम् ॥५३॥

सञ्जीवनेन मनुना समजीजिवन्तम्
वत्से तथापि न समेति स मे समीपम् ।
तत्किं करोमि विदुषीह निषीद धैर्ये
शोचन्ति हन्त न गतायुषमत्र सन्तः ॥५४॥

ग तदनु तत्तातगदितमाकलय्य तत्तादृशशोकतरसाशया भार्गवी भारतीमिमामभणीत् ॥२०॥

तैस्तैर्वैनयिकादिभिर्गुणगणैर्यस्सेवनीयस्सता
मङ्गोपाङ्गविराजितेषु निगमेष्वद्या द्वितीयश्च यः ।

---

"लिपिसिचिह्वश्चे"ति च्लेरङ् मनुना मन्त्रेण आदरादित्यनेनात्याहितशङ्कयाह्वानविधाववधानातिशयउक्तः ॥५२॥

**सोयमित्यादि**—संस्तंभ्य "ष्टभिस्कभिप्रतिबन्धे" इदित्वादनिदितामिति न लोपाभावः. संस्तभ्येति वा पाठः. स्तनूसुस्तुनूभ्वितिसौत्रस्य स्तनेभेरिदित्वाभावान्न लोपः. निजगाद उक्तवान्. ॥७३॥

**सञ्जीवनेनेत्यादि**—समजीजिवं प्रत्युज्जीवितवानास्मि. च्लेश्चङ् "भ्राजभासे"ति णौचङ्युपधाह्रस्व विकल्पः जीव प्राणधारणे प्राणलक्षणस्य कर्मणोधात्वर्थेनोपसंग्रहादकर्मकत्वं "धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया" इति तत्किंकरोमि अतोऽन्यदुपायान्तरन्नमेऽस्तीतिभावः. इह अस्यामवस्थायां धैर्ये निषिद धैर्यमवष्टभ्य तिष्ठ शोचन्ति शुच शोके गतायुषं प्रतीति शेषः. ॥७४॥

*__तदन्वित्यादि__ – सएवतादृशः तत्तादृशः अभाणीत् उक्तवती भण शब्दे। २०

**तैस्तैरित्यादि**—विनय एव वैनयिकः "विनयादिभ्यश्चे"ति स्वार्थे ठक् सता

यस्ते पादसरोरुहैकशरणः कारुण्यपाथोनिधे
यत्सत्यन्न विना मनोहरममुञ्जीवामि जीवात्मजम् ॥५५॥

छदयाशुतात सदयाशय प्रभो तनयं प्रभूतविनयं गुरौ गुरोः ।
मदयाधुनैवं हृदयाधिमेधितं कलये कथन्नु विलयेऽस्य धीरताम्॥५६॥

आकर्ण्य तत्गाढविदीर्णकर्णं वचो विजोघूर्णितधीस्स तूर्णम् ।
शुक्रोऽथ सक्रोध मुदाजुहाव शक्रेहिते प्रक्रममाणमेनम् । ॥५७॥

॥ग॥ तदनु तदयिजठरकुहरएव परिकलितमूर्त्तिर्विद्यया सद्यएव विन्नजीवनो जीवनन्दनो मन्दमन्दमयमहं कचोऽभिवादये भगवन्निति वदन्नुशनसा हर्षविस्मयचिन्ताशबलमनसा पुत्र वर्त्मना केनास्मदुदरमाविष्टो सीति पृष्टस्तदनुग्रहेण गृह्यको यमपरिहीणस्मृति रसुरैर

मिति कृत्यानामिति कर्त्तरि षष्ठी अङ्गानि शीक्षादयः उपाङ्गानि इतिहासपुराणादयः तैर्विराजितेषु सम्यक्प्रकाशितरमणीयनिगूढार्थेषु अविद्यमानो द्वितीयो यस्य सोऽद्वितीयः "नञोऽस्त्यर्थानांबहुब्रीहिर्वोत्तरपदलोपश्चे" ति बहुव्रीहिः पूर्वपदावयवभूतस्योत्तरपदस्य विकल्पेन लोपश्च. यत्सत्यं सत्यमेव. ॥२२॥

**च्छदयेत्यादि**—च्छदय प्राणवन्तङ्कुरु च्छादि रूर्जनइति मित्वाद्ध्रस्वः ऊर्जनं प्राणनं च्छद अपवारण इति यौजादिकस्य स्वार्थणिजभावेपि मित्वार्थोऽयमनुवादः धातूनामनेकार्थत्वादूर्जने वृत्तिः. मदय ग्लपय मदी हर्षग्लपनयोरिति मित्वाद्ध्रस्वः कलये आप्नोमि. सजसाजरौभवतिमञ्जुभाषिणी ॥७६॥

**आकर्ण्येत्यादि**—विजोघूर्णिता अत्यर्थंघूर्णिता यङन्ताद्वा यङ्लुगन्ताद्वा कर्तरि क्तः उदाजुहाव उच्चैराहूतवान् एतच्च क्रोधानुभावः शक्रेहितेप्रक्रममाणं आरभमाणं प्रवर्तमानमित्यर्थः. प्रोपाभ्यामित्यात्मनेपदं अनेन देवकार्यस्यावश्यंभावितया शुक्रस्य कचोज्जीवनोद्योगः केनापि न विरमेदिति प्रकाश्यते. ॥५७॥

*__तदन्वित्यादि__—विन्नं लब्धं विदिर्लाभे व्यवसितायुरवसानोऽयं जीवितइति हर्षः आत्मोदरस्थत्वाद्विस्मयः कथमयमस्मदुदरं प्रविष्टइति चिन्ता वर्त्मना मार्गेण अनेन प्रकारोऽपि विवक्षितः गृह्यकः परतन्त्रः "पदास्वैरी"त्यस्वैरिणि क्यप् अपरिहीणा अत्य

द्य मंक्षुसंक्षुद्य मद्यमिश्रितो निभृतमुपहारीकृतो हन्तव हन्त वदनवि वरेणोदरकोटरमाटीकिषीति पटीयानुदीरयामास ॥

अनन्तरमधिगतसुरारातिकृतनिकृतिस्सुरासेवना दसुरासेवनादपि विर तमतिरसौ भृगुपतिरयि वत्स मत्सरिणाममरवैरिणां सौहार्द्दघातुकानां दुष्टाकृतानां खट्वारूढानां संहतिं समूलघातं हान्मि तन्मा मनीषी त्वं विषीदेत्यादिवचसा कचं सान्त्वयन् भूयो विदितभूरितरोपायसा रोपि तन्निर्गमोपायमव्यवस्यन् वत्साम्प्रति सरसां सरस्वतीमुत्सार यामास ॥२२॥

मया मायाहीनं प्रियमयि विधेयं तव सुते
कचो विन्देत्तुन्दात्गतिमयमृते नो ममसृतेः।

---

क्ताओहाक् त्यागे ओदितश्चेति निष्ठानत्वं मंक्षु सपदि संक्षुद्य पिष्ट्वा आटीकिषि अगमं टीकृ गत्यर्थः पटीयानतिशयेनपटुः पटुशब्दादीयसुन् उदरविवरे विसंस्थुलमवास्थितस्या पि निवेदनचातुर्यमिह पाटवं उदीरयामास कथयतिस्म ईरगतौ णिच् ॥

**अनन्तरमित्यादि**—सुरासेवनान्मद्यपानादसुराणामासेवनादपि सुहृदस्सुहृद यस्य च भावकर्मणोसौहार्दं "हायबान्ते" त्वण् हृदयस्य त्वणि "हृदयस्यहृल्लेखे" ति हृवादेशः 'हृत्भगसिन्ध्वन्तेपूर्वपदस्यचे" त्युभयपदवृद्धिः घातुकानां हननशीलानां लषपतेत्यु कञ् खट्वारूढानामविनीतानां इत्यर्थः. "खट्वाक्षेप" इति समास; खट्वारोहणञ्च विमा र्गप्रस्थानस्योपलक्षणं सर्व एवाविनीताः खट्वारूढाः उच्यन्त इति वृत्तिः अत्र रामस्सर्व एव खट्वामनारोहन्तोऽपीति हरश्च खट्वामारोहतु मा वा विमार्गप्रस्यायी तु खट्वारूढ उच्यते. विनिन्दितोमार्गः विमार्ग इति. समूलघातं हन्मि समूलं हन्मीत्यर्थः. "निमूलसमूले" ति णमुल् मनीषी सर्वकालकृतमिति ज्ञातुं शक्तः अव्यवस्यन् अनिश्चिन्वानः* ॥२२॥

**मयेत्यादि**—विधेयं कर्तव्यं आवश्यके कृत्यः मृतेः ऋते मृतिमन्तरेण "अ न्यारा" दिति पञ्चमी निपतितइत्यनेन कदाचिदप्यचिन्तितमेतादीति द्योत्यते.न जा नीयां ज्ञातुन्न शक्नुयां "शकिलिङ्चे" ति लिङ् रसैरुद्रैश्छिन्ना यमनसभला ग

सुदुस्साधे कार्ये बत नियतिगत्या निपतिते
न नीतिञ्जानीयान्तव हितकरीङ्किन्नु करवै ५८

॥ग॥ तदनु तदीयवचनमवधार्य वैधुर्यविधुतधैर्या देवयानी तदनु भाववेदिनी पुनरपीदमभिदधे ॥२॥

हाहा तात तवोपघातकथया बेभिद्यते मानसम्
सन्नह्यन्ति च हन्त तस्य विरहात्प्राणाः प्रयाणाय मे ।
तत्तस्यापि तवापि जीवनकरी नीतिर्न्निरीक्ष्या त्वया
साध्यं किन्न महानुभाव सुजनैरव्याहतैर्हैरिह ॥५९॥

॥ ग ॥ इति पुत्रीगदितपालीभूतश्रोत्रयुगश्श्रोत्रियोऽसौ किञ्चिदिव सञ्चिन्तयन्नदसीयमनोरथसम्पत्सम्पादनदत्तचित्तः कचमेवमचकथत् ॥२३॥

दंभोज्जृंभितसंभृतेदृशवपुस्त्वं जृंभ हन्ता नचेत्
स्वान्ते ते मृतजीवनी कच जवादुद्यातु विद्या तु सा ।

---

शिखरिणी. ॥७६॥

*तदन्वित्यादि—वैधुर्यं विधुरता अनुभावः प्रभावः. ॥२१।

हाहेत्यादि—उपघातकथया मरणकथया बेभिद्यते अत्यर्थंभिन्नं भवति सन्नह्यन्ति सन्नाहं कुर्वन्ति ॥

इतीत्यादि—गदितं वचनं श्रोत्रियः वेदाध्यायी श्रोत्रियञ्छन्दोधीतइतिनिपातः अनेनास्येप्सितसिद्धेः कदाचिदपि नप्रतिहतिरिति ध्वन्यते. अचकथत् कथयतिस्म कथ वाक्यप्रबन्धे चुरादिरदन्तः अग्लोपित्वात् सन्वतभावाभावः ॥२८॥

दंभेत्यादि—दंभस्य व्याजस्य उज्जृंभितेन वर्धनेन हेतुना भावे क्तः संभृतमीदृ

कुक्षेर्दक्षिणदक्षपक्षमचिराद्भिन्दन्बहिर्निर्गमं
विन्दञ्जीवय मां गुरून्प्रति सदा शिष्या हि निष्कैतवाः ॥६०॥

ततस्तदानी मेव.

विद्यासक्तस्सुवृत्तस्सकलसुमनसां संसदा सेवनीय
स्सर्वज्ञैकावतंसो द्विजकुलवृषभ श्श्रेष्टपक्षप्रवर्द्धी ।
दोषासङ्गी स पौनःपुनिकजननभाग्गीष्पतिक्षेत्रभूत
स्तुन्दादस्याब्दवृन्दादिव तुहिनकरो मेदुरादाविरासीत् ॥६१॥

विद्यावाप्तिनिरोधबद्धहृदयैरेतैस्समेतैः कृत
न्दैतेयैर्यदभूत्तदेव नियतं सद्योऽस्य विद्याप्तये ।
लोके यस्तु परार्थमेव तृणवत्प्राणानपि प्रोज्झति
प्रायस्तस्य हि दिष्टमिष्टमधिकं पुष्णाति पुष्टादरम् ॥५२॥

शं वपुर्यस्य उद्यातु उदेतु दक्षिण निपुणमते दक्षपक्षं दक्षिणपक्षं ॥३०॥ ततस्तदानीमेव ।

**विद्येत्यादि**—विदि बुधे आसक्तः "हेमावित्ज्ञोबोधनश्चेन्दुपुत्र" इतिवराहमिहिरः. विद्यया मृतसञ्जीवन्या सक्त स्संबद्धश्च. षञ्ज संगे "वृत्तं पद्ये चरित्रे त्रिष्वतीतदृढनिस्तले" इत्यमरः. सर्वज्ञोगिरिशः सर्वज्ञा विद्वांसश्च तस्य तेषाञ्च एकः मुख्यः अवतंसः द्विजकुलवृषभः ब्राह्मणवंशस्य राजा "नक्षत्रग्रहविप्राणां वीरुधाञ्चाप्यशेषतः सोमं राज्ये दधात् ब्रह्मा यज्ञानान्तपसाममीत्याश्रम" इतिसुबोधिन्यां श्रेष्ठपक्षे पूर्वपक्षे प्रकर्षेण वर्द्धितु शीलमस्य द्विजकुलवृषभस्य भृगोःश्रेष्ठपक्षं दक्षिणपक्षं वर्धितुं च्छेत्तुं शीलमस्येति च वर्द्ध छेदनपूरणयोः दोषेत्यव्ययं रात्रावित्यर्थः सङ्गी सङ्गवान् दोषेष्वसङ्गी च पौनःपुनिकं पुनःपुनर्भवं कालाट्ठञिति ठञ् अव्ययसमुदायत्वात्स्युस्युलौ नेष्टौ अव्ययानां भमात्रे टिलोपः गीष्पतिक्षेत्रं तारां भूतः प्राप्तः तथा श्रीहरिवंशे. "बृहस्पतेस्स वै भार्यान्तारान्नाम यशस्विनीं जहार तरसा सर्वानवमत्याङ्गिरस्सुता" निति बृहस्पतेः क्षेत्रात् पत्न्याःभूत उत्पन्नश्च 'क्षेत्रं पत्नीशरीरयोः" इत्यमरः. अत्र तृतीयप्रकारश्श्लेषः. ॥६२॥

**विद्येत्यादि**—समेतैः संभूयावस्थितैः प्रोज्झति त्यजति उज्झ उत्सर्जने. अत्रार्थान्तरन्यासोऽलंकारः ॥६२॥

विद्याविद्योतमानस्सतु भुवि पतितं संपरेतं स्वहेतो
रेनं प्रेक्ष्य प्रतप्यन्सपदि निजगुरुं भार्गवं निर्गताभम्
एतत्प्रोद्दामहार्दस्मृतिगलितधृतिर्विद्यया हृद्यया तं
जीवन्या जीवयित्वा समनमदमलो जीवजन्मा सुजन्मा ॥६३॥

शंकामंकूरितां प्राङ्निजगुरुहृदये जीवजो नेनिजानो
व्याजोनां वाचमेनम्मधुरमभिदधे तात जाने तदेतत् ।
विद्यामाध्व्यातु यस्य श्रुतिपुटकलशी साधु येनाऽभ्यपूरि
द्रुह्येत्तस्मै स शिष्यो यदि बत गुरवे यातनां हन्त भुङ्क्ते ॥६४॥

॥ग॥ अनन्तरमात्माभिलाषपूरणायैव परित्यक्तप्राणितं निजपितरं निरीक्ष्य सान्ताऽपि न समाक्रान्तस्वान्ता देवयानी तदानीमेव जात

---

**विद्येत्यादि**—स्वहेतोस्संपरेतं मृतं एतत्तापस्य हेतुः प्रतप्यन् तप सन्तापे श्यन् निर्गताभमिति मृतस्वभावोक्तिः. हार्दं स्नेहं गलितधृतिरित्यनेनैवंभूतावस्थान्तरन्द्रष्टुमक्षमतया प्रत्युज्जीवने त्वरातिशयोऽव्यज्यते. हृद्यया हृदयं यातीति हृद्या "आतोऽनुपसर्गे" इति कः प्रयोगक्षमतां प्रापयेत्यर्थः. सुजन्मा सुकृती एवंभूतोगुरुनिष्क्रयः. कस्यान्यस्य स्यादिति भावः ॥६३॥

**शङ्कामित्यादि**—नेनिजानः शोधयन् णिजित् शौचपोषणयोः शानच् श्लुः. प्रागङ्कूरितां शङ्कान्नेनिजानइति अयमर्थः. विद्यां वरामधिजिगांसुरित्युक्तयनन्तरं बहुधा विचार्येत्यत्र विचारणानुभावेन मनाक्प्रतीता दंभोज्जृंभितेत्यत्र स्पष्टतामुपगता या स्वात्मनि संजीवनीविद्याजिघृक्षुत्वशङ्का सेयमधिगताया अस्या विद्याया वैफल्यदायिनी स्यादिति तामपनेतुमिति तत्प्रसिद्धं जाने. श्रुतिस्मृतिपर्यालोचनया स्फुटतरमवगच्छामि द्रुह्येत् अप्रियाचरणादिना पीडयेत् श्रुतिपुटमेवकलशी कलशः अभ्यपूरि अभिपूरिता. गुरवे क्रुधद्रुहेति संप्रदानसंज्ञा ॥६४॥

**अनन्तरमित्यादि**—प्राणितं प्राणनं सान्तापिनं समन्तात्तापः "अभिविधौ भावइनुणिति" इनुण "आणिनुण" इति स्वार्थेऽण्. जीवजातेन बृहस्पतिपुत्रेण

जीवेन तेन जीवजातेन पुनः प्रत्युज्जीविते ऽस्मिन्प्रमदविकचवदनवारिजाप्रगुणहृदये तस्मिन्परं प्रत्ययं विदधाना हर्षव्याकृष्टहृदयमेनं व्याचष्ट ॥१४॥

आलम्बनं सुमनसां गुणभासुराणाम्
दूरान्निराकृततमा रुचिरायतात्मा ।
सम्भावितोऽखिलजनैश्शिरसा धुनातु
देवेन्द्रदेशिकसुताऽसि कचत्वमाप्तः ॥६५॥

॥ग॥ ततः प्रतिपन्नप्राणितस्स भृगुपतिस्सत्वरं समुत्थाय सुरासेव नादियमापदापतितेति ताम्प्रति विरक्तचित्तस्स्वयमन्तरचिन्तयत् ॥१७॥

---

प्रगुणं ऋजु परं प्रत्ययं विश्वासं परप्रंत्ययमिति प्रत्ययस्सर्वत्र परएव विधीयतइत्यपि स्फुरति व्याचष्ट उक्तवती चक्षिङ् व्यक्तायांवाचि अनुदात्तेत् अस्माल्लङ् प्रायेणाङ्पूर्वः स्कोस्सय्योराद्योरिति कलोपः ॥२४।

**आलंबनमित्यादि** देवेन्द्रदेशिकसुत! कच! त्वमधुना तु आप्तोऽसीत्यन्वयः इदानीं विश्वस्तो जातइत्यर्थः देवेन्द्रदेशिकसुतइत्यनेन विश्वासासंभावना द्योत्यते असि त्वं कचत्वं केशत्वमाप्तइति च द्ध्वन्यते अत्रासीति युष्मदर्थेऽव्ययं गुणैर्विनयादिभिर्भासुराणां " भञ्जभासे " ति घुरच्. गुणे सूत्रे च मालीभूतानामिति यावत् सुमनसान्देवानां पुष्पाणाञ्च तमोऽज्ञानं ध्वान्तञ्च आत्मा देहस्स्वरूपञ्च शिरसा संभावितः शिरःकंपेनाभिनन्दितइत्यर्थः अन्यत्र शिरसा धृतइति अत्र प्रकरणवशात् कचस्य विश्वस्ततावाप्तिलक्षणेर्थे नियन्त्रिते यत् केशत्वावाप्तिलक्षणस्यार्थस्य प्रतिपादनं तत्र नाभिधा नियमनात्तस्या नापि लक्षणा मुख्यार्थबाधाद्यभावात् अपितु शब्दशक्तिमूलो वस्तुद्ध्वनिः ॥६५॥

**ततइत्यादि**—प्राणितं प्राणनं भावे क्तः अन प्राणने ॥२५॥

कृत्याक्रान्तइव स्वरान्विकुरुते जल्पत्यनल्पं वृथा
कृत्याकृत्यविचारवीतहृदयः कष्टं सदा चेष्टते ।
किञ्चाऽपत्ति मतर्कितांश्च लभते माद्यन्नलम्मद्यपः
स्सर्वाविद्यदमद्य तावदपरं किं विद्यते मद्यतः ॥६६॥

शस्त्रं वस्त्रमपीह नो गणयति स्सस्त्रं भृशन्निस्त्रपः
ष्ठीव्यत्याशु पतत्यपष्ठुरवनौ जाहस्यमानो जनैः ।
कुप्यन्नप्यकुतो हसन्बत रुदन्बंभ्रम्यते चोद्वमन्
किंकिं वा न करोति मत्तहृदयो हाहा स हालापिबः ॥६७॥

॥ग॥ ततस्तत्तादृशस्तस्यास्तावदपानव्यता विधातव्येति विपश्चिद
यं विनिश्चित्योच्चैस्तरां गिरमुदाजहार ॥१६॥

---

**कृत्येत्यादि**—क्रियते परमारणमनयेति कृत्या देवता विशेषः अत्र लक्षण या पिशाचादिः स्वरान् विकुरुते निर्वर्त्तयतीत्यर्थः "वेरशब्दकर्मण" इति तङ् कर्मश ब्दइह कारकाभिधायी आपत्तिमापदं विद्यते अस्ति विद सत्तायां मदसाधनम्मद्यं "कृत्यल्युट" इति बहुलग्रहणात् "गदमदे" ति करणे यत्. अत्र स्वभावोक्तिर लङ्कारः "सूक्ष्मवस्तुस्वभावस्य यथावद्वर्णनं स्वभावोक्तिः" उत्तरत्रापि सैव ॥६६।

**शस्त्रमित्यादि** ष्ठीव्यति इतस्ततष्ठीवनं करोति ष्ठिवु निरसने सुब्धातुः ष्ठि वुष्वकतीनां प्रतिषेधो वक्तव्यइति सत्वाभावः "ष्ठिवुक्लमुचमांशितीति" दीर्घः असम्यक् तिष्ठतीत्यपष्ठुः आचारभ्रष्टः "अपदुस्सुषुस्थ" इत्यौणादिकुः सुषामादि त्वात् षत्वं. जाहस्यमानः पौनःपुन्येनात्यर्थं परिहास्यमानः अकुतः अकस्मात् कोपा दिहेतावसत्यपीत्यर्थः बंभ्रम्यते पुनःपुनर्भ्रमति हालापिबः मद्यपः "पाघ्रे" ति शः पिबादेशश्च ॥६७।

**ततइत्यादि**—विधातव्या अवश्यं विधेया "कृत्याश्चे" त्यावश्यके कृत्यः ॥२६॥

हे लोकत्रयवासिनोऽखिलजना वाणी ममाकर्ण्यताम्
चित्तभ्रंशकरीं विपत्तिजननीं कीर्तिक्षयापादिनीम् ।
यो वा कोपि सुरां पिबेत्परमतस्स ब्रह्महत्याफलं
प्राक्जन्मार्जितपुण्यपूरविहतिं पातित्यमप्याप्नुयात् ॥६८॥

इत्थं भृगुपतेश्शापादपेया समजायत ।
ततः प्रभृति लोकेऽस्मिन्वारुणी दोषकारिणी ॥६९॥

॥ग॥ एवमवसितेषु शनैरेषु नियमितचरेषु वत्सरेषु दनुजगुरुहृदयगह्वराधिवासिन्याम्मृतसञ्जीवन्यामप्यधिगतायामधिकमोदाविष्टमना स्त्रिविष्टपं प्रतिष्ठासुरसौ जीवसूनुर्हरिरिव भार्गवीहृदयहारी मधुकर इव सुमनस्सङ्गसङ्गताभिलाषस्सविनयान्निजदेशिकोपशल्यमुपगम्य पदारविन्दयोरभिवन्द्य गरिष्ठादरमवतिष्ठते स्म॥ ॥१७॥

मुनिः काव्याभिख्यस्सुचरितपयोधिस्तमवदत्
सुसर्गस्साधीयोऽध्वनि विलसितो दुर्गहृदयः ।

---

**हे लोकेत्यादि**—ब्रह्महत्याफलं नरकविशेषं इह पातित्यमपि पातित्यं वर्णबहिष्कृतत्वं ॥६८॥

**इत्थमित्यादि**—ततःप्रभृति अपेया पातुमनर्हा वारुणी सुरा ॥६९॥

**एवमित्यादि**—नियमितचरेषु पूर्वंनियमितेषु वत्स्यामि वत्सरसहस्रकमिति "भूतपूर्वे चरडि"ति चरट्. गह्वरेत्यत्यन्तगुह्यत्वं प्रकाशितं तेन च दुर्लभत्वं. प्रतिष्ठासुः प्रस्थातुमिच्छुः भार्गवी श्रीः देवयानी च सुमनसः पुष्पाणि देवाश्च उपशल्यं समीपं गरिष्ठः अतिशयेन गुरुः आदरो यत्रेति क्रियाविशेषणं ॥२६॥

**मुनिरित्यादि**—काव्यइत्याभिख्या नाम यस्य काव्यस्याभिख्येवाभिख्या शोभा यस्य काव्यसदृश इति यावत् सुचरितानां सुकृतानां शोभनानां चरितानां कथानां च सुसर्गश्शोभनस्स्वभावो निश्चयो वा यस्य अद्ध्यायश्च "सर्गस्स्वभाव निर्मोक्ष नि

सदाध्येयो लिप्सोरिह हि भुवने सत्प्रमदताम्
सतां श्लाघ्यश्शश्वत्सरसमुपदेष्टापि च हितम् ॥७०॥

सत्सेव्येत्सेकहीनाशय ननु भवता यत्नवेद्या हि विद्या
सत्सेवात्युत्सुकात्मन् कच न निपठिता वत्स का मत्सकाशात् ।
वर्षा हर्षातिभाराात् क्षण इव च गतास्संश्रुतास्ते समस्ता
स्तत्ते चित्ते यियासा यदि वजवजतात् भद्रमन्यन्तभद्रम् ॥७१॥

॥ग॥ इति वावद्यमानाशिषमेनमभिवाद्यानुमतिमासाद्य यथेच्छं विच्छायन्नयं वियोगभीतिविच्छायितवदनवारिजेनाच्छापत्येनाच्छाप त्यकलितव्यथं कथयाञ्चक्रे ॥१८॥

---

ऽन्याद्यायसृष्टिष्वि" त्यमरः साधीयसां साधुतराणां अद्ध्वनि मार्गे साधीयोभिर्द्धव निभिश्च दुर्गं दुर्ज्ञानं हृदयम्मनोऽभिप्रायश्च यस्य सती प्रमदा यस्य स सत् प्रमदः तस्या भावस्तत्ता तां लिप्सो रिच्छोः सदाद्ध्येयः ध्यातुमर्हः " तुष्टे यस्मिन् समस्तासुर निकरगुरौ नीतिमार्गप्रवीणे लोकोऽयं सत्कलत्राद्यखिलसुखसमृद्धिं प्रयाति क्षणेन । रुष्टे तत्प्रत्यवायं व्रजती" त्युक्तत्वात् सत्प्रमदः अतिशयित आनन्दश्च सदाद्ध्येयः पठितव्यः सतां नक्षत्राणां निर्द्धारणे षष्ठी सतां साधुभिश्च सरसं वाक्पारुष्यादिकं विना हित मुपदेष्टा "वेदः पुराणङ्काव्यञ्च प्रभुर्मित्रं प्रियेवच बोधयन्ती" त्युक्तत्वात् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्त्तितव्यन्नरावणादिवदित्यादि हितोपदेशविधा यि च ॥७०॥

**सत्सेव्येत्यादि**—उत्सेकेन गर्वेण हीनआशयो यस्य का न निपठिता सर्वा पि पाठितैव. संश्रुताः प्रतिज्ञाताः सहस्रं॰ वत्सराः यियासा गन्तुमिच्छा वज गच्छ वजव्रजगतौ वजतात् प्राप्नुहि अत्यन्तभद्रं अतिविपुलम् "भद्रोरुविपुलं पीन" मित्यमरः ॥७१॥

**इतीत्यादि**—वावद्यमानाशिषं पौनःपुन्येनोच्यमानाशिषं विच्छायन् गच्छन् विच्छ गतौ गुपूधूपीत्यायः विच्छायितं विगतशोभंकृतं अच्छापत्येन शुकपुत्रया अच्छप त्य अभिगम्य अच्छेत्याभिमुख्येऽव्ययं अच्छगत्यर्थेति गतित्वात् कुगतीति समासे समा सेनञिति ल्यप्. ॥२८॥

गुरुजननवतंसः प्रोद्यतः क्काद्य गन्तुं
गुरुजनसविधान्मान्नष्टभाग्यां विधाय ।
गुरुतरकरुणाब्धे हन्त विस्मृत्य ताः प्रा
ग्गुरुसहकृतलीला हन्त पान्थोपमानः ॥७२॥

तत्पूर्वदृष्टास्विव चेष्टते भवा
नस्मास्वनेकाब्दसहोषितास्वपि
सख्यं भवेत्साप्तपदीनमित्यसौ
दाक्षीसुतोक्तिर्वितथीकृता कथम् ॥७३॥

नारीणां हि धृतव्रतस्य वरणन्नो साम्प्रतं स्यादिति
प्रेमार्द्रापि च या प्रतीक्षितवती कान्तव्रतान्तन्तव ।
एताम्मा मधुना यियासति यदि त्यक्त्वा प्रिय! त्वां भवान्
निष्कारुण्य! करोमि किन्ननु पुरः प्राणाः प्रयास्यन्ति मे ॥७४॥

---

**गुरुजनेत्यादि**—जन्यतेऽनेनोत्तरोत्तर इति जननं कुलं नष्टभाग्यं यिधाय गमनोद्यमनम्मयएव मम नष्टभाग्यत्वं विनिश्चितमित्यर्थः. गुर्व्यश्चामूस्सहकृता लीला श्चेति. विशेषणसमासः पान्थोपमानः पान्थसदृशः. पान्थोणनित्यमिति णः. ७२

**तत्पूर्वेत्यादि**—तत्पूर्वं यथा तथा दृष्टासु प्रथमदृष्टास्वित्यर्थः. असौ सर्वै रपि प्रमाणीकृता दाक्षीसुतः पाणिनिः "सालातुरीयको दाक्षीसुतः पाणिनी" रित्यभिधा नरत्नमाला. अस्योक्तिः साप्तपदीनं सख्यमिति. अस्यार्थः सप्तभिः पदन्यासैर्वचनैर्वा प्राप्यं साप्तपदीनमिति. ७३

**नारीणामित्यादि**—सांप्रतं युक्तं युक्ते द्वे सांप्रतं स्थान इत्यमरः. अधुना वरणयोग्ये काले यियासति यातुमिच्छति. प्रियत्वां प्रियस्त्वं हस्यास्सा प्रियत्वा तां प्रियत्वां॥ ७४

अलमलमधुना ते द्वापरेणावरेण
स्मरशरविवशाम्मामुद्वहोद्वेलरागाम् ।
वचनमिति कचोऽस्याश्शुश्रुवान्प्रश्रितात्मा
दनुजगुरुसुतान्तामेवमूचे सुतान्ताम् ॥७५॥

भृगुपरिवृढवंशप्रोदितोदारमुक्ता
मणिरयि रमणि! त्वं काचकल्पः कचोऽहम् ।
कथमिह भवती तत्भावयेताऽबले! मा
मसदृशमिह निंबं गोस्तनीवल्लरीव ॥७६॥

मलीमसांगो नियमेन नित्यं निष्कामधीरध्ययनैकगृध्नुः
काहं क च त्वं कमनीयरूपा कामातुरा कांक्षितभूरिभोगा ॥७७॥

साथ गिरं दुर्विषहां श्रुत्वा सोढुमनीशा मदनातङ्कम् ।
चम्पकमालामृदुकम्राङ्गी वाचमवोचत्पुनरप्येवम् ॥७८॥

---

**अलमित्यादि**—द्वापरेण सन्देहेन वारणार्थयोगे तृतीयावक्तव्येति तृतीया. अवरेण अधमेन शुश्रुवान्प्रश्रितात्मेत्यनेन गुरुवत् गुरुपुत्रेष्वियुक्तमनुस्मारयति. भाषायां सदेति क्वसुः. सुतान्तां सुतरान्तान्तां॥ ७५

**भृग्वित्यादि**—वंशशब्दाश्श्लिष्टः काचकल्पः प्रायेण काचतुल्यः ईषदसमाप्ताविति कल्पप्. सूत्रेण कच्यते माणिवत्बध्यतइति काचः. मण्याभासः काचि काचि दीप्तबन्धयोः कर्मणि घञ् भावयेत प्राप्नुयात् भू प्राप्तौ विकल्पितणिच्कः गोस्तनीवल्लनी द्राक्षालता "मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति चे" त्यमरः. अत्र भृगुपरिवृढवंश एव वंशः तस्मात् प्रोदिता मुक्तामाणिरिति श्लिष्टशब्दनिबन्धनं केवलरूपं परम्परितमलंकारः वंशादपि मुक्तोत्पत्तिप्रसिद्धेः तस्योपमया सह संसृष्टिः॥ ७६

**मलीमसेत्यादि**—गृध्नुः गर्द्धनशीलः गृधु अभिकाङ्क्षायां त्रसिगृधीतिक्नुः केत्यधिकरणाक्षेपे॥

**सायेत्यादि**—चम्पकामालावत् मृदु कम्राश्चाङ्गं यस्यास्सा नमिकम्पीति रः वृत्तनामाङ्कितोयं श्लोकः चम्पकमाला भतया गस्स्यात्॥ ॥७७॥

अलमलममलात्म ! त्वींदृशा वाक्यभङ्ग्या
तव तु विमुखतेयन्नोचिता मादृशीषु ।
न खलु जलधरस्य स्वैकनाथासु लोके
क्वचिदपि विमुखत्वं दृश्यते चातकी ॥७९॥

अस्यन्दताऽस्याम्बुरुहात्पुराऽस्या
त्तवाङ्ग सान्द्रा मकरन्दधारा ।
जागल्यते सम्प्रति हन्त तीव्रा
सन्तप्तताम्रद्रवधोरणीयम् ! ॥८०॥

न चेहानुचिताङ्किञ्चिन्महताम्महिताशया
प्रभवो हि पयस्सिन्धुः पियूषस्य विषस्य च ८१.

॥ग॥ ततस्तस्या ग्रहिलाया महिलाया विवाहस्पृहामखण्डां चिखिण्ड

---

**अलमित्यादि**—स्वैकनायासु स्वआत्मा एको नाथो यासु तासु "स्वेज्ञातावा त्मनिस्वन्त्रीष्वात्मीयेस्सोस्त्रियांधन" इत्यमरः. अत्र प्रतिवस्तूपमालङ्कारः. विमुखतालक्ष णस्य धर्मस्य काव्यसुतया पर्यायान्तरेण पृथङ्निर्देशात् वाक्यार्थगतत्वेन सामान्यस्य वा क्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमा॥ ॥७६॥

**अस्यन्दतेत्यादि**—प्रस्रुता जागल्यते पुनः पुनर्गळति अविच्छिन्नतया प्रसर तीत्यर्थः. आस्यांबुरुहादित्युपमा मकरन्चधारा ताम्रद्रवधोरणीतिचातिशयोक्तिः धोरणीप्रवाहः॥ ॥८०॥

**नचेत्यादि**—प्रभवउत्पत्तिस्थानं अत्रार्थान्तरन्यासोऽलंकारः॥ ॥८१॥

**ततइत्यादि**—ग्रहोऽस्यास्तीति ग्रहिला ग्रहंआग्रहः पिच्छादित्वादिलच् जिखण्डिषन् खण्डायितुमिच्छन् खडखडिभेदेन चौरादिकः सनन्ताधवत् अयं किकल्पित णिक्चः यथोक्तम्माधवेन " यत्र लिंगं वचनं वास्ति तत्र विकल्प " इति लिंगन्तु चि

षन्नेष तामेव मभाषत ॥१९॥

कार्याकार्यविवेकधुर्यहृदये शिष्यस्तुनैवन्त्वया
भाष्योऽहं भृगुसंभवे सविनयं सेव्यासि मे काव्यवत् ।
किञ्चाये त्वमहञ्च सुन्दरि कवेः कायादजायावहि
प्राप्तुन्तत्भवतीं कथन्नु भगिनीं पापेतरः पारये ८१॥

॥ग॥ तदनु सल्लापैरेभिरुल्लापतमानेनानेन निगदितान्निजाशातन्नु कर्तरींवैखरमिनामसहमाना सहसोत्पन्नरभसभरा पूर्ववदेवाच्छनयन मूर्च्छालरागा सेयनच्छतनया सोत्प्राशमेनं प्रावोचत ॥२०॥

अळीकोपाश्रितो नित्यं कृष्णात्मा च स्वभावतः

तिस्मृत्या मित्यत्रोक्तं तेनैव चिन्तस्मृत्यामिति सानुषङ्गएव पठितव्ये इदित्पाठान्नलोपा भावार्थादस्य णिच् पाक्षिकः नित्ये हि णिचि तस्य स्थानिवत्भावादव्यवधानात्र क्त त्पि क्तिन्परत्वमिति चिन्तितइत्यादौ नलोपाप्रसगः तेन चिन्तति चिचिन्तेत्याद्यपि भव ति एवमन्यत्रापीद्वित्वं णिज्विकल्पार्थन्द्रष्टव्यमिति ॥१६॥

**कार्येत्यादि**—कार्याकार्यविवेकधुर्यं हृदयं यस्यास्सा धुरीयड्ढञाविति य अजायावहिजातौ चार्थयोगे पुरुषाणां परोभवतीतिशृङ्गारे त्वं स च भवथः स त्वञ्चा हञ्च भवामः चार्याभावे तु प्रथमपुरुषएव सत्वं वाहं वा भवेयुरिति त्वमहञ्च प्राणदा नादमुष्याव्यसनार्णवादुत्तारितौ स्वइति प्रयोगश्च पारये शक्तो भवामि पारतीरकर्मसमा प्तौ ॥ ॥८१॥

**तदन्वित्यादि**—सल्लापैरुल्लापयमानेन वञ्चयता लियस्सम्माननेत्यत्र चकार त्प्रलंभने तङ् कर्तरी पत्रीकृतसुवर्णादेःकर्त्तनोपायः नापितकेशकर्तरिका वा कृती च्छेद ने बाहुलकादरन् गौरादित्वाङ्ङीष् वैखरीं सरस्वतीं पूर्ववदेवेति रागस्य वस्तुतोभेदेऽ पि एकतयाऽध्यवसितत्वात् एकत्वमविरुद्धं रागोऽनुरागो रक्तिमाच मूर्च्छालोमूर्च्छितः सोत्प्राशं सोपहासं ॥ ॥२०॥

**अळीकेत्यादि**—अथ ते कचता उचिता जातेति शेषः पूर्वन्तैलपायिकादी

अन्ते च कुटिलोऽत्यन्त मुचिता कचतायते ॥८२॥

भूयोरोषकषायिता निजतृषाभङ्गादनङ्गातुरा
भूयो सावशपच्च तं शठ मया माया व्यजेजीव्यथाः ।
हा कष्टं कच नीच भस्मनि हुतज्ञातन्तदद्याखिलम्
विद्याप्यूषरसस्यवत्तव परं निष्पद्यतान्निष्फला ॥८३॥

शप्तोयत्स्मरतप्तया मुनिरहं धर्म्मैकतानस्त्वया
स्वच्छन्दामुपयच्छ तान्न भवकीं विप्रान्ववायोत्भवः ।

---

वद्दाढ्या कचशब्दाभिधयस्यते शिरोरुहात्यन्तसादृश्यादद्य कचशब्दवाच्यत्वमुचितं जातमिति भावः अलीकं ललाटमनृतञ्च अल्यते भूष्यतइत्यलीकं ललाटं अल्यते वार्यतइत्यलीकमसत्यञ्च अलीकादयश्चेत्यौणादिको निपातः कृष्णः कृष्णवर्णो मलिनश्च आत्मा स्वरूपं मनश्च अन्ते अग्रे फलोत्पत्तिकाले च कुटिलः वक्रस्वरूपः वक्रहृदयश्च अत्र श्लेषोऽलङ्कारः ॥८२॥

**भूयइत्यादि**—भूयसा रोषेण कषायिता कलुषिता तृषा स्पृहा स्वकार्यैकपरः शठः मायावी मायावान् अस्मायामेधेति विनिः. अजेजीव्यथाः बहुकृत्वोजीवनम्प्रापितोसि जीव प्राणधारणइत्यस्माद्यङ् लुकि णिचिजेजीविइति स्यिते कर्मणि लङि यकि णिलोपे रूपम् भस्मानि हुतं निष्फलमित्यर्थः क्षेपइतिसमासः क्षेपो निन्दा तत्पुरुषेकृतीत्यलुक् ऊषदक्षारमृत्तिका सोऽस्मिन्नस्तीत्यूषरः ऊषसुषीाति मत्वर्थीयो रः परमत्यर्थं अत्र देवयान्या भृशार्थेविवक्षितेऽपि केवलार्थस्यपि वाचकः परशब्दोऽत्र दैवादापतितः तेन नस्यैव नैफल्यन्न तु ताच्छिष्येषु ॥८३॥

**शप्तइत्यादि**—एकतानः अनन्यवृत्तिः स्वच्छन्दां स्वतन्त्रां "स्वतन्त्रोपावृतस्स्वैरी स्वच्छन्दोऽनरवग्रह" इत्यमरः उपयच्छतां उपयमनङ्कुरुतां "उपाद्यम" इति तङ् अद्याप्य पाठयित्वा विभाषापइत्यापः परस्यणेर्ल्यपि विधीयमानो यादेशो न भवति अस्या रूपस्य लाक्षणिकत्वदिति माधवः सफलये सफलां करोसि तत्करोतीति णिच् मुदितवान्प्रीतः निष्ठेति कर्तारि क्तवतुः इष्णुच् क्तवतुविचतृन्क्वसुक्वरच्षाकन्ल्यु

अप्यध्याप्यलमप्यहं सफलये विद्यामिहाद्यामिमां
सद्यस्तामिदमुक्तवान्मुदितवान्स द्यां समापद्यत ॥८४॥

उपान्तमायान्तमहेर्न्निहन्ता
कचन्तमालोक्य रुचा ज्वलन्तम् ।
गृहीतविद्यं सह देवसङ्घैः
प्रमोदभारं बिभरांबभूव ॥८५॥

इतिश्री मानवेदविरचिते चम्पुभारते प्रथमस्तबकः
समाप्तः

आयातेयत्नलभ्यां गुरुतरतपसादीव्यतः काव्यतोऽस्मा
दाद्यांविद्यां गृहीत्वा विकसितवदनांभोरुहे जीवसूनौ ।
तोषादध्यैषतैनां सपदिसुमनसस्सूरना त्वरितोऽस्मा
देतेभूयभय प्रमदभरवशं वासवं वाचमूचुः ॥१॥

---

णिन्यचः उकाराणुकअष्टकास्सकास्सर्वेऽपि कर्तरीति कारकसंग्रहे ॥७४॥

**उपान्तमित्यादि**—अहेर्वृत्रस्य "सर्पेवृत्रासुरेप्याहि" रिति वैजयन्ती बिभरांबभूव बभार लिटि "भीह्रीभृहुवांश्लुवच्चे" त्यांप्रत्ययः श्लुवत्भावश्च श्लाविति द्विर्वचनम् ॥७५॥

इदि श्रीमानवेदविरचितस्य चम्पूभारतस्य टिप्पणे.
कृष्णीये प्रथमस्तबकः ॥

अथ कचेसमधिगत मृतसञ्जीवनी विद्ये समाप्ते देवानां प्रवृत्तिमाह.

**आयातइत्यादि**—गुरुतरतपसा दीप्येतश्शोभमानादनेन तत्प्रसादलभ्या सा विद्या फलं प्रतिनव्यभिचरतीति प्रकाश्यते, अध्यैषत अधीतवन्तः इणोगाङभावे रूपं सपदीत्यनेन सपत्नविजयौत्सुक्यं प्रकाशितं सूरतात्कृपालोः "स्याद्दयालुः कारुणिकः कृपालुस्सूरतस्समा" इत्यमरः संभूयसं मिलिता भूत्वा ॥ ॥१॥

दिष्ट्यायंसमुपागतो गुरुसुतः पुष्टानुभावोदयो
विद्यामाकलयन्निमामसुलभा न्तद्देवभाग्याम्बुधे ।
संवार्ग्याश्वमिषेणयाऽरिपटली पाट्रूपटाटोपमा
क्त्तत्कालकृतान्यनून फलता कर्माणिनिर्मान्तिहि ॥२॥

प्रसरइह गिरांमूचिकाविक्रयो नियत मय मयस्कारवाटेहिनः ।
कुरुनयजलधे वीक्ष्ययुक्तं विभो स्वयममलमते मंक्षुयुक्ष्वापिनः ॥३॥

॥ग॥ तदनु गर्वायमाण सर्वगीर्वाणवाणी मवधार्य निभृत माचार्येण सहविचार्य वृषपर्व पूर्वपूर्वदेव वृषाणां समूलकाषं कषणाय सकल सुरवर्ग सहितस्स्वर्गतो निर्गतोमहितदानववाहिनी परमतानवदानघोरष्टरनिदाघ समयस्सखलु वलवैरी बाणवार नारणपारीण वारवाणवर

---

**दिष्टयेत्यादि**—दिष्ट्येत्यानन्दे अनुभावः प्रभावः आकलयन् प्राप्नुवन् संवर्म्य वर्मणा सन्नह्य अभिषेणय सेनयाऽभियाहि. उभयत्रापि सत्यापेत्यादिनाणिच्, पाटूपटच्छेदकः अटपटगतौ पाटेर्यन्तात् पचाद्यचिपाटे र्णिलुक्चाभ्या सस्येतिपटूपटः लुकालुप्तत्वाद्वृद्धेरभावः अभ्यासस्योगागम उपधादीर्घश्चेति माधवोक्त्या पाटूपटः अत्र हलदिश्शेषो न अभ्यासस्यानचीत्युक्तेरत्राचि अभ्यासस्योक्त मन्यत्कार्यन्न, तत्तत्कालकृतानि तत्तदुचितकाल कृतानि अनूनं पूर्णं निर्मान्ति कुर्वन्ति ॥ ॥२॥

**प्रसरइत्यादि**—इह उचितज्ञस्य भवतस्सन्निधौ सूचिकाविक्रयः तादृशइति यावत् अयस्कारवाटे लोहकारवेश्मनि "वाटस्तुनिरवेष्टने मण्डले नगरे सीम्नि भोजने वलये गृहे "इतिकेशवः. मङ्क्षुशीघ्रं युङ्क्ष्यायि नियुङ्क्ष्वापि अनेकार्थाधातवइति वदन्त्याऽऽचार्याः, तस्माद्युजिरेव नियोगशब्दवाच्यस्याभिधाने समर्थयति त्विसर्ग्यौ धातुलीन मुपपसर्गइवार्थमिति माधेच अत्र निदर्शनालङ्कारः, वृत्तमिदं चन्द्रिका, "ननततगुरुभिश्चन्द्रिकाश्वर्त्तुभिः". इति तल्लक्षणम् ॥ ।३।

**तदन्वित्यादि**—गर्वायमाणाः गर्विताःलोहितादेराकृतिगणत्वात् क्यष्। गीर्वाणगणवाणी मित्येकवचनेन सर्वेषामपि युयुत्सातिरेकोद्ध्वन्यते ।निभृतं गूढं वृषपर्वपूर्वावृषपर्वप्रधानाः समूलकाषं समूलमित्यर्थः. निमूलसमूलयोरिति णमुल्। कषखषशिष

विराजमानविपुलतरदोरन्तरालः प्रोत्भटवैरिभटपटलीं कण्ठकाण्डख ण्डितीं वितन्वतीं रक्तकणसिक्तीं ह्लादिनीव दुर्धुराभां ह्लादिनीमुद्धरन्नु द्धततराभ्रमुवल्लभशिरोधराधिरूढो युद्धनिरूढिबद्धकक्ष्यैः प्रौढैरमरप रिवृढै ररिभिजयै ररिपरिषदरिरिषयाऽहमहमिकया भिधावमानै रपिधी यमान पुरोभागो दानवराजराजधानीं समया विराजमानां कामपि काननावनीं सद्यस्समासाद्य धितदमतिद्योतमाने सरसि रभसभरादु भयापाणिव्य त्युक्षमाणाः प्रत्यक्षायमाणाः प्रसवबाणदेवता इवदेदेप्य मानानि जवदनपरा जितानि वनैकशरणान्यपि भृशत्तरानुशयेन कु

---

जझषशषवषमषरुषरिषहिंसार्था इति धातुः । दानववाहिन्या एव वाहिन्या नद्याः परमता नवदाने विषयेतानवकाश्यं निदाघसमयः घर्मकालः अत्रश्लिष्टशब्दपरम्परितं बाणवार ईशरसमूहः । पारीणः पारङ्गच्छन् समर्थ इत्यर्थः । वारवाणः कवचः पटली समूहः स हे पटलवने" त्यमरः । कण्ठकाण्डखण्डितीं कण्ठकाण्डः खण्डितोयस्यास्ता कण्ठकाण्डख ण्डिती बहुव्रीहेश्चान्तोदात्त इति ङिष् वखवर्जितजातिपूर्वः कृतमितजातप्रतिपन्नवर्जं स्स र्वक्तान्तै र्वहुव्रीहि रत्रान्तोदात्तोक्तया ग्राह्यइति भोजः । अस्वाङ्ग रत्र स्वाङ्गरूपजाति पूर्वत्वान्नित्यम् । रक्तकणसिक्तींरक्तकणैः किञ्चित्सिक्तां क्तादल्पाख्याया मिति ङीष् । अल्पायामल्पत्वे द्योत्ये कृत्ग्रहणपरिभाषया समुदायस्यक्तान्तत्वम् । ह्लादि नीविद्युत् अन्यत्र कुलिशं अभ्रमुवल्लभ ऐरावतः । निरूढिर्निर्वहणम् । अरीनेजयन्तिकम्प यन्ति इत्यारिभेजयाएज्रकम्पनेएजेः खश् । अरिरिषया प्राप्तुमिच्छया ऋगतिप्रापणयोरि त्यस्मात्सन् । अहमहमितियस्यां क्रियायां सा अहमहमिका मयूरव्यंसकादयश्चेति समासः । अभिधावमानैर्गच्छद्भिः । धावुगतिशुद्ध्योरित्यतितत् अपिधीयमानऽऽआच्छा द्यमानः दानवराजस्य वृषपर्वणः राजधानीं समया राजधान्यास्समीपे अभितः परित इत्यादिना द्वितीया अधितदन्तस्यां विभक्त्यर्थेऽव्ययीभावः । अव्ययीभावे शरत्प्रभृति भ्यइति टच् समासान्तः । उभयापाणिउभौपाणीयस्या मुक्षणक्रियायां उभाभ्यां पाणि भ्यां मितियावत् । उभोभयाभ्या मञ्जलिपाणिहस्तदन्तकर्मभ्यः क्रियायामन्यपदार्थे । उभोभयाभ्या मुत्तरेभ्यो ञल्यादिभ्य इच् क्रियाविशेषणत्वेन व्यत्युक्षमाणा अन्योन्यमुक्ष न्त्यः प्रत्यक्षायमाणाः प्रत्यक्षीभवन्त्यः । लोहितादितिभवन्त्यर्थे क्यष् । देदीप्यमाना अत्यर्थशोभमानाः दिवुक्रीडेत्यस्माद्यङन्ताच्छानच् । वनजलं अरण्यमित्यापिस्फुरति ।

शेशयानि सर्वाणि ततोपि निर्वास यितुमिव वनलब्धमध्यासीना स्स
र्वजयनयना कार्षिणीर्वार्षपर्वणीप्रमुखा वारिजाक्षी रद्राक्षीत् ॥१॥

रूपंरूपयतस्तासाम् सुदृशामि दमीदृशन् ।
सानीकस्य मनस्तस्य व्यचतीकस्य तद्गुतम् ॥४॥

तासामंगेतुरासाहो गावोयावदवापतत् ।
तावदेवस्मरस्यापि हृदितस्यात्भुतास्पदे ॥५॥

तामोदभाराहमृतन्तदानो परस्परामेव परन्न्यषिञ्चन् ।

---

अनुशयोदीर्घद्वेषः । "अथानुशयोदीर्घद्वेषानुतापयो" रित्यमरः । कुशेशयानि "शयवास वासिष्वकाला" दित्यलुक् । वृषपर्वणोऽपत्यंस्त्रीवार्षपर्वणी अणिञ्जन्निति प्रकृतिभावा ह्लिोपाभावः । ॥१॥

**रूपमित्यादि**—रूपयतः पश्यतः रूपदर्शनइतिणिच् । यद्वारूपरूपक्रियायामि त्यस्माच्छता रूपस्यकरणंदर्शनं रूपक्रियेति स्वार्मीइदमेवंदृशमिदमीदृशं सानीकस्ययु द्धोद्युक्तस्येतियावत् । "तेमसहेतितुल्ययोगे" इतिसमासः वोपसर्जनस्येति सह शब्द स्यसाभावः तुल्ययोगस्समानसंबन्धः । युद्धोद्यतस्य मनश्चलनाऽयुक्तताप्रकाश्यते. ननुस हार्थवशादनीकस्यापिमनश्चलनंप्रतीयते । ननुतुल्ययोगे समासो विधीयते तत्कथमेवंव्या ख्यायते । उच्यते प्रायिकं तुल्ययोगइति वचनं सपूर्वाया:ष्ट्यमायाविभाषेति वचनान् सकर्मकः सलोमकः इत्यादिप्रयोगाच्च । अत्रतुविद्यमानत्वमेवार्थः व्यचनीकस्यत अत्यर्थं विकसितमासीत् । कसगतौयङ् नीग्वञ्चिवतिनीक् । यङन्ताल्लङ् । ॥४॥

**तासामित्यादि**—तुरासाह इन्द्रस्य गावः इषवः अपिर्भिन्नक्रमः हृद्यपीति अत्र सयुच्चयोऽलङ्कारः । तुराषाट् गोपतनस्य स्मरगोपतनस्यापियौगपद्यात् गुणक्रियायौगप द्यसमुच्चयः. गुणानां वैमल्यादीनां योगपद्येनावस्थानं तथैव क्रियाणां समुच्चयोऽलङ्कारः भिन्नविषयत्वेन एकाधिकरणत्वेनचायमलङ्कारो दृश्यते. अत्र तु भिन्नविषयत्वेन गोशब्दश्श्लिष्टः. ॥५॥

**ता इत्यादि**—अमृतञ्चलं पीयूषञ्च. परस्परमन्योन्यं "कर्मव्यतिहारे सर्वना

किञ्चाप्यपञ्चेषु शरातुरस्य स्मेरेषुनेत्रेष्वपि वृत्तशत्रोः ॥६॥

अनन्तरं परसन्तापनधुरन्धरोपि पुरन्दरोसौ सुजातयुवतिजात विलोकनजातमदनजातवेदसा मनसिपरन्तापमापन्नस्ता सान्तरुणी मणीनां दर्शनसुखं सम्यगनुबुभूषुरमवलोकित जरपुरुषविशेष विलोकनजन्यसंभ्रमादिमा विधूतसुखविहरणानियतमपसरेयुरिति तूर्णमात्मानमूर्णनुषुपञ्चशर शरपातवञ्चनायेव पवनभाव मभावयत ॥ ॥२॥

तदनुतदानीमपि सहायसम्पदेव समधिकमेधमानेनमदनदहनेन वितायमान तापस्सर्वाङ्गीणरमणीयरूपपीयूषजूषसमास्वादनो त्सव समुत्सुकमतिरासां वासां सितीराश्रितानिमिश्रितानि व्यातानीत् ॥३॥

---

म्नोद्धे भवत इति वक्तव्यं. समासवच्च बहुलं समासवत्भाविपूर्वपदस्य प्रथमैकवचनं. स्त्रीनपुंसकयारुत्तणमदविभक्तिर्वाऽभावो वक्तव्यः. परस्परमिति वान्यार्थिञ्चन् सिक्तवत्यः. षिच क्षरणे रोमुचादीनामिति नुम्. अल तृतीयो विशेषालङ्कारः. परस्परामृतसेकेनासंभाव्यस्य वृत्रशत्रु नेत्रामृतसेकस्यापि करणात् अनाधारमाधेयमेकमनेक गोचरमशक्यवत्स्वन्तरकरणञ्च विशेषः. तस्यामृतमितिश्लेषोऽनुग्राहकः, ॥६॥

**अनन्तरमित्यादि**—परसन्तापनधुरन्धर इति संज्ञायां भृजोवृ्तृति सञ्ज्ञयां खजूकोऽपि कृत्यक्रुट इति बहुसग्रहणादनाम्न्यपि खच्. वाचं यमेत्यत्र चकागदमागमश्च. सुजातं सुन्दर युवतिजातं स्त्रीसमूहः तस्य विलोचनाजातेन कामाग्निना अनुबुभूषः अनुभवितुमिच्छुः अनवलोकितचरः पूर्वमनवलोकितः जन्यः जात; भव्यगेयेति कर्तरिनिपातितः. ऊर्णुनूष्टः च्छादयतुमिच्छुः "ऊर्णुछादने" सनन्तादुः. अभावयत प्राप्तवान् वञ्चनायैवेतिफलोत्प्रेक्षा. ॥२॥

**तदान्वित्यादि**—एधमानेन वर्द्धमानेन सर्वाङ्गिणं सर्वाङ्गं व्याप्नुवत् जूषं पेयविशेषः. ज्वोर्लोपश्चेत्वैणादिक ऊषन्प्रत्ययः अन्त्यलोपश्च. उत्सूत हर्षामित्युत्सवः. तीरश्रितानि तीरं श्रितानि द्विनीयश्रितेति समासः. मिश्रितानि सङ्कीर्णानि. सहायसम्पदेवेति हेतूत्प्रेक्षा. ॥३॥

सहसापहृतेताभि स्स्वस्यनेत्रसहस्रके ।
तासान्नेत्रसहस्रं य दहृतोचितमेवतत् ॥७॥

श्रेणीकृतानिमरुता वसना निवेगा
देणीदृशस्स मवलोक्यससं भ्रमास्ताः ।
श्रेणीभरेणविपुलेन जलात्कथञ्चि
न्नाणीयसाकुचभरेणचतीरमीयुः ॥८॥

त्यक्त्वामरुत्तां सततो मरुत्वान्
यथावदैक्षिष्टृति सस्कृतात्मा
कुमारिकास्तानयनैर्वहाद्भि
भूयिष्टतामप्यनिमेषवाञ्छ॥ ॥९॥

बालावेला प्रयातास्स पदिसलिलतो व्याकुलंबालजालम्
बाहानालेमृणाली मृदुनिघनरुचा न्धारयन्धारयन्तीः ।
वीक्षंवीक्षञ्च विन्दन्मुदमलमनिमेषत्व भूयिष्ठतेद्वे
स्वेषा मक्ष्णां तदानीं खलुचरित फले नून मेने समेने ॥१०॥

**सहसेत्यादि**—नेत्राणि नयनानि वस्त्राणि च तेषामेकत्वाध्यवसायादुचित मतीदिति वाक्यार्थोपपत्तिः. ॥७॥

**श्रेणीत्यादि**—अश्रेणयः श्रेणयः कृतानिश्रेणीकृतानीतिच्वि- (श्रेण्यादयः कृतादिभिरिति समासः) संभ्रमस्त्वरा आवेगस्संभ्रमस्त्वरा इति निघण्डुः । नाणीयसा वृहत्तरेणनशब्दस्य सुप्सुपेति समासः. ॥८॥

**त्यक्त्वेति**—मरुत्वां पवनत्वं मरुत्वानिन्द्रः तिरस्करणी विद्ययाऽच्छादितशरीरः.

**बालाइत्यादि**—बालजालं केशपाशं "चिकुरः कुन्तलोबालः कचः केश शिरोरुह " इत्यमरः । घनरुचामिति कर्तृकर्मओ रितिकर्मणिषष्ठी धाय धर्तृ अनुपसर्गाल्लिंपेतिशः। वीक्षंवीक्षंपौनः पुन्यनदृष्ट्वा "आभीक्ष्ण्येणमुल् चेति णमुल् । एनेअनिमेषत्वा भूयिष्ठते अनिमेषतां भूयस्तरताञ्च । चरितकले प्राप्तफलेमेने॥१०

॥ग॥ तदनुवासवोऽसौ वार्षपर्वणीमुखाभिर्वर्षाभिरिव दरीदृश्यमान सजलपयोधराभिः पुलिनतलमिव जलापगमलक्ष्यमाणनितंबबिंबं संव हन्ती भिर्जलार्द्राभिरपि तापोद्रेककारिकाभिरसुरकुमारिकाभिरतितरां प्रतारितचेता विस्मृतप्रस्तुतकृत्यस्सपदि समजायत ॥३॥

गंभीरंबतकुंभिनीपरिवृढं विद्यामुनित्योद्यतं
विद्वांसंक्षमिणंक्षमासुरवरं शौर्योत्भटं सत्भटं
भूतेशं स्वभुवंस्वयंभुवमपिप्रायेण लोकानहो
लोकेऽस्मिन्नवलोकएव वनितापङ्क्तिर्वनीवङ्क्तिहि ॥११॥

॥ग॥ अथविषधरविषवेगदुर्विषहै र्विषमबाणबाणैर्हृतौजसं विडौजसमवधाय मृधायनायं समयइत्यदः कुर्वाणा गीर्वाणा स्तसमतः कुर्वाणा भीषणसतर निजाभिषेणनकथाविद्रावित विविधदैत्यवरोपद्र वान्दिवमवाप्यमुख मव्रात्सु ॥४॥

---

तदन्वित्यादि——वर्षाःप्रावृट् । दरीदृश्यमाना अत्यर्थन्दृश्यमानाः पयाधरा मेघाः स्तनाश्च " स्त्रीस्तनाब्दौ पयोधरौ " इत्यमरः जलस्यापगमेजलादपगमेच जला र्द्राः कळभेनार्द्राः वटखण्डेनानिर्मिता जलेनार्द्राश्चप्रतारितंवञ्चितं.

गंभीरमित्यादि – गंभीरं गांभीर्ययुक्तं " अविज्ञाते ङ्गिताकारो भावोगांभीर्यमु च्यते " इतिभावप्रकाशे । कुंभिनीपरिवृढं राजानं क्षमिणं क्षमाशीलं । शमित्यष्टाभ्यो घिनुणितिघिनुण् । संश्चासौ भटश्चेति सत्भटः सन्महदिति समासः कमितिभाषते कया स्यसीत्यादिकामिति भटः योद्धा स्वभुवंविष्णुं प्रायेणबाहुल्येन " प्रायश्चानशनेमृतौ तुल्य बाहुल्ययो रितिविश्वः वनीवङ्क्ति अत्यर्थं वञ्चयति वञ्चुप्रलंभेन यङोलुक्त्वान्न लोपा भावः अत्राप्रस्तुतानामेव समानधर्माभिसंबन्धात्तुल्ययोगितालङ्कारः औपम्यस्यगम्य त्वे पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा समानधर्माभि संबन्धेतुल्ययोगिता. ॥११॥

अथेत्यादि — विडौजसमिन्द्रं मृधं जन्यं अठः कुर्वाणा अदोनुपदेशइति गतिसं ज्ञा अनुपदेशस्स्वय मेव बुद्ध्या विमर्शनं निश्चिन्वाना इति यावत् अभिषेणनं " यत्से नयाभिगमनमरौ तदभिषेणन " मित्यमरः अव्रात्सुः वासचक्रुः ॥४॥

बालासुव्याकुलासुत्व रितमथतटादाददानानासुवास
शर्मिष्ठादेवयान्यानिजमितिजगृहेचे लमूचे तयैषा
शर्मिष्ठेपापनिष्ठेगतभयमसिसंवस्त्रयस्यस्मदीयम्
क्षौमं य न्निस्त्रपास्मिन्मिषतिबतजनेत्त्वुशिष्येतमृष्ये ॥१२॥

॥ ग ॥ एवमतिमत्सरेण निर्भर्त्सितानष्ट दिष्टाशर्मिष्ठागराकिरंगिर मुदगिरत् ॥ ५ ॥

श्रेष्ठम्मन्येगरिष्ठंसकलदनुभुवा न्दूरदर्शिप्रवेकम्
स्तुत्यन्नित्यंवदान्य म्ममजनकमहो दासवत्सेवतेसौ ।

बालास्वित्यादि—निजन्चेलमिति निरूप्ये तिशेषः "चेलंचीरंवासः कर्प्प टमाच्छादनन्निवसनञ्च अंबरमंशुकमुक्तं वस्त्रं सिच यंपटः प्रोक्त;: इति शब्दरत्नाकरः क्षौमं संवस्त्रयसीति अत्र सुब्धातुवृत्तिः सुधाकर स्समाच्छादनं प्रत्ययार्थ मेवाह सामन्यकर्मणो न्तर्भावे विशेषकर्मणोऽनभिहितत्वात्तद्विशे षस्य प्रयोगो यथाभवति माणवकं मण्डयतीति एवं सतिवस्त्रसामान्यस्य प्रावारो विशे षो भवति इति प्रावारं संवस्त्रयतीति एवमत्राऽपिक्षौममिति वस्त्रविशेषत्वा दुपपद्यते अस्यस्मिपदयोः प्रयोगे मध्यमोत्तमौ दृश्येते वेत्स्यसीति पदभंगा दितिवानसूतं अत्रा स्मिकरोमि सख्यमिति प्रयोगश्च अस्मिञ्जने मयि मिषतिसति इमञ्चनमनादृत्य षष्ठीचा नादर इति सप्तमी नमुष्येन सहेमृष स्तितिक्षायां ॥ ॥२२॥

एवमित्यादि—निर्भत्सिता भर्त्सभत्सने नष्टदिष्टा नष्टभाग्या कष्टतरस्य दासी भावस्यप्रत्यासन्नत्वान्नष्ट दिष्टत्वम् गरं विषं किरतितितिगरकी क्विप्चेतिक्विप् उदागिरदु गीर्णवती गॄनिगरणेलङ् ॥५॥

शिष्येइत्यादि—भिस्त्वयाममन्यूनता ह्युक्तासप्रत्युततवैव इत्याह श्रेष्ठम्म न्य इत्यादि श्रेष्ठमात्मान म्मन्यतेसा श्रेष्ठम्मन्या आत्ममानइति खश् आत्मनोमनन मा त्ममानः कर्मणिषष्ठ्या समासः आत्माच स्वंसच सन्निधानान्मन्तेव तस्यात्मस्वरूपेण कर्तृत्वं पण्डितत्वादि रूपेण कर्मत्वमिति न विरोधः गरिष्ठं गुरुतमं इष्ठनिप्रियस्थिरेति गुरुशब्दस्यगरादेशः दूरदर्शिषु प्रवेकमिति सप्तमीसमासः ननिर्धारण इति नि र्द्धारणषष्ठ्या स्समा सनिषेधात् देशकालविप्रकृष्टार्थाञ्च पश्यति सदूरदर्शीतिटीकासर्वस्वे

तातस्तोताग्रहीतातवकुमृतियुतो हन्तनेत्रेणकाण
स्तन्नोभेदोमहीयानिहभवति तमामन्धुसिन्धोरिवास्ते ॥१३॥

वाणीन्नतेविगणयामिचवन्ध्यकोपे
वेला यथाजलनिधेः प्रहर्तिप्रचण्डाम् ।
उक्त्वेतितांसमभिहत्यदुरत्ययाधिं
कोपादपीपतपर्पायमिहाधिकूपम् ॥१४॥

नतामेपपरंकूपे लोपादियमपातमत्
आत्मानमपिदास्याख्ये गहनेमालिनाशया ॥१५॥

प्रहिपतनविसंज्ञान्ताम्मृताम्मन्यमाना
प्रतिसखिवदमाना तान्दशामाशुतस्याः

---

प्रवेकश्श्रेष्ठः क्लीबेप्रधानं प्रमुखप्रवेकानुत्तमोत्तमा इत्यमरः चित्तस्य कुत्सिता स्मृतिः कुस्मृतिः कुस्मृतिर्न्निकृतिश्शाठ्यमित्यमरः नेत्रेणकाण एकनेत्र इत्यर्थः येनङ्गऽविकार इति तृतीया अंगशब्द अर्श आद्यजन्तः अंगिविकार इत्यर्थः काणः कणनिमीलने चौरादिकः घञ् स्वभावादयमेकनेत्रनिमीलन वचन इति माधवः अवयवधर्मस्य काणत्वस्य समुदाय आरोपात् पुरुषः काणइति व्यपदिश्यते इति राममिश्राः गुणवचनेभ्योमतुपोलुग्वक्तव्यइतिमतुप् लोपादभेदोपचाराद्वातद्वतिवर्त्तते महीयानतिशयेन महान् भवतितमामतिशयेन भवति तिङश्चेति तमप् किमेत्तिङव्ययेत्यामुः अदृन्धुः कूपः अन्धे विशेषनभिज्ञे ॥ ॥१३॥

**वाणीमित्यादि**—वन्ध्यकोपे तव कोपोमयि विफलइत्यर्थः वेलाकूलं वेलाब्धिजलवर्द्धनेकालेसीम्निचेति वैजयन्तीअपपिपतत्पातितवती अधिकूपंकूपे. ॥१४॥

**नदेत्यादि**—दास्याख्ये कूपइत्यनुषज्यते अत्यन्तकृच्छ्रेअत्रतृतीयोविशेषोलङ्कारः तस्याःपातनेनासंभाव्यस्यात्मपातनस्यापि करणात्. ॥१५॥

**प्रहीत्यादि**—प्रहिः कूपः विसंज्ञां मोहमापन्नां प्रतिसखि सखीं प्रतिसखीं प्रति सर्वास्सखी रित्यर्थः वाश्माया मव्ययीभावः वदमान

प्रमदभरपरीतासामदाध्मचेताः
प्रतिनिलयमयासी दैत्यनीतौ विनीता ॥१६॥

॥ग॥ ततस्तदानीमेवशशिकुलपताकायमानस्सकलजनताकायमानस्सखलु ययातिरखिललोकलोचनासेचनतनुलतोदीयमाननवयौवनोयौवनमनोगतमदविनोदनमनोहरेक्षणोहरेक्षणाऽशुशुक्षणिपतङ्गायितानङ्गप्रत्यापत्तिशङ्कास्यदक्रितात्मावलोकिजनान्तरङ्ग:तरङ्गपेताभोगसुभगचिल्लीवल्लीवशंवदवसुन्धरापतिसमुदयस्समुदयमानमानोद्धतपत्तिनिवहदग्धशत्रुभवनभस्म विसरोद्धलनोर्ध्वतदुष्टग्रहाहितोपद्रवस्तोपद्रव द्विमतजनवनितानयनांभः प्रियंभावुको भावुकावसथ वाहाग्रविधृथ समग्रालावलयो वलयकुण्डल किरीटकटकहारमुखालङ्कारहारिविग्रहोविग्रहाविदग्धविविधयौधसमापूर्यमाणसमर्यादस्समर्यादकार्यधुर्यमहितमहामात्री महामात्रातिमात्र निरुध्य

दीप्यमाना वदन्ती प्रसन्नमुखवर्णा वदन्तीत्यर्थः भासनेतितङ् मदाध्मातचेताः मदापूरितमनाः ध्माशब्दाग्नि संयोगयोः अग्निसंयोगोत्र मुखवायुनाग्निसंयोगः प्रतिनिलयं निलयमभिमुखीकृत्य लक्षणेनेत्यव्ययी भावः दैत्यनीतिः परज्यानिः॥ ॥२६॥

ततस्तदानीमित्यादि—पताकायमानः पताकावदाचरन् अलङ्कारभूतइति यावत् कायमानः गीयमानः कैगैशब्दे आसेचनकमिति तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शना दित्यमरः यौवनं युवत्वं हायनान्तेतिसावेण शब्दप्रवृत्ते निमित्तं भावः यौवनं युवति समूहः भिक्षादिभ्योऽणित्यण् युवते रिहपुंवत्वंवेष्ट ईक्षणाशुशुक्षणिः तृतीयनयनाग्निः प्रत्यापत्तिः प्रत्यागतिः समुदयस्समूहः समुदयमानः वर्द्धमानः दुष्टग्रहाणाम् दुष्टाग्रहाणां पिशाचादीनाञ्च अहितानां शत्रूणां ग्रहितोऽनिष्टश्च तुपद्रवः भस्मोद्धूलनेन पिशाचादीनां मुपद्रवश्शाम्यत्यपि स्फुरति तोपेनहिंसया तुपतुंहिसार्थौ द्रवन्तीनां द्विमतजनवनितानां भावुकावसथेक्षेमावासे वाहाग्रे विग्रहोदेहः युद्धञ्चयोधा एवयौधाः प्रज्ञादित्वा त्स्वार्थेऽण् समापूर्यमाणं पृपालनवूरणयोः समर्यादं समीपं सदेशाम्याश सविधसमर्याद सवेशवदितिसिंहः महामात्राः प्रधानामात्याः हास्तिपकाश्च हास्तिकं हस्तिसमूहः अचित्तेठक् आस्तृत आच्छादितः स्तृञाच्छादनेपौरस्तः पुरस्तात्भवः अव्ययानामिति टिलोपः इत्येव महीनांतापदानां वाञ्छनीतिक्विप्

मानमत्तहास्तिकास्तृतपारस्तभागोवैनतेयइव भृशमहितापदानवान् रामइव पुण्यसेतुप्रवर्तको यक्षाइव धनदानमनाः च्छायेव सूर्यानन्दनैकचेताम नुजशार्दूलश्शार्दूलगणेप्यसद्रूणां विश्वकद्रूणां श्रवणपुटपाटनपटुतरेण रटितेन मुखरितपरिसरैः प्रासिकैर्वतंसितवितंसैर्लुब्धकैरपि सार्द्धम्मृगयालुब्धो नगरान्निरीयजेगीयया मृगराजिं रजयता मृगयुजनेन राजिताभ्यन्तरं वनान्तरमभ्येत्यापि महितसिंहासनमलंकुर्वाणो मृगवर्गमखिलम्मृगम्मृगं पर्यट

---

वाञ्छि इच्छायामिति छ्वोश्शूडनुनासिकोचेतिच्छस्यशः पदत्वेसंयोगान्तलोपः भृशमहितमत्यर्थं महितं अपदानं भृशमहितापदानन्तदस्यास्तीतिमतुप् पुण्यकरः सेतुः पुण्यसेतुः तस्यप्रवर्त्तकः उत्पादयिता पुण्यकर्मणां सेतोः मर्यादायाः प्रवर्त्तकः रक्षकइति यावत् यक्षइव अत्रवचनश्लेषः धनदेआनमनं येषान्ते धनदानेमनोयस्य सच च्छायेव अत्रलिङ्गश्लेषः वाच्याभेदेनाभिन्नायद्युगपत्भाषणस्पृशः श्लिष्यन्ति शब्दाश्लेषोऽसावक्षरादिभिरष्टधावर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदात् । च्छायासूर्यप्रिया सूर्यस्य सूरीणाञ्चानन्दने मनुजशार्दूलः प्रशस्तमनुजः स्युरुत्तरपदेव्याघ्रपुङ्गवर्षभकुञ्जराः सिंहशार्दूलनागाद्याः पुंसिश्रेष्ठार्थवाचकाइत्यमरः शार्दूलगणेपि असद्रूणां सद्रवः अवसादनशीलस्ततोऽन्ये असद्रवः तेषां षद्ल विशारणगत्यवसादनेषु दोर्घडितिरुः विश्वकद्रूणामिति श्वा विश्वकद्रुर्मृगयाकुशलइत्यमरः मृगयाकुशलश्श्वाच विश्वकद्रूरिति स्मृतः इत्यभिधानरत्नमालाच रटितेन शब्देन रटपरिभाषणे. प्रासिकैः प्रासायुधैः प्रहरणमिति ठक्. वतंसितः शेखरीकृतः वितन्यते वक्ष्यादिग्रहणार्थं विस्तीर्यतइति वितंसः वितंसस्तूपकरणबन्धने मृगपक्षिणामिति चाऽमरः लुब्धकैर्मृगयुभिः जेगीयया पौनःपुनिकेन गानेन कै गैशब्दे रजयता रक्तां कुर्वता रञ्जेर्णौमृगरमणउपसंख्यानमिति नलोपः मृगयुजनन पूर्वं प्रविष्टेन सहितानां सिंहानामसनं क्षेपणमलमत्यर्थं कुर्वाणः वनेपि सिंहासनमधितिष्ठन्निति विरोधः मृगम्मृगमन्विष्यान्विष्य. मृगअन्वेषणे चुरादिरदन्तः आभीक्ष्ण्यइति णमुलिति णिलोपः पर्यटवि अटव्यां जन्यया जातया भव्येति निपातः उदन्यया पिपासया अशनायोदन्येत्यादिना पिपासया निपात्यते वनेन जलेन अन्तर्गतं वनान्तर्गतं ततोन्यदवनान्तर्गतन्निर्जलमित्यर्थः अत्र शाब्दो विरोधः तदेव पूर्वप्रस्तुतन्देवमान्याथिष्ठित

वि पर्यटन्मृगयाश्रमजन्ययोदन्यया विमलजलाभिलाषी वनान्तर्गतन्तदे
वोदपानमाकीर्णपर्णचयमयाचक्रे । ॥६॥

ग॥ तदनु मनुजपतिरयमभिलषिततृहाप्रहाणः प्रहीणजले प्रहितले प्रहितलो
चनः कामपि कन्यकां कमनीयरूपां रूपयान्निति निरूपयामास॥ ७

लोलेन्दीवरलोभनीयनयना लोकाभिरामानना
रामा केयमहोदिवोनुपतिता दैवान्नु देवांगना ।
भूदेवी भुवनैकसुन्दरवपुः किन्तिष्टते सुष्ठुमे
किं भूलोकविलोकनातिकुतुकान्नागांगनैवोत्गता ॥१७

इत्थाञ्चिन्ताशबालितमतिर्वाचमूचे तदैनां
पृथ्वीपालः पृथुलनयने कासि किन्नामिकासि ।
को वा तातस्तव निपतिता कूपदेशे कुतोसि.
न्नेवम्पृष्टापुरुषवृषभं वाचमेषा बभाषे ॥१८

मित्यर्थः उदपानं कूपः आकीर्णपर्णचयमिदमतिदूरपतितायाश्चापि गात्रचूर्णनाभावग
र्भितं विशेषणमयाञ्चक्रे प्राप्तवान् दयायासश्चेत्याम· ६

**तदन्वित्यादि**· प्रहाणन्त्यागः प्रहीणजले निर्जले कृत्यचइति णत्वं प्रहित
ले कूपदेशे रूपयन् पश्यन्निरूपयामासेत्यनेकार्थत्वाद्विचारणे. ७

**लोलेत्यादि**· मे तिष्ठते आत्मानं प्रकाश्य तिष्ठतीत्यर्थः श्लाघह्नुङिति सम्प्र
दानसंज्ञा प्रकाशनइति तङ् अत्र तुद्धस्सन्देहालङ्कारः विषयस्य सन्दिह्यमानत्वे सन्देह
विषयः प्रकृतोर्थः यत्र संशयएव पर्यवसानं सन्तुद्धः. १७

**इत्थमित्यादि**· किन्नाम यस्यास्सा किन्नामिका शेषाद्विभाषेति कप् प्रत्यय
स्थ।दितीकारः मन्दाक्रान्ताजलधिषडगैर्भ्मौनतौतो गुरूचेत् . १८

क्ष्रोणीचूडामणेहं समरभुविसुरैर्दानवानां हताना
ञ्जीवातोर्विश्वदीव्यद्यशस उशनसो नन्दनी देवयानी।
दैत्याधीशस्य पुत्र्या प्रसभमभिहता हुन्त शर्मिष्ठयाऽस्मिन्
क्षिप्रं क्षिप्तास्मि कूपे तदिह विधिबलात्प्राणितान्त्रायताम्माम् १९

सुजन्मञ्जन्मना ते किमलन्तिलकितं कुलं।
कस्मै वा कारणायासु वनवाटीषु टीकसे ॥२०

इत्युक्तः प्रत्यवादीदपि ससुवदने संप्रतिष्टो मृगाण।
न्दुष्टानाम्पेष्टकामो विपिनभुवमिमां विष्टपारिष्टदाता।
नाम्ना चाऽहं ययातिर्जगति बहुमते विश्वराजन्यकाना
न्तुङ्गे वंशे सुधांशोरभवमभयदः प्रोन्नये त्वां प्रपन्नां ॥२१

कर्ण्णप्राभृतकीभूत भूपतिव्याहृतिस्ततः।
वाचं व्याचष्ट तुष्टात्मा पुष्टादरमसावमुं २२

**क्षोणीत्यादि.** क्षोणीचूडामणे ! वसुधालङ्कारभूत जीवातोर्जीवनौषधस्य जीवातुर्जीवनौषधमित्यमरः दीव्यत् शोभमानन्नन्दनी पुत्री कृत्यल्युटइति ल्यटोवहुलत्वोक्ते र्नन्दनी रमणी कमनी प्रह्लादनी दरिद्राणइत्यादि कर्त्तरि दैत्याधीशस्य वृषपर्वणः त्राय तां रक्षतु. १६

**सुजन्मन्नित्यादि.** कस्मै कारणाय केन कारणेनेत्यर्थः निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति विहितत्वाच्चतुर्थी टीकसे गच्छसि टीकृगत्यर्थः २०

**इतीत्यादि.** मृगाणामिति जासिनिप्रहणेति षष्ठी अरिष्टदाता क्षेमदः प्रोन्नये प्रोद्धरामि. २१

**कर्णेत्यादि.** प्राभृतमव प्राभृकमुपदां. २२

मम सुचरितपूरैरद्य दृष्टोसि दिष्टया
शशधरकुलमौले पावनोदारकीर्त्ते ।
इतसुपरि न यान्धादार्तबन्धोत्वमन्धो
रितिकृतवचनाऽदादात्महस्तं विहस्ता २३

करग्रहोद्यतमना विपिनेपि तदा नृपः ।
अजायत जगत्यां हि स्वभावः खलु दुस्त्यजः २४

धात्रीवृत्रारिपुस्ततो भृगुसुता मन्हाय गृह्णन् करे
कारुण्यादवशां वशामिव करी वारी परीपातिनीं ।
तां बालामुददीधरद्द्विधुरिता मन्धोरधोमन्थरं
व्यद्धुन्तावदिमां स पञ्चविशिखश्चापच्चशिञ्जाञ्चितं २५

पपात पुनरप्येषा कूपे कामाधिनामके ।
आपदापदमे वा नु बध्नातीति मृषानगीः २६

---

ममेत्यादि अन्धादन्धयतीत्यन्धः अदृश्यतलादित्यर्थः हस्तं विहस्तेति विरोधद्ध्वनिः विहस्ता व्याकुला. २३

करेत्यादि करो बलिः हस्तश्च बलिहस्तांशवःकराइति सिंहः अत्र करेति श्लेषानुगृहीतोर्थान्तरन्यास. २४

धात्रीत्यादि वशाङ्करिणीं वारी गजग्रहणार्थं कृतो गर्त्तस्तस्यां परीपातः वारीपरीपातः सोस्याअस्तीति वारीपरीपातिनी तामुददीधरदुन्नीतवान् व्यद्धुं प्रहर्त्तुं व्यध ताडने तुमुण्वलाविति तुमुन् शिञ्जा मौर्वी अत्र वशामिवेति वाक्यार्थोपमा तदुद्धरणस्य चापोद्धरणस्य च यौगपद्यात्समुच्चयः अनयोः परस्परनिरपेक्षत्वात्संसृष्टिः सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः. २५

पपातेत्यादि कामाधिरिति नाम यस्य सः दुरुत्तरत्वात् कूपसाम्यं सम्पत्संपदमापदामेवानुबध्नातीति कादंबर्यामपि न मृषासत्यैव. २६

ग॥ अनन्तरमनेन ननु भृगुतनये भयं विहाय पितृसमीपमेवोपयातु भव
तीति भाषितैषाविषमविशिखविशिखावेशविवशाशया विशांपतिं प्रति
विशारदां शारदामुदाजहार ॥ ८

पाणिर्मे पार्थिवानां परिबृढ भवता यद्गृहीतस्त्वमस्त्वं
भर्ता नैवाऽत्र कार्याविमतिरयि मतिर्निश्चिनोति ह्यस्मदीया।
गृह्णितान्यखिलोक्यां क इह करमिमन्त्वत्सुनाग्रोपभुक्तं
तन्मांसम्मान्यसद्यः परिणयकृपणत्राणकर्मैव धर्मः २७

आकर्ण्येदं सवर्णे विहित उपयमो नान्यथा युक्तरूपो
भीतोहं भार्गवाच्च प्रचुरतरतपस्तोमविभ्राजितानां।
बिप्राणां विप्रकारः खलु कुलमखिलं क्षिप्रमेव क्षिणाति
प्रत्तां पित्रा भजे त्वामिति मधुरगिरा मानयन्वेगतोगात् २८

---

अनन्तरमित्यादि. भयं विहाय न खलु मया परिरक्षितां भवतीं भूयः को
पि परिबुभूषतीति भावः भयश्चितस्य चलत्वमाहुरनेकधेति भावप्रकाशः विशार
दां सुप्रगल्भां विद्युत्सुप्रगल्भौ विशारदाविल्यमरः. ८

पाणिरित्यादि. निश्चिनोति णिश्चितौ उपभुक्तमुपभोगेनग्रहणं त्यक्ष्यते सम्मा
न्य सद्भिर्मान्य कृपणानान्दीनानान्त्राणकर्म रक्षणं. २७

आकर्ण्येत्यादि. उपयमः विवाहः यमस्समुपनिविषुचेति वा शप् युक्तरूपस्सु
ष्ठुयुक्तः भार्गवात् भीतश्च विप्रकारः निकारः क्षिणाति हिनस्ति क्षिंहिंसायां क्वचित्
ब्रह्मक्षत्रयोरन्योन्यविवाहश्श्रूयते तत्किमयमित्याकारइत्यत्राह प्रत्तामिति दत्तां अचउपस
र्गात्तइति दः मानयन् पूजयन् मानपूजायां. २८

एवं ययातेस्सहसैव यानतो
दैत्येन्द्रजातर्ज्जनचिन्तनादपि
अस्यादधस्तादिह कस्याचित्तरोः
काव्यत्भजा सा भृशकातराशया २९

जनोयम्माजीवन्नहहदनुजाधीशतनया
प्रभूताधिक्षेपप्रभवपरितापातुरमतिः ।
वितन्वानाश्चिन्ताम्मुहुरिति दुरन्तामथ रया
दयासीद्दासी तां भृगुपतिनिदेशेन विवशा ३०

ग॥ तदनु तदुदीरितञ्जवेन वनादायातत्वमिति तातवचनमाकर्ण्य द्विगु णोदीर्णशोकया तया काव्यकन्यकया ननु दूतिघूर्णिके निष्ठुराधिया

---

**एवमित्यादि.** तर्जनं भत्सनमस्थान् स्थितवती इह वने तत्रावस्थितायास्त स्यास्स्वनिलयप्राप्तेर्न्निदानमाह जनइत्यादि माजीवन्म्रियता माङ्याक्रोशइति शता अहहे त्यद्भुतेखेदइत्यमरः दुरन्तान्दुष्टः दुःखरूपोन्तोयस्यास्तां. २६

**तदान्वित्यादि.** ननु हेदूति घूर्णिकेति तस्यानाम आर्या किञ्चिदपि नापराधि कारिणीति भावः आर्यहलं हठात् बलात् प्रसह्यार्यहलं हठे न्यपातिषि निपातितास्मि इतः कक्षादस्माद्वनाद्विविक्षामि प्रवेष्टुमिच्छामि. ३०

**तदन्वित्यादि.** अरुन्तुदम्मर्मस्पृक् विद्ध्वरुषोस्तुदइति खश् अरुर्द्विषदिति मुं उदीर्णेन प्रवृद्धेन मन्युना क्रोधेन सा एव तादृक् तत्तादृक् ताश्चिकर्त्तिषञ्छेत्तुमिच्छन् कती च्छेदने सनन्तात् शता आसनोत्थायमानात्त्वरितमुत्थाय अपादानपरीप्सायामिति णमुल् परीप्सा त्वरा समीय प्राप्य ई गतौ संक्षुब्दश्चलितं मन्थो मन्थनदण्डस्यात्सक्तवोप। द्रवीकृतास्तद्वाची क्षुब्दशब्दोयन्तयोश्च चलितत्वतश्चलितेष्वपि सर्वेषु प्रयोगोस्योपचारत इति सर्वस्वे दन्दशूकीं सर्पस्त्रियं क्रोडीकृतस्स्वीकृतः बाष्पधाराएव पाशास्तैः करणैः पयो

शर्मिष्ठयार्य्याहमार्यहलममिहत्यहन्तास्मिन्नन्धकूपे न्यपातिषि तत् । कक्षादितस्तदधिष्ठीयमानमधिष्ठानन्नविविक्षामिति कथिता व्यथिता सा सपदि सितोपशल्यमुपगम्य सुतोदितमेतस्मै निवेदयति स्म॥ तदनु घूर्णिकानुवर्णितं कर्णारुन्तुदमिदमात्मजोदन्तमाकर्ण्य तूर्णोदीर्ण मन्युघूर्णमानमानसोयमुशनास्तत्तादृशन्तदार्तिमाशु चिकर्तिषन्नासनो त्थायमदसीयं समीपं समीय वर्षातरंगिणीमिव संक्षुब्धान्तरंगां दण्डा हतान्दन्दशूकीमिव शूत्कारोत्गारिणीं शस्त्रविद्धां क्रोडवधूमिव क्रोडी कृतक्रोधभारां निरन्तरनिरीयमाणनयनजलधारापाशैः पयोधरविराचि ताकर्षणादिव नितरामवनतन्निजहृदयजाज्वल्यमानशोकानलकाला वलीविलेहनादिव परिम्लानम्मुखाम्बुजं करांबुजे विनिवेशयन्तीन्निशा म्य भृशमाम्रेडितमन्युरपि निजान्तेवासिगतानन्तहार्दक्रान्तान्तरङ्गन याङ्गीकृतधृतिस्सत्वरन्नयनोदरावित्स्वरीमश्रुधारां कराग्रेण परिमार्जय न्नात्मजान्निजान्निजगाद ॥ ९

न खलु न खलु वत्से शोकमेवं भज त्व
न्नियतमुचितमेतत् साध्वि मन्दात्मनां हि ।
स्मरपरमभिभूतावापदां सम्पदां वा
विकृतिमिह न लोके हन्त सन्तो भजन्ते ३१

---

धराभ्यां कर्तृभ्यां विरचितादाकर्षणादिवावनतमेतद्वदनांबुजामित्युपमायास्साधकं परिम्लानं परितः म्लानं ग्लै म्लै हर्षक्षये करांबुजे विनिवेशयन्ती मिति पीडातिशयो व्यज्यते निशाम्य दृष्ट्वा निशामयति यश्यार्थे श्रुतौ ह्रस्वविधिर्मतइति क्रियानिखण्डुः विसृत्वरीं विसरणशीलां इण्नशीति क्वरप् आस्रधारामश्रुधारां अस्त्रमास्त्रश्चपुल्लिङ्गौ क्लेशे क्री रुधिरे श्रुणीति वैजयन्ती परिमार्जयन् शोधयन् मृजुशुद्धौ चौरादिकः. ६

**नखल्वित्यादि**. मन्दात्मनामूढहृदयानां हि प्रसिद्धौ परमत्यर्थमभिभूताव भिभवे.

दूरीकुरु सुते रोषमूरीकुरु च सम्पदम्

दृष्टहेतुरियन्नूनं शर्मिष्ठादिष्टगृह्यका ३२

स्वकर्मणैवायमुदारशुभ्रे

शुभाशुभे विन्दति विश्वलोकः

पुरश्चत्कृतानां बत दुष्कृतानां

कालेन बाले फलमद्यजातम् ३३

प्रोद्यन्तं क्रोधवह्निं जगति विनयते यः क्षणेनोक्षणेन

क्षान्त्यंबूनान्नियन्ता तुरगवरमिव प्रग्रहेणोग्रवेगम्।

सोयन्धीरस्सहीरो बुधमकुटगतस्सैव मान्यस्सधन्यो

मुञ्चेमाञ्चारुशीले तदिह रुषमहिर्जीर्णचर्मेव तूर्णम् ३४

---

दूरीकुर्वित्यादि. रोषं शर्मिष्ठाविषयमूरीकुरु आङ्गीकुरुष्व च कथमेवंविध विकारकारिण्यां रुषन्त्यजामीत्यत्राह दुष्टहेतुरित्यादि सा शर्मिष्ठा दृष्टहेतुर्दृष्टकारणमेव दिष्टगृह्यका दैवाधीना अधीनो निघ्नआयत्तो स्वच्छन्दो गृह्यकोऽप्यसावितिसिंहः उदीचामातस्थाबद्धतीत्वप्रतिषेधविकल्पः दैवप्रेरणयैवैतदनया कृतामिति भावः किं पुनस्सा क्षात्कारणमित्याह. ३२

स्वकर्मणेत्यादि. विन्दति लभते विदिॢलाभे कालेन कालपरिपाकेन पूर्वंल वस्तुतो विषयभावात्क्षं कोपस्त्याज्यइत्युक्तेपि तामनवगतरोषामालोक्य पुनः क्षमाबलेन जहिहीत्याह. ३३

प्रोद्यन्तमित्यादि. उत्गच्छन्तं क्रोधवह्निं विनयते कर्तृस्थेचाऽशरीरइति तङ् उक्षणेन सेचनेन क्षान्त्यंबूनामिति कर्मणि षष्ठी क्षणेन कार्यकरणात् प्रागेव प्रग्रहोश्वादि रश्मिः रश्मौचेति विभाषाप् तुलासूत्रेऽश्वादिरश्मौ ष्प्राहः प्रग्रहोपिचेत्यमरः दधाति प्रज्ञ या सर्वमिति धीरः हीरो वज्रमणिस्सैव सएव सोचिलोपेचेदिति सुलोपः चारुशीलेइति विधिगर्भमामन्त्रणं चारुशीलया भवितव्यमिति भावः अत्र रोषस्य जीर्णचर्मोपमानत्वेन यथावत्पश्यतामिति जुगुप्सितत्वन्द्योत्यते एवं क्षमैव कार्येत्युपपाद्य सा पुनर्बन्धुष्ववश्यङ्का र्येत्याभिप्रेत्याह. ३४

न कोप्यार्यः कुप्येदयि सुहृदये हन्त सुहृदे
तदेतस्माद्वत्से विरम पुषितादाशुरुषितात् ।
न सा वाणी वेणी पुनरफलदेणीदृशि तदा
विसृष्टे वादिष्टे महितधरणौ बीजवितति: ३५

ततो रोषादेषा कलुषहृदयोवाच वचनम्
यदद्याऽनिन्दीन्मान्दनुजदुहिता हन्त बहुधा ।
तदन्तश्शल्यम्मे किमिव फलमेतैः प्रलपितैः
जनः को वा लोके हहह सहते दुष्परिभवम् ३६

शनैस्तु शस्त्रेण कृतं प्ररोहति
व्रणं वनं वाऽपि कुठारपाटितम्।
प्ररोहति श्रोत्रकठोर वाक्क्षतं
महामते नो महसाऽप्यनेहसा ॥ ३७

नैवास्मादसुरस्य कुत्सितमतेरस्य प्रवित्से गृहं
पापिष्ठैस्सह तिष्ठतान्ननु रतिर्वर्वर्ति दुर्वर्त्मनि ।

---

नेत्यादि. कोपि कश्चनापि जातु कस्यामप्यवस्थायां सुहृदइति क्रुधद्रुहेति सम्प्रदानसंज्ञा एतस्मात् बन्धुविषयात् पुषितात्प्रवृद्धात् रुषिताद्रोषात् जुगुप्सा विरामेत्यपादानसंज्ञा रुष्यमत्वरेति इड्विकल्पः तीषसहेति विकल्पविधानाद्यस्य विभाषेति प्रतिषेधे प्राप्ते वचनमिदं अदिष्टे अकाले नाऽकालतो यौवनमभ्युपैति नाऽकालतोरोहति बीजमुप्तमिति श्रीमहाभारते. ३५

ततइत्यादि, अनिन्दीन्निन्दितवती हहहइति खेदे हहहेत्यद्भुते खेदइत्यमरः दुष्टः अतिकुत्सितः परिभवो दुष्परिभवः. ३६

शनैरित्यादि. वाग्भिः कृतं क्षतं वाक्क्षतं तृतीयातत्कृतार्थेति समासः महसाऽप्यनेहसा बहुकालेनाऽपि. ३७

नैवेत्यादि. अस्माद्भवनात् प्रवित्से गन्तुमिच्छामि सन् वदगतौ दिवादिरनुदात्ते

प्रत्युक्तस्सुतयेति दैत्यपतये चुक्रोध शुक्रोऽधिकं
शीतस्याऽपि हि पाथसश्शिखिशिखा पुष्णात्यतीवोष्णतां ॥ ३८

ग॥ ततश्च भर्गदेश्यो भार्गवोऽसौ निष्प्रतिघातनिष्पद्यमानप्रतिघभरसमाक्रान्तस्वान्ततया प्रकटांघ्रिविक्षेपश्शीघ्रमसुरपरिषत्परिवृढोपकण्ठमाढौकमानो भङ्गाकटभङ्गदपिङ्गतासंगतैः परागपरिषङ्गपिङ्गलेङ्गद्भृङ्गभङ्गिसाङ्गैरतिभङ्गुरैरीक्षितैर्मङ्क्षुधक्ष्यन्निवाक्षीणरौक्ष्यां गिरमस्राक्षीत्॥ १०

धिक्पुत्रीं प्रेमपात्रीं तव शठहृदयां धिक्त्वचो धिक्कृतास्मा
न्मत्वा स्मान्यातृणाय प्रसभमिह तनूजां प्रहौ प्राहिणोन्नः ।

---

त् सनिमीमेतीस् अभ्यासलोपश्च पापिष्ठैरतिशयेन पापैः अतिशायनइतीष्ठन् वर्वर्त्ति अत्यर्थंवर्त्तते वृतुवर्त्तने यङ्लुक् दैत्यपतये इति क्रुधद्रुहेति संम्प्रदानसंज्ञा पाथसः जलस्य अत्र दृष्टान्तोलङ्कारः. ३८

**ततइत्यादि.** भर्गदेश्यः प्रायेण शर्वतुल्यः ईषदसमाताविति देश्यः निष्प्रतिघातमप्रतिबन्धं यथा तथा प्रतिघो रोषः पराघइत्यत्न बाहुल्कात् प्रतिघः आढौकमानः गच्छन् ढौकृगत्यर्थः भङ्गाकटः भङ्गारजः भंगाकुसुंभमलावूतिलोमाभङ्गाभ्योरजस्युपसंख्यानमिति कटच् इङ्गश्चलश्चरिष्णुर्जंगमचरत्नसामिंगश्चराचरमिति सिंहः धक्ष्यन्दग्धुमारब्धं दहभस्मीकरणे लृटस्सद्वेति शता अस्राक्षीत्सृष्टवान् सृजविसर्गे सृजिदृशोरित्यमागमः. १०

**धिगित्यादि.** ते पुत्रीन्धिक् पुत्री नितरान्निन्दितेत्यर्थः उभसर्वेति दिग्योगे द्वितीया धिक्कृतावयं यैस्तान्धिक्कृतास्मान् वश्च धिग्यूयञ्च निन्दिता उभयत्राऽपि हेतुमाह मत्वेत्यादिनः तृणायमत्वा अनादृत्य मन्यकर्मणीति चतुर्थी इहचाऽनुपाये कर्मण्यस्मानित्यादौ व्यवस्थिताविभाषाविज्ञानान्न चतुर्थीति माधव; अहहइति खेदे निपाठिति पठितवानिति यावत् निपाठितमनेनेति विगृह्य इष्टादिभ्यश्चेतीनिः तीर्थैशास्त्रेक्तस्येन्विषयस्य कर्मण्युपसंख्यानमिति सप्तमी सतीर्थ्यः एकस्मिन् गुरौ वासी समानतीर्थेवासीति यन् तीर्थम्मन्त्राद्युपाध्यायशास्त्रेष्वंभसि पावने पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोरिति वैजयन्ती भूयोभूयोपि बहुकृत्वः नीतः प्रापितः चरितः आचरितः विविधः धर्मो येन सश्च

यैर्वा दुर्वारगर्वैरहहनिपठिती सर्वतीर्थे सतीत्थ्यों
भूयोपि भूयोपि नीतश्चरितविहितधर्मः कचः कालधर्म्मं॥ ३९

नित्यं सत्यापयन्त्यां मम तु दुहितरि स्थायुकायाममुत्र
स्थानीये स्थातुमीशे नियतमयसहस्रान्यथा दैत्यनाथ।
स्मृत्यर्थेऽल्पत्थसाध्वीं श्रुतिमिव सहसाऽन्वेमि तन्वीन्तदेनां
शर्मिष्ठां श्लाघमानास्थितिमिह तनुयामंक्षुभोभोनिनंक्षो ॥ ४०

ग॥ तदनु तनुजवरहृदयं शर्मिष्ठादुष्टकर्मणातिऽरुष्टस्य देवयानीगुरोर्गि
राम्मर्मविदाञ्चक्रेण बेभिदाञ्चक्रे॥ ११

स्तंभयञ्जृंभितं शोकं स्तंभदंभोज्झितोयसः।
गिरमुत्गमयामास भार्गवं प्रति गत्गदां॥ ४१

---

रितविहितधर्मः अत्र केवलत्वाभावादानिजभावः कालधर्मम्मृतिं स्यात् पञ्चताकालधर्म इत्यमरः. ३९

**नित्यमित्यादि.** सत्यापयन्त्यां सत्यमाचक्षाणायां सत्यापपाशेति णिच् अर्थ वेदसत्यानामापुग्वक्तव्यइत्यापुक् स्थायुकायां स्थितिशीलायां लषपतेत्युकञ् स्थायुकः पुनस्स्यात् ग्रामाधिकृते स्थात्नाविति केशवः स्थानीये गृहे ईशे शक्तोभवामि याज्ञवल्क्य मनुव्यासादिप्रणीतानि वर्णाश्रमधर्मशास्त्राणि स्मृतयस्सर्गादावपि नक्रियते लिख्यते च केवलं गुरुमुखाच्छ्रूयतइतिश्रुतिः तन्वीन्त्वत्सुताधिक्षेपादिना क्षीणामेतच्छ्रुतावपि यो-ज्यं मितगिरमित्यर्थः ज्ञीप्स्यमानत्वाभावाचशर्मिष्ठामिति द्वितीया मङ्क्षु शीघ्रं निनंक्षो नाशेच्छो णश् अदर्शने सनन्तादुः. ४०

**तदन्वित्यादि.** चक्रेण समूहेन बेभिदाञ्चक्रे अत्यर्थं विद्यते स्म भिदिर्विदारणे यङ्लुगन्तात् कर्मणि लिट्. ११

**स्तंभयन्नित्यादि.** विवेकादिनेति शेषः उपगमयामास उदीरयामास. ४१

दयालवो हे गुरवो विधेयो
दयालवो मय्यधिकं विधेये ।
ईर्ष्या न जूष्या च सदा गुरूणां
मृष्या हि शिष्या चरितापराधा ॥ ४२

भक्तं शिष्यं भुजिष्यं प्रणतमधिपदं पाहि पाहि प्रभो मां
पुत्रीन्ते प्रीतिदात्रीं सविधमुपनयामीत्युदीर्य्याऽत्युदारं ।
सोगाद्वेगादगारात्प्रियकृदिह गुरोर्मानिनीयस्य वैरी
देवानान्देवयानीं श्रितगहनवनीम्मानिनीमानिनीषुः ॥ ४३

ग॥ अनन्तरममरान्द्विषन् सुरवृषवर्द्धनैकलोलोऽप्यसुरवृषवर्द्धनेकलोलः गुरुद्वेषवानपि गुरुभक्तिमान् निजतनयानीयमानमानहानिमेनान्देवयानीमनलशिखामिव सन्तायमानसन्तापां क्षमाविष्टामप्यक्षमाविष्टामुद्दामशोकभारोद्वहनाक्षमतयेवाक्षीणनिष्यन्दमानाऽस्रुबिन्दुसन्दोह

---

**दयालवइत्यादि.** हे दयाशीलाः स्पृहिगृहीत्यालुच् विधेयः कार्यः व्याङ्भ्यामुपसृष्टो दधातिः करणे वर्तते दयायालवो लेशः जुष्या सेव्या जुषी प्रीतिसेवनयोः एतिस्तुशास्विति क्यप् गुरूणां कृत्यानामिति कर्तरि षष्ठी मृष्यास्सोढव्याः ऋदुपधादिति क्यप् अपराधानत्वेकः. ४२

**भक्तमित्यादि.** भुजिष्यंङ्किङ्करन्त्वदादिष्टं सर्वं करोमीति भावः अत्युदारः अतिमहान् सोगात् नकञ्चन प्रजिधाय अत्र हेतुर्मानिनीमिति आनिनीषुः आनेतुमिच्छुः. ४३

**अनन्तरमित्यादि.** अमरान्द्विषद्देवशत्रुः द्विषश्शतुर्वावचनमिति षष्ठीनिषेधविकल्पः सुरवृषस्य देवश्रेष्ठस्य वर्द्धनञ्छेदनं वर्द्धच्छेदनपूरणयोः असुरवृषस्य आसुरधर्मस्य गुरुबृहस्पतिराचार्यश्च एतानि विशेषणानि देवयान्यानयनार्थं प्रस्थानस्य हेतुतयोक्तानि सन्तायमानः वर्द्धमानः तायु सन्तानपालनयोः सन्तानः प्रबन्धः सन्तापऔष्ण्यमन्तस्तापश्च क्षमाविष्टां भूमावेव निवसन्तीमक्षमया ईर्ष्यया पराभ्युदयासहिष्णुतया आविष्टाञ्च खिन्दानं खिद दैन्ये साष्टाङ्गपातं श्लो. पद्भ्यामिव च जानुभ्यां बाहुभ्यामुरसा दृशा शिर

खिन्दानं वदनारविन्दमवनमयन्तीमसावासाद्य सद्यस्तस्यारुष्टचेतसः साष्टाङ्गपातं पादयोः पतित्वा क्रोधहार इति व्याजहार. १२

कोपानलन्तं शमयोज्वलन्तं
चंक्षम्यताम्मंक्षु च मन्तुरेषः
सतां पुनस्साध्वितरे समेषां
क्षमा किलाहो कुलसंप्रदायः ॥ ४४

अक्षीणमाधिं क्षपय क्षणेन
भद्रे प्रपद्यस्व मयि प्रसादं ।
गुरुप्रमोदाय परं गुरूणां
बालस्य दुष्टान्यपि चेष्टितानि ॥ ४५

---

सा मनसा वाचा प्रणामोष्टाङ्गईरितः क्रोधहार क्रोधं हर्तुं अण्कर्मणि चेति भविष्यति क्रियार्थायां क्रियायामुपपदेण् . १२

**कोपेत्यादि.** उज्वलन्तमुद्दीप्यमानन्नयनरक्तिमादिभिर्बहिःप्रकाशमानं ज्वल दीप्तौ परस्मैभाषः उल्फलता प्राप्तोयम्मम कोपः कथं शममुपयायादित्यत्राह च क्षम्यत मिति अत्यर्थं सह्यतां यङन्तात् कर्मणि लोट् मन्तुरपराधः आगोपराधो मन्तुश्चेत्यमरः क्षमा तु त्वयि संभाव्यतएवेत्याह सतां पुनरिति साद्ध्वितरे ! अतिशयेन साद्ध्वि घरूपकल्पेति ङीषो ह्रस्वः समेषां सर्वेषां समशब्दस्य सर्वशब्दपर्यायस्यैव सर्वनामसंज्ञेत्यत इति सर्वनामत्वात्सर्वनाम्नस्सुडिति सुट् आधौ सति कथं क्षमास्यादित्यत्राह. ४४

**अक्षीणमित्यादि** क्षपय नाशय क्षैजैषैक्षयइत्यस्माण्णिचि अर्तिह्रीति पुकि लोट् अस्य दलि वलि स्खलि त्रपि क्षपयश्चेति भोजा क्त्या मित्वात् मितां ह्रस्वइति ह्रस्वः ईदृशमाधिं कथं क्षपयेयमित्यत्राह भद्रेइति दुस्सहतरापकारिणि कथं प्रसीदेयमित्यत्राह गुरुप्रमोदायेति परं केवलं एवं बहुप्रकारेणोक्तेपि कोपशोकावशान्तावालक्ष्य पुनरपि तन्निरासोपायं प्रकारान्तरेणाह श्लोकद्वयेन. ४५

प्रश्रितं परिपाहि त्वं संश्रितन्त्वामिमञ्जनं ।
पादपातावधिक्रोधो महतां हि महानपि ॥ ४६

रुदां परित्यज्य मुदां गृहाण
विदां कुरु त्वं हि विदां पुरोगे ।
अनिष्टमिष्टञ्च विधातुमीष्टे
दिष्टं विशिष्टं खलु विष्टपेस्मिन् ॥ ४७

कान्तारतो घोरत रक्षुरक्षो
वृतात्पुरीम्मेऽनुजिघृक्षया त्वं
साधीयसीं साधय साध्वि साधु-
स्साधौ जने साधुतरानुकम्पः ॥ ४८

भृगूत्भवे पुत्र भुजिष्य भार्या
राज्यं विशालं विविधञ्च वित्तं ।

---

**प्रश्रितमित्यादि.** संश्रितस्त्वं येन ससंश्रितत्वंतं. ४६

**रुदामित्यादि.** विदाङ्कुरु विद्धि त्वमेव बुद्ध्या विमृशेति भावः विदां विदुषीणां वेत्तीति वित् क्विप्चेति क्विप् ईष्टे ईशो भवति ईश ऐश्वर्ये लट् दिष्टं दैवं एवं बहुविधैरप्यनुनयवचनैस्तान्तदवस्थामेवालक्ष्य वनात् पुरीगमनानुवादोपि मम परमानुग्रहइति मन्यमान आह. ४७

**कान्तारतइति.** घोरतररक्षोवृतादित्यनेन तवाऽत्रावस्थितिर्ममात्यन्तपीडवाहेति प्रकाश्यते अनुजिघृक्षया अनुग्रहीतुमिच्छया साध्वीमसीमातिशयेन साद्ध्वीं साधय व्रज साधौ समनःपिंडे साधुस्साधाविति साधूनां हि महत्तराधियुक्तेषु अगणितनिखिलपराधन्दया समुत्पद्यतइत्यर्थः अतो भवत्या मय्यनुजिघृक्षा स्यादेवेति भावः अनन्तरमुपायान्तरमन्तरजानन् सर्वस्वसमर्पणेनाप्येनां प्रसाद्य नगरीन्नेष्यामीति निश्चित्याह. ४८

**भृगुत्यवइत्यादि.** भुजिष्याः किङ्कराः नियोज्यकिङ्करप्रेष्यभुजिष्यपारि

यदस्ति चान्यन्मम वस्तुजातं
तवाद्य कृत्स्नं विदधे विधेयम् ॥ ४९

श्रुत्वाथ तद्वाचमुवाच बालिका
सर्वन्त्वदीयन्तु मदीयमेवचेत् ।
दासीसहस्रेण युता सुतैव ते
दासीवदासीत सदा मदालये ॥ ५०

ग॥ अनन्तरमात्मतनयातार्ज्जितेन जर्ज्जिरितमतेरूर्ज्जस्वती सुताया ऊर्जस्वतीं सरस्वतीं दुश्रवामुपश्रुत्य कष्टमद्य दिष्टबलादखिलजनमान्या ममापि कन्या देवयान्या भुजिष्यतां भजिष्यत इति भृशदुर्मनायमानोपि भृगुपतेर्भीरुरमरवैरिवीरोऽसावस्मत्कुलगुरुं प्रतायमानगुरुतरक्रोधं प्रसादयितुन्देवयान्याः प्रपन्नविपिनावन्या दासीभावमासीदेति दितिकुलशर्मनिष्ठां शर्मिष्ठां शंसेति संगतिकानामसंगतां सन्देशहरां सपदि सान्दिदेश ॥ १३

---

तारकाइत्यमरः. कृत्नं सकलं कृत्यते व्याप्यते स्थानादिकमनेनेति कृत्स्नं कृती वेष्टनो विदधे करोमि विधेयं सत्यं ब्रूहीत्यादिवचनैराचार्येण विधातव्यत्वाद्विधेयमत्वधीनमात्रवचनं. ४९

श्रुत्वेत्यादि बालिका राजकन्यायास्तस्यादासीत्वापादनत्र स्वन्तं स्यादि त्यजानती आसीत अस उपवेशने स्यादिन्द्रवंशाततजैरसंयुतैः. ५०

अनन्तरमित्यादि. ऊर्जस्वतीं शक्तिमतीन्दुश्रवान्दुःखेन श्रूयतइति दुश्रवा ईषद्दुस्सुष्विति खल् भजिष्यते प्राप्स्यति दुर्मनायमानः दुर्मनाभवन् भृशादित्वात् क्यङ् भीरुः भियः कुक्लुकनाविति क्रुः प्रतायमानः वर्द्धमानः दितिकुलशर्मनिष्ठामत्र तस्यावैसुख्यन्नस्यादिति भाव :सङ्गतिका नाम संगतां संगतिकानामधेययुक्तां सन्देशहरान्दूती. १३

निजस्वामिनियोगेन ततस्सा दूतिका जवात् ।
सदेशं वार्षपर्वण्या विवेश विवशाशया ॥ ५१

आयान्तीन्दूतिकान्तान्द्रुतमतिविधुरान्दूरतोरूपयन्ती
यान्ती संभ्रान्तिमन्तस्स्वपितुरथ ततस्तावदाज्ञाय चाज्ञां ।
शर्मिष्ठा शर्मनिर्मान्त्यखिलदनुभुवा मूढदासीसहस्रा
सास्रायास्सा पदान्ते सपदि समपतद्देवयान्यास्समन्यो:॥ ५२

अवददियमथैना मेतदेनो हि मृष्यं
रुषितपरुषितास्ये दास्यमेषा विधास्ये ।
ननु तव विनता सा दैवतो दुर्न्निवारा
दतिचिरमयि भद्रे हन्त कद्राः पुरेव ॥ ५३

मानिनी देवयानी सा श्रुत्वा दैत्यसुतोदितं ।
बभाषे परुषन्तस्यास्स्मरन्ती पूर्वदुर्वचः ॥ ५४

स्तोतुर्ग्रहीतुः कुमतोर्द्विजस्य
पुत्र्याः कथं प्राप्स्यसि दास्यमस्याः ।
स्तुत्यस्य दातुर्विमलाशयस्य
दैतेयनेतुर्दुहिता हितात्वं ॥ ५५

---

**निजेत्त्यादि**· सदेशं सविधं वार्षपर्वण्याश्शार्मिष्ठायाः. ५१

**आयान्तीमित्यादि**· रूपयन्ती पश्यन्ती निर्मान्ती निर्मातुमित्यर्थः ५२

**अवददित्यादि**· मृष्यं सह्यं ऋदुपधादिति क्यप् रुषितं रोषः नपुंसके भावे क्तः एषा एतत्कालविशिष्टा एतस्मिन् क्षणएवेत्यर्थः कृततदुचितसन्नाहेति यावत्. ५३

**मानिनीत्यादि**· तदानीमपि मानस्यानवगमः प्रकाश्यते उदितवचनं. ५४

**स्तोतुरित्यादि**· स्तवनं कुर्वतः ष्टुञ् स्तुतौ ग्रहीतुः प्रतिग्रहीतुः. ५५

नवक्षतपतत्क्षार सदृक्षसकलाक्षरां ।
आकर्ण्य ब्राम्हणी वाणीमराणीदसुरायणी ॥ ५६

बन्धूनामाधिसिन्धौ महति निपततां कार्यमार्ये जवेन
श्रेयश्श्रेयोभिकामैरिह जगति जनैस्सर्वदा सर्वथापि ।
दास्येतत्सर्वहास्येप्ययि तव निरता नित्यमुत्सेकहीना
वत्स्यामि त्वत्सकाशे मम खलु निखिलं स्वामिनि त्वद्विधेयम् ५७

नित्याभियुक्तः प्रियमेव ते जनः
सर्वात्मनाप्येष वशीकरीष्यते ।
सत्यापयाम्येव भवादृशे जने
कोवाऽन्यथा कर्तुमिहाभिवाञ्छति ॥ ५८

शर्मिष्ठावचनैरुदारमधुरैस्सन्तापसर्वंकषै
रेवन्तां शिशिरीचकार चतुरा तातप्यमानं शुचा ।

---

**नवेत्यादि.** ब्राह्मणीत्यनेन वाण्यास्तीक्ष्णत्वं प्रकाश्यते नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निहितस्तीक्ष्णधाराः विपरीतमुभयं क्षत्रियस्य वाङ्नवनीतं हृदयन्तीक्ष्णधारमिति महाभारतोक्तेर्यद्वा ऋजुत्वादाक्षिण्याभावः प्रकाश्यते अराणीदुक्तवती अण रण वण भण मण कण क्वण व्रण भ्रण शब्दार्थाः आसुरायणी असुरपुत्री कौरव्यमाण्डूकाभ्याञ्चेत्यत्र चकारादासुरेश्च ष्फः भस्यायनादेशष्फत्वाङीष् असुरस्यापत्यमासुरिस्तत स्त्रियामासुरायणिः. ५६

**बन्धूनामित्यादि.** उत्सेको गर्वः. ५७

**नित्येत्यादि.** अयञ्जनस्सर्वात्मनापि ते प्रियङ्करिष्यतइति वाच्योर्थः वशीत्यनेन प्रियकरणे पीडाभावः अत्रशब्दशक्त्या ते प्रियं भर्त्तारमेव वशीकरिष्यतइति ध्वन्यते सत्यापयाम्येव सत्यमेवाचक्षे सत्यापेति णिच् . ५८

**शर्मिष्ठेत्यादि.** सर्वंकषती हिनस्तीति सर्वंकषः कष खष शिष जष झष

अत्यन्तातपतापितान्नवलतां यद्वत्तुषारैरपा
मासारैरविलंबमम्बरतलव्यालंबिकादंबिनी ॥ ५९

तनयां सुनयामेनान्निजादेशवशंवदां ।
निशाम्याथ व्यथापेताम्मुमुदे दनुजेश्वरः ॥ ६०

सेयन्दासीममासीदिति दनुजवरो मोदिनीन्देवयानी
मग्रे कृत्वाथ गत्वा व्यधितभृगुपतेरस्य पादे नमस्यां ।
सोऽप्येनन्दानवानामधिपतिमधिकम्मानयन् नूनशोको
वास्तव्यस्तत्र वत्स्ये दनुजहितरतोऽरं रमीति स्मरम्ये ६१

भूयोप्यनेहसि गतेथ भृगोस्तनूजा
प्रष्यापरीतवृषपर्वसुतानुयाता ।

शष वष मष रुष रिष हिंसार्थाः दण्डकधातुः सर्वकूलेति खश् अरुर्द्विषदिति मुं तातप्य मानामत्यर्थन्तापयुक्तां यद्वद्यथा तुषारैश्शीतलैरासारो वेगवान् वर्षः कादंबिनी मेघसंहतिः कादंबिनी मेघमालेत्यमरः. ५९

**तनयामित्यादि**. सुनयां शोभननीतियुक्तां गुरोश्शापादखिलमपि कुलन्नश्ये दिति दास्यमङ्गीकृतवतीति भावः. ६०

**सेयमित्यादि**. मोदिनीम्मोदवतीन्नमस्यां नमोवरिवइति क्यच् नमसः पूजा यां वास्तव्यः वसन् वसेस्तव्यत्कर्तरि णिच्चइति तव्यत् वस्त्यंभ्भवनं धिष्ण्यन्धामनिकेतन ञ्चसदनंवस्त्यञ्चवास्तुक्षयइति हलायुधः अरं रमिति स्म अत्यर्थं रेमे रमुक्रीडायां यङ्लुक् अथ विवाहसंघटनार्थन्द्वारमुत्घाटयति. ६१

**भूयइत्यादि**. बहुतरे प्रक्रीडिता क्रीडितुमारब्धा आदिकर्मणिक्तइति कर्तरि क्तः स्वैरं स्वच्छन्दं स्वबुद्ध्यनुसारणे ईरते गच्छतीति स्वैरः ईर गतौ पचाद्यच् स्वादीरे

प्रक्रीडिता प्रमदभारभृतान्तरंगा
स्वैरं व्यगाहत तदेव वनं कदाचित् ॥ ६२

स्वादं स्वादं फलमुपहृतं बालिका बालसालात्
पायं पायं शिशिरसुरभि स्वादुतोयं समोदं ।
वेशं वेशं बहलभसलम्मंजुलं कुञ्जगेहम्
गायं गायं मधुरमधुरन्ताभिरेषाभिरेमे ॥ ६३

तदेह स महीपालो ययातिरुपयातवान् ।
उदन्ययोऽदकान्वेषी मृगया या स जन्यया ॥ ६४

ग॥ तदनु मनुजपुङ्गवो यम्मंगलांगभंगिभाजनानाभिंगभृंगपोतसुन्दरापां गानामंगमेजयरुचिरगांगेयालंकारहारिणीनां मधुरतरहेलानां मध्ये महेलानामरं भासमानां रंभासमानां तारकानिकरान्तरे चन्द्रलेखामिव सान्द्रलावण्यामृतवर्षिणीं वार्षपर्वणीन्निखिलवरवर्णिनीवरान्निर्वर्ण्य

---

रिणोर्वृद्धिर्वक्तव्या मनस्वच्शन्दयोस्स्वैरमिति सिंहः व्यगाहत प्रविष्टा गाहू विलोडने तदेव यत्र प्राग्ययातिना कूपादुद्धृताभूत . ६२

**स्वादमित्यादि**. स्वादं स्वादमित्यादिषु चतुर्षु आभीक्ष्ण्येणमुल्चेति णमुल् आभीक्ष्ण्यं पौनःपुन्यं ब्रहळभसळं बहुलभ्रमरं अलिर्द्विरेफो लोलंबो भसळः पुष्पलोलुपइत्यभिधानरत्नमाला. ६३

**तदेत्यादि**. उदन्यया पिपासया अशनायोदन्येति निपातः जन्यया उत्पन्नया. ६४

**तदन्वित्यादि**. इङ्गश्चलः अङ्गमेजयति राजयते इत्यङ्गमेजयः एजृ भ्रेजृ भ्राजृ दीप्तौ एजेः खश् गाङ्गेयं स्वर्णं गाङ्गेयं स्यात् गैरिकं भूरिचन्द्रं राः कल्यःणान्निष्कमष्ट

सहसा मनसि जातं कमपि मनसि जातं कमपि दधानः पुनरनया नुकृतविनयमापादितपादसंवाहनान्देदीप्यमानान्देवयानीमपि प्रेक्ष्य स रसमिमे समप्राक्षीत् । १४

युवकां युवलोकलोचनानां
नवपिय्यूषशलाकिकायमाने ।
कतमत् किल जन्मना कुलाग्र्यं
चरितार्थं प्रचरीकृथः प्रथीमः ॥ ६५

ग॥ एवमात्मनायुक्तमनुयुक्तयोरनयोर्दैत्यगुरुदुहित्रा निवेदितगोत्रनामादि निखिलवृत्तान्तः प्रोक्तात्मीयवृत्तश्च रूपेण परमधन्यान्दनुजकन्यामसुलभाम्मन्यमानस्सद्य एव यातुमयमुद्ययोज । १५

जगौतत्गामनोद्योग दर्शनोद्विग्नमानसा ।
तदानीं देवयानी तं कामिनी मेदिनीपतिं ॥ ६६

---

पदश्च इति हलायुधः हेला विलासं शृङ्गारप्रौढिमा हेला भावाख्यो यौवने हि यः अरसत्यथ वरवर्णिनीं स्त्रीभूतमान्निर्वर्ण्य विलोक्य सहसा अतितर्कितमेव अपिदधानस्तिरोदधत् समप्राक्षीत् पृष्टवान् . १४

**युवकामित्यादि**. युवकां युवां अव्ययसर्वनाम्नामिति स्वार्थे अकच् शलाकिकायमाने शलाकिकेवाचरन्त्यौ कर्तुःक्यङित्याचारे क्यङ् कतमत् किंवा बहूनामिति डतमच् अजातेः प्रश्नेपीष्टं अड्डुतरादिभ्यइत्यदडादेशः चरितार्थंकृतार्थं प्रचरीकृथः अत्वर्थंकृथः कृञो यङ्लुकि प्रथयि अतिशयेन पृथु द्विवचनविभक्त्येर्तायसुन् कुलस्यश्रेष्ठत्वं प्रसिद्धत्वञ्चाकृत्यैवज्ञायतइति भावः. ६५

**एवमित्यादि**. अनुयुक्तयोः पृष्टयोर्दनुजकन्यामसुलभाम्मन्यमानइति पराधीनत्वादिति भावः उद्युयोज उद्युक्तवान् . १५

**जगावित्यादि**. जगावुवाच कै गै शब्दे. ६६

क्षितिपतिकुलमौले दासिकाभिस्सहाभि
द्रुतमहमनुयामि प्रेष्ठ शर्मिष्ठया च ।
अयि मम भव कान्तः कान्तिपीयूषसिन्धो
निखिलगुणनिधिन्त्वां का नवा कामयेत ॥ ६७

ग॥ तदनु मनुजवरो यमिमान्दनुजगुरुदारिका शारदान्निशम्य धर्म्यां वा
णमिवाणीत् । १६

स्नुषास्वसास्वैरचरींसगोत्रजा
परस्य भार्य्या पतिता च भिक्षुकी ।
वराऽवराचेति विवाहगर्हिता
स्ततो वरान्त्वान्न विवोढुमुत्सहे ॥ ६८

निशम्याथ विशालाक्षी विशामीशस्य तस्य गां ।
उदीरितवतीवाच मुदीरितमनोभवा ॥ ६९

---

क्षितिपतीति. प्रेष्ठ। अतिशयेन प्रिय इतिशायनइतीष्ठन् प्रियस्थिरेति प्रियश
ब्दस्य प्रादेशः. ६७

तदन्वित्यादि. धर्म्यान्धर्म्मादनपेतां धर्मपत्यर्थेति यत् अवाणीत् उक्तवान् .१६

स्नुषेत्यादि. स्वैरचरी स्वच्छन्दाचरडितिपचादौ निपातनाट्टित्वाङीप् सगोत्र
जा सगोत्रजाता परा उत्कृष्टवर्णा जतौतुवंशस्थमुदीरितज्जरौ. ६८

निशम्येत्यादि. विशान्नृणां द्वौ विशौ वैश्यमनुजावित्यमरः उदीरितवती
उक्तवती उदीरितः वर्द्धितः. ६९

न चेह यत्नाहितपाकभागिनः
पचेलिमस्येव फलस्य माधुरी ।
तथापि नाथामितमन्मथव्यथा
नरेन्द्रनाथामि जहीहिमैवमां ॥ ७०

सञ्जगौ स च न धृञ्जिताद्वयं
त्वाञ्जनोद्य भृगुकुञ्जरात्भिया ।
वञ्चिते द्विजवरेऽञ्चिते रुषम्
पाञ्चिते क इह मुञ्चते शुचं ॥ ७१

श्रुत्वा धात्रीशवाणीं भृगुपतिदुहिता पञ्चबाणप्रणुन्ना
माभैषीर्भार्गवात्वम् क्षणमिह नृपते तिष्ठ भूयिष्ठकीर्त्ते ।
प्रोच्यैवं प्राज्यनीतीं पितरमुपतदं साथ नीत्वा तमूचे
तातास्मानर्पयास्मै प्रथमकरुजुषे नाहुषा येति नम्रा ॥ ७२

श्रोत्रियश्श्रोत्रायित्वा तां शारदामुशनाः पुनः ।
पुत्रीन्धात्रीभृदासक्तां विदन्निदमुवाच तं ॥ ७३

---

**नचेत्यादि.** यत्नाहितपाकभागिनः प्रयत्नपक्वस्य पचेळिमस्य स्वयमेव पक्व माधुरी [illegible] नाथामि [illegible] जहीहि त्यज एवन्दीनदीनामस्यावाणीमाकर्ण्य कृपा र्द्रहृदयो भार्गवस्यानुमतिर्जाता चेदिमां परिणेष्यामीति निश्चित्याह. ७०

**सञ्जगावित्यादि** सञ्जगौ उक्तवान् धृञ्जिता गन्ता ध्रज ध्रजि धृज धृञ्जि ध्वज ध्वजि गतौ भृगुकुञ्जरात् भृगुश्रेष्ठादञ्चिते पूजिते अञ्चु गतिपूजनयोः द्विजव रे रुषं वञ्चिते एते वचि विस्तारवचने. ७१

**श्रुत्वेत्यादि.** उपतदन्तत्समीपं. ७२

**श्रोत्रियइत्यादि.** श्रोत्रियइत्यनेन धर्मसूक्ष्मज्ञाता प्रकाश्यते श्रोत्रयित्वा श्रो त्राभ्यां श्रुत्वा कर्त्तृकरणाद्धात्वर्थे णिच् कर्तुः करणाद्धात्वर्थइति सूत्रार्थः. ७३

ग॥ अयि सुधांशुवंशवतंसवसुधापते मया विसृष्टा मस्पृष्टदोषामस्मदात्म ज्ञामुपयन्तुरयन्तुवर्णसंकरजानिरवर्णस्तव मत्प्रभावादल्पोऽपि नोत्प द्येत। तदस्याहस्तमस्तशङ्कमह्नाय गृह्णीष्व किञ्च चञ्चलाक्षीय मस्यादास्यकर्मनिष्टा वार्षवर्षिणी शर्मिष्ठा सदा विहितसहासिकाभि र्दासिकाभिराभिस्समं सम्माननीया नेयमुपह्वर उपाह्वानीया चेति शं सितो महीशासिता महीयसीं रतिन्दनुजदुहितरि दधानः प्रधानभूतां कूकुदेनानेन भृगुकुलककुदेन दत्तान्देवयानीं पाणौ कृत्य प्रतिष्ठासुर सौप्रकृष्टादरममुं प्रणनाम १७

ग॥ अथ पृथुलानन्दयोरस्य भृगुपतेरास्येन्दुतदिदं वचनामृतम स्यन्दत ॥ १८

प्रोद्यत्प्रोद्दामधाम प्रकरहिमकरश्रीझरीसोदरीभि
स्त्रैलोक्यं कीर्त्तिभिर्द्रागतनुसुरभयन्स्वर्द्धनी स्पर्द्धनीभिः।

---

अथेत्यादि. विसृष्टान्दत्तां उपयन्तुः परिणेतुः वर्णसङ्कराज्जनिरुत्पत्तिर्यस्य सः जनिरुत्पत्तिरुद्भवइत्यमरः अवर्णः अपवादः उपह्वरे रहसि रहोन्तिकमुपह्वरइत्यमरः उपह्वयन्ते मन्त्रालोचनाय धीसचिवनत्रेत्युपह्वर रहः उपह्वानीया आह्वानीया अनीयरोगि त्वादात्वं ह्वञ् स्पर्द्धायां शब्देच कूकुदेन सत्कृत्यालङ्कृतां कन्यां यो ददाति सकूकुदइ त्यमरः पाणौ कृत्य उपयम्य नित्यं हस्ते पाणाविति गतित्वात् कुगतीति समासः प्रतिष्ठा सुः गन्तुमिच्छुः. १७

अथेत्यादि. आनन्दथुरानन्दः ट्वितोथुच् अस्यन्दतस्रवत्. १८

प्रोद्यदित्यादि. श्रीझरी शोभाप्रवाहः भ्रातरित्यनेन स्नेहपात्रता व्यज्यते शो भना प्रजा यस्य ससुप्रजः नित्यमसिर्जिति असिच् समासान्तस्तस्य भावइति त्वः अत्र प्रोद्यदिति विशेषणाभ्यां सुरभयन्नित्यनेन कीर्त्तीनां कविसमयसिद्धानि धावल्यमाधुर्यसौर

भ्रातस्तं सुप्रजस्तं नरवर नचिरादाप्तवानात्तमोदं
धात्रीमैश्वर्यदात्रीं पृथुमहसिवसन्नालयेपालयेथाः ७४

प्रकाशितार्थप्रकराभिराभि
स्स मेधयामास सगोभिरेनम् ।
राजानमारादवतिष्ठमानं
सन्मार्गनिष्ठं सवितेव काव्यः ॥ ७५

पुत्र्याः प्रेमैकपात्रया लघुसमुपनत प्रास्थितेर्विप्रवास
ध्यानादाध्यानभाजा वरवरवरणान्मोमुदेनापि तेन ।
काव्येनाव्याजमेवन्नयनजलकणानस्य ताशास्यमानो
मानिन्या देवयान्या सह स नरवरो निर्ज्जगाम स्वधाम ॥ ७६

ग॥ तदनु मेदिनीपतिस्स्वाहयेव शुक्रजाताभिकांक्षितात्मा भार्गवीव पर
जनार्दनमनाः प्रसीददसीमदासीविभासितो दारदारपरीतात्मसन्दर्श

---

भाण्युक्तानि. ७४

**प्रकाशितेत्यादि.** अर्थाअभिधेयाः पदार्थाश्च गोभिर्वाग्भिरातिभिश्च रा
जानन्नृपश्चन्द्रश्च आरात्समीपे दूरेच सन्मार्गे सताम्मार्गे खेच. ७५

**पुत्र्याइत्यादि.** लघु सहसेत्यर्थः आध्यानमुत्कण्ठा मोमुदेन अत्यर्थम्मुदितेन यङ्लुक् मानिन्या अभिमानयुक्तया स्वोत्साहसावितनिजेप्सितयेत्यर्थः. ७६

**तदन्वित्यादि.** शुक्रेमौ जाताभिकांक्षितआत्मा मनो यस्याश्शुक्रजातया दे-
वयान्या अभिकांक्षितआत्मा स्वरूपं यस्य सा च स च भार्गवी लक्ष्मीः परजनार्दने परम
पुरुष विष्णौ परजनानां शत्रूणामर्दने हिंसने च मनो यस्यायस्य च महउत्सवः दं वि

नकन्दलितमन्देतरानन्दवन्दिवृन्दवावद्यमानानि रवद्यापदानो लोकमहितविवाहमहविलुलोकयिषु पौरलोकपरिलालितललितवारविलासिनीविविधविलासविलोकनीयां पोपुष्यमाणवादित्रघोषजोघुष्यमाणां विधुरीकृतविबुधपुरीं पुरीमुपेतकुतुकमुपेत्य दैत्यराजतनयामतिकमनीयकायामनुगतदासिनीकायामतिकमनीयकायामशोकवनिकायान्निरतिशयन्निलयं विधायाल निधाय निजमनोरथपंफुलासंफुल्लहृदयपङ्कजया जाजायमानमनसिजया जाययाऽरं रम्यया सममरं रम्यत॥ १९

ततश्च कदाचिदस्यामुदपादि मेदिनी
विनेतुरस्मात्सुविनीतमानसः ।
यदुर्यदीयान्वयभूस्स्वभूरभू
त्सतुर्वशुर्वायवनायतोऽभवन् ॥ ७७

लालारसस्नपनकम्रमुखारविन्दौ
लीलारसेन मृदुजानुकरेण मन्दं ।

---

लोकयिष्ठः विलोकयितुमिच्छुः वरीयसीमतिशयेन श्रेष्ठां जोघुष्यमाणां भृशं शब्दायमानां अतिकमनीयः कायो यस्यास्तां अतिशयितं कामनीयकं कमनीयत्वं यस्यास्तस्यां योपधादिति पुञ् निरतिशयमतिशेनइत्यतिशयः पचाद्यच्सर्वधातुभ्योवक्तव्यइति भाष्यकृत् निर्गतोऽतिशयो यस्मात् सनिरतिशयः अविद्यमानातिशयितइत्यर्थः पंफुलाभशानिष्पत्तिर्यङन्तादप्रत्यये यस्य हलइति यलोपः उत्परस्यातइत्युकारः जाजायमानं यङि येविभाषेत्यात्वविकल्पः अरं रम्यत अत्यर्थमरमत रमु क्रीडायां यङन्ताल्लङ् ततश्च. १९

कदाचिदित्यादि. उदपादि उत्पन्नः पद गतौ चिण्ते पदइति चिण् स्वभूः भगवान्विष्णुः. ७७

लालेत्यादि. स्रणिका स्यन्दिनी लालाइत्यमरः जानुकरेणेति द्वन्द्वश्चप्राणितूर्ये

लोलालकौ विदधतुभवनाङ्कणेषु
बालाविमौ तदनु चङ्क्रमणं क्रमेण ॥ ७८

अव्यक्तमधुरालापा वामुग्द्धमृदुलस्मितौ ।
सोभिनन्दन्निमौ रेमे पृथुकौ पृथुकौतुकम् ॥ ७९

इति श्रीमानवेदविरचिते चम्बूभारते

द्वितीयस्तबकः.

---

स्येकवत्भावः चङ्क्रमणं गतागतं ७८

अव्यक्तेत्यादि. अव्यक्तोएव मधुरआलापो ययोः अभिनन्दन् लाळयन् पृथुकौ अर्भकौ. ७९

इति मानवेदविरचितस्य चम्पुभारतस्य टिप्पणे कृष्णीये

द्वितीयस्तबकः.

## तृ ती य स्त ब कः

दनुजवरतनूजा वत्सराणां सहस्रे
गतवति गुरुशोकादेकदा शोकगेका ।
निभृतमुपगतैवं सा ययाचे ययातिः
पतिरयमिह मे स्याद्देवयान्या यथास्याः ॥ १

ग॥ एवमेनमेव मेदिनीनाथन्नाथन्ती सन्तायमानसन्तापा निजकायकमनीयकेन काममपि कामं कनयन्तं नहुषतनयन्तन्दरीदृशितुकामा कृशोदरीयं यदृच्छया सविधभुवमागच्छन्तं प्रेमार्द्रया च दृशानिभृतमात्मानमुपगूहन्तममुमालोकयन्ती तत्क्षणोदितहर्षमन्दाक्षसाध्वसाकुलमनाः कथमपि समुपगम्य प्रणयमधुरां प्रणतिमतानीत् ॥ १

एषा तदा त्वसमुदित्वरचित्तवृत्ति
भेदाकुला पुलकजालसमावृताङ्गी ।

---

अथ शर्मिष्ठापरिणयनं प्रस्तौति.

**दनुजवरेत्यादि.** अशोकं अशोकतरं निभृतं रहसि. १

**एवमित्यादि.** नाथन्ती याचमाना यनयन्तमल्पं कुर्वन्तं युवाल्पयोः कनिति कनादेशः दरीदृशितुकामा अत्यर्थन्द्रष्टुकामा भृशार्थेन सम्यक्त्वमुक्तं यङि नधातुलोप इति गुणाभावः उपगूहन्तं आश्लिष्यन्तं गुहू संवरणे स्वरितेत् गुणे प्राप्ते ऊदुपधायाइति ऊत् प्रणयेन तदनुभावभूतैः कटाक्षवीक्षणरोमाञ्चवेपथुप्रभृतिभिरित्यर्थः मधुरां. १

**एषेत्यादि.** तदात्वे तत्काले दर्शनसमयइत्यर्थः समुदित्वरस्साधूद्यचित्तवृत्ति

आसादितावसरसूनशरासनोग्र
बाणान्निरोद्धुमिह कञ्चुकितेवजाता ॥ २

उर्वीपतेः कुर्वतोपि सर्वकण्टकलुण्ठनं ।
पुर एवाविरासंस्ते तच्चित्रमबलाश्रयाः ॥ ३

सुभगं भाविकासेय मभिकं भाविकाथतं ।
मधुरामवचद्वाचं विधुरा स्मरसायकैः ॥ ४

दिष्ट्याद्यतसरहसम्भ्रम दृष्टिवीथी
माविष्ठवानसि चिरार्थ्यितमेव चैतत् ।
तद्दीनलोकपरितापविनोदनत्वं
किञ्चिद्वदामि कृपणा करुणापयोधे ॥ ५

भेदः मनोवृत्तिविशेषः रतिपरिपोषइत्यर्थः तेनाकुला कञ्चुकितेव कवचितेव. २

**उर्वीत्यादि.** कण्टका दुष्टारोमोद्गमाश्च सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च कण्टकइत्यमरः लुण्टनं स्तेयं अपनयनमित्यर्थः लुण्ट स्तेये अबलः अबलाः च आश्रयो येषान्ते अबलो दुर्बलः अबला स्त्री. ३

**सुभगेत्यादि.** सुभगंभावुका असुभगा सुभगाभूता कर्त्तरि भुवइति खुकञ् अत्र च्व्यर्थेन नृपस्य गूढवीक्षणादिना अहमिदानीं सुभगा जातेति तन्मनोवृत्तिर्ध्वन्यते अभिकंभाविकां कमितारं भावयितुं ण्यन्तात् भावयतेस्तुमुण्वलौक्रियायामिति क्रियार्थायां क्रियायामुपपदे ण्वुल् प्रत्ययस्तात्कादितीकारः अभिकमिति अनुकाभिकेति निपातः अकेनोरितिषष्ठीनिषेधः अवचदुक्तवती वच परिभाषणे लृजादिः. ४

**दिष्ट्येत्यादि.** दिष्ट्येत्यानन्दे तत्तरहसं अत्यन्तं रहस्तत्तरहसमिति हरः अन्वतप्ताद्दित्यच्समासान्तस्तदेवमतिदुर्लभरहोदर्शनलाभात् ५

माता पितापि मम बन्धुजनोपि हन्त
सर्वन्त्वमेव ननु वेत्सितदार्तबन्धो ।
तत्पूरयाशु मनुजेश मनोरथम्मे
बालाङ्गसङ्गसुधया परमुत्सुकास्मि ॥ ६

किञ्चाहमृतुसमेता पञ्चशरोपि प्रसह्यरम्यांगा ।
निशिततरैश्शरनिकरै मम बत हृदयन्दुनोति विदयमयं ॥ ७

अवददयमथैनाम्मानिनित्वत्गुणाली
निगलितहृदयम्मां विद्धि विद्धं स्मरेण ।
तदपि भृगुवराज्ञा हन्त वेलेव सिन्धुं
जनमिममिह रुन्धे तत्प्रिये किं करोमि ॥ ८

ग॥ तदनु तदीयनिगदितनिशमनोदित निज मनोरथनिरोधविशंकया वि शंकटातंकविवशतराशया सा विशां पतिं सप्रत्याशमिदं प्रत्यां शंसत् ॥ २

**मातेत्यादि.** बालाङ्गसङ्गसुधया उत्सुका पुत्रसमाश्लेषामृते परमत्यर्थमौत्सुक्य वती प्रसितोत्सुकाभ्यामिति तृतीया बालाऽहं अङ्गसङ्गसुधया भवदाश्लेषामृतेइत्याभ्यन्त रार्थ. ६

**किञ्चेत्यादि.** ऋतुसमेता रजोयुक्ता ऋतुः पुंस्यार्यवं पुष्पं रक्तश्चेति वैजय न्ती ऋतुसमेतेत्यनेन कालौचित्यं पञ्चशरोपीत्यनेन विलंबासहत्वं. ७

**अवददित्यादि.** मान्त्वत्गुणालीनिगलितहृदयं विद्धि अतएव स्मरेण विद्धन्नि गलितं बद्धमित्यर्थः निगलवत्करोतीति तत्करोतीति णिचि अनेकाच्त्वाट्टिलोपः. ८

**तदन्वित्यादि.** तदीयं त्यदादीनिचेति वृद्धसंज्ञायां वृद्धाच्छः विशङ्कटः विशाल: वेश्शालच्छङ्कटचाविति शङ्कटच् सप्रत्याशं अपवृत्तायाआशायाः पुनः प्रवृत्तिः प्रत्याशा तया सहितमिति क्रियाविशेषणं २

जीवनापहृति जीवनात्यये
स्त्रीषु नर्मणि विवाहकर्मणि ।
पातकाय न महामतेऽनृतं
सप्ततन्तुषु यथापशोर्वधः ॥ ९

किञ्चोदञ्चितया सदैव दयया हे नाथ ते नाथते
लोकायायमभीष्टदाननियमो जागर्ति धात्रीपते ।
तस्मादस्मदभीप्सितन्दिशभवत्पार्श्वं प्रबिष्टो जनः
को वा दुर्ल्लभवस्तुलग्नहृदयोऽप्यासन्नकामो गतः ॥ १०

धर्म्यां रम्यां गिरमिति निशम्योपयम्यैष मोदा
देनान्दूनाम्मनसिजरुजा रागवेगाकुलात्मा ।
लोलापांग्या निखिलभुवनोन्मादिलावण्यवेण्या
भागिरथ्या हर इव रहो रामया तत्र रेमे ॥ ११

ग॥ अनन्तरमात्मना सहैवं रहसि विहरमाणं दोर्मूलकूलंकषनिजकुचक

---

**जीवनेत्यादि·** जीवनापहृति जीवनस्य जीवनसाधनस्य अपहरणे अपहर्तरि वा सम्पदादित्वात् भावे क्विप् क्विप्चेति कर्त्तरि वा जीवनस्य जीवितस्य अत्यये पातकाय नेति शर्मिष्ठा रहसि नोपह्वानीयेति भार्गवाज्ञायामद्विवाहविषयमन्यथाकरणं विवाहादिष्व न्यथाकरणस्यादुष्टत्वात्तत्र न दोषायेति भावः. ९

**किञ्चेत्यादि·** अपिच किञ्चाऽन्यच्च समुच्चये उदञ्चितया प्रशस्तया हे नाथ। ते तव नाथते याचमानाय आशिषि नाथइति नाथतराशिष्येवात्मनेपदस्य नियमितत्वाद न परस्मैपदं· १०

**धर्म्यामित्यादि.** धर्मादनपेतां वेणी प्रवाहः वेणीतु केशबन्धे जलस्रुताविति निखण्डुः. ११

**अनन्तरमित्यादि·** कूलङ्कषतीति कूलङ्कषः सर्वकूलेति खच काठिन्यस्य

लशकाठिन्यसर्वंसहममुं सर्वंसहापतिं कमपि कालमुपचरन्ती निर
तिशयसम्मदाविष्टा शर्मिष्ठा शर्वाणीव शत्रुवर्गसर्वंकषशक्तियुक्तं प्री
णितराजशेखरम्भद्याम्महितन्द्रुह्युन्नाम कमपि कुमारमामोदितविबुध
चक्रञ्जनयाञ्चक्रे ॥ ३

श्रुत्वा दास्यास्तदास्या ल्वुतनयजनिम्लायदास्या तदास्या
स्स्थानं गत्वाऽछपुत्री विवशमथ सुतावाप्तिमेतामपृच्छत् ।
साप्येनामभ्यधत्तद्विजवरकुलजः कश्चनारीरमन्मां
कान्तस्ते मास्तु शंका समजनि च सुतस्तावदेव स्मरामि ॥ १२

ग॥ इति मायिकयाऽमुकया दनुजबालिकया निवेदिता तस्या गिरमिमा
न्तथ्यामेव निश्चिन्वानाविगतशंकातंका देवयानी निजमेव निलयमि
यमियाय । अनन्तरमन्तरान्तरा केषुचिद्दिनेषु तान्दनुजगुरुदारि
कामुल्लसितरागवेगामुल्लापयमानो मदा पादकैः पदार्थैर्मत्ता मापाद्यो
न्मत्ताभिवात्ताविविधप्रलापां परिरिरक्षुरक्षीणचेताः कुब्जवामनादीना
दिश्या शोकवनिकामाविश्य दनुजराजतनयामुपवदवानो मेदिनीपति
ररमयमिमामरमयत् ॥ ४

सर्वंसहः पूस्सर्वयोरिति खच् अत्र रामः असंज्ञार्थमिदं संज्ञायान्तु वक्ष्यति सर्वसहइति
सर्वं सम्पादयितुं समर्थइति सर्वंसहापतिं भूपतिं शक्तिरायुधविशेषो बलञ्च राजशेखरश्च
न्द्रचूडो नृपश्रेष्ठश्च विबुधादेवास्सन्तश्च चक्रं सैन्यं समूहश्च. ३

श्रुत्वेत्यादि. जनिसुत्पत्तिं तदास्यास्थानं तस्यानिशासस्याः बाहुलका त्भा-
च क्यप् सुता वाप्तिमपृच्छत् कस्ते पुत्रदातेति द्विजवरकुलजः कश्चन कान्तः मान्मरीरम
त् तेशङ्का माऽस्त्विति बाह्योर्थः द्विजवरेत्यत्र श्लेषेण सोमवंशजस्ते भर्त्ता मामरीरमच्श
ङ्कामास्त्वित्याभ्यन्तरस्समजनि जातः दीपजनेति कर्तरि चिण् . १२

इतीत्यादि. मायिकया मायावत्या व्रीह्यादित्वान्मत्वर्थे ठन् अमुकया अव्यय
सर्वनाम्नामित्यकच् रुक्तावशङ्का स्वातङ्कइत्यमरः. ४

अनन्तरमनुद्रुह्यम् पूरुञ्च विनयान्वितं
दैत्यपुत्र्यामयन्देवयानीजानिरजीजनत् ॥ १३

तदनु कदाचन

शुक्रतनूजाप्रहितश्शक्रसमानस्तयाभियाचयुतः ।
प्रक्रीडितुमगमद्सावाक्रीडं वार्षपर्वणीसहितं ॥ १४

ग॥ तदनु तया दनुजगुरुतनूजया निजानुकानुकारान् कुमारान्बहुकुमारा
निह शर्मिष्ठा सदननेदिष्ठभुवि भरितकुतुकं परिक्रीडमानान् परिलो
क्य सपदि पोपुष्यमाणरोषकालुष्यभाजा सहसोपसृत्य ननु परिचा
रिकाचारसमाचरणैकनिष्ठे शर्मिष्ठे नियतं भवती मदप्रिये व्याप्रियते
सेति निगदिता दितिजदुहितेयं अयि भामिनि भवत्पदकुशेशयाभ्यां

**अनन्तरमित्यादिः** देवयानीजानिर्देवयान्याएवप्रधानमहिषीत्वप्रसिद्धिरितिद्यो त्यते विनयान्वितमित्यनेन राजार्हता च देवयानी जाया यस्य सदेवयानीजानिः जाया यानिङिति निङादेशस्समासान्तः तदनु कदाचन कस्यचित् कालस्यापगमे. १३

**शुक्रेत्यादि.** प्रहितः प्रेरितः अत्रतस्याः कर्तृत्वोभक्त्या द्विजवरकुलजः कश्च नारी रन्मांकान्तस्तेमास्तुशङ्केति शर्मिष्ठोक्तेस्तत् प्रर्य्युपर्यालोचने साशङ्कानापगताप्रत्यत प्रवृद्धैवेति द्योत्यते भियाराक्षस्तद्धुः यपरिज्ञानात् भीः शुक्रतनूजेत्यनेनालंघनीयत्वं सूच्य ते शक्रसमानइत्यनेनभोगलौल्येन विपत्प्राप्तिश्च. आक्रीडउद्यानं वार्षपर्वणी शर्मिष्ठा. १४

**तदन्वित्यादि.** अनुकोभर्ता अनुकाभिकाभीकेतिनिपातः बहुकुमारान् स्क न्दकल्पान् विभासुपइति बहुच् नेदिष्ठभुवि अन्तिकतमेप्रमे इष्ठनि अकिकबाढयोरिति नेदा देशः परिलोक्यदृष्ट्वा परिचारिकाचारेत्यनेना त्यन्तानौचित्यं प्रकाश्यते नियतं निश्चि तं मदप्रियेप्रियसंभोगरूपेमदनिष्टेव्याप्रियतेस्म व्यावृतवतीभामिनिक्रोधने मक्रोधे भवत् पदकुशेशयाभ्यां शपे यपउपालंभनइति तङ्. उपालंभनं वाचाशरीरस्पर्शनमिति वृत्ति रवहरदत्तः त्वत्पादौस्पृशामिनैतन्मयाकृतमित्येवं रूपश्शवशरिशेषइति श्लाघह्नुङिति

शपे त्वत्प्रियलाभलोलुभैव सर्वदा वर्वृतीमीति तामधिकमत्सरार्तामात्तकैतवमवर्तयत् । ५

सातङ्का सा सशङ्का पुनरपि नितराम्मानिनी देवयानी
को वा तातः किशोराः ! प्रवदत भवतामित्यमूनन्वयुङ्क्त ।
धात्र्या धार्ष्ट्यातिरेकात् प्रवदत न कुतो विप्र इत्येवमुक्ते
प्रान्ते प्रादर्शयंस्ते स्थितमथ नृपतिन्तर्ज्जनीसंज्ञया तम् ॥ १५

आज्ञाय राज्ञो निकृतिरथासा-
बुद्दामधामा गिरमुद्ववाम ।
निरित्वरक्रोधभरातिरक्त-
नेत्रेण रूक्षम्मुहुरीक्षमाणा ॥ १६

---

सम्प्रदानसंज्ञा । त्वत्प्रियस्य त्वदिष्टस्येति बाह्यः । प्रियशब्दस्य श्लिष्टत्वात् त्वद्भर्तुः प्राप्तौ सश्रद्धेत्याभ्यन्तरः । वर्वृतीमि अत्यर्थं वर्ते । वृतु वर्तने । यङ्लुगन्ताल्लट् । मत्सरेण ऋता मत्सरार्ता। 'ऋते च तृतीयासमासे अवर्णान्ताद्वृद्धिर्वक्तव्या। इति वृद्धिः। ऋ गतौ । अवर्तयदुक्तवती । वृतु भाषार्थः । ५

**सातङ्केत्यादि**—पुनरपि साशङ्केत्यनेन तया शपथे कृतेपि बालेषु प्रियसारूप्यादिना रूढपदा सा शङ्का ततस्तदवस्थेयमितमुक्तम् । नितरां मानिनीत्यनेन इममपराधं सद्यः प्रत्यक्षीकृत्य तत्प्रतीकारं करिष्यामीति तस्या व्यवसायः प्रकाश्यते । धात्र्या उपमात्रा । 'धात्री स्यादुपमातापि क्षितिरप्यामलक्यपी'त्यमरः। धार्ष्ट्यातिरेकात् प्रागल्भ्यातिशयात् । ञिधृषा प्रागल्भ्ये । तस्मात् क्तः । ष्यञ् । 'निस्साध्वसत्वं प्रागल्भ्यं प्रयोगेषु च सर्वतः' इति भावप्रकाशः । तर्जनीसंज्ञया तर्जन्या कृतार्थसूचनया। 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना' इत्यमरः। १५

**आज्ञायेति**—निकृतीः शाठ्यानि । उद्दामधामा क्रोधेन ज्वलन्ती । उद्ववाम उदीरयामासेत्यर्थः । टुवमु उद्गिरणे । अनेन श्रोतृणामसह्यत्वं व्यज्यते । निरित्वरेण साधु निर्गच्छता रूक्षं परुषं ॥ १६

शशांकवंशजनुषो नाहुषे रुचितन्तव ।
प्रेष्यया यद्रतिं प्राज्ञ ! प्रच्छन्नं सम्प्रयच्छसे॥ १७

प्रभो दासीं प्रकुर्वाणः प्रमत्तहृदयो भवान् ।
प्रवर्द्धमानगर्द्धाम्मामगर्द्धयत हा कथम् ॥ १८

कृत्वाऽविचारं कुपतेऽपकारं
क्षोदिष्ठ मह्यं शठ तिष्ठसे यत् ।
धिग्धिक् चरित्रन्तव धिक्च राज्यं
धिक्सौहृदं धिक्च बहुज्ञभावं॥ १९

---

**शशाङ्केत्यादि**—नहुषस्यापत्यं नाहुषिः । उचितामिति काक्वा प्रश्नः । नोचितमित्यर्त्तः । यद्वा त्वद्वंशकूटस्थपितृपर्यालोचने उचितमेवेदम् । सोमो हि पुरा भोगलौल्येन तारां नाम बृहस्पतेर्दारानपहृतवान् । नहुषस्तु पुरुहूतजायामभिलषितवान् । प्रेष्यया दास्यै । 'अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यं' इति तृतीया । संप्रयच्छसे ददासि । दाणश्च सा चेदिति तङ् । १७

**प्रभो इत्यादि**—दासीं प्रकुर्वाणः अविचार्याभिगच्छन् . गन्धनावक्षेपणेति साहसिक्ये आत्मनेपदम् . गर्द्ध स्पृहा . गृधु अभिकांक्षायां . घञ् अगर्द्धयत . वञ्चितवान् . 'गृधि वञ्च्योः प्रलंभने' इति तङ् ॥ १८

**कृत्वेत्यादि**—कुपते ! भूपते कुत्सितः पतिरित्यपि स्फुरति . क्षोदिष्ठ ! क्षुद्रतर अत्यल्पमते अतिनृशंसेति वा . क्षुद्रशब्दादतिशायने इतीष्ठनि स्थूलदूरेति यणादिपरलोपः . पूर्वस्य गुणश्च . 'क्षुद्रो दरिद्रे कृपणे नृशंसल्पनिकृष्टयोः' इति बैजयन्ती ॥ मह्यं श्लाघह्नुङिति संप्रदानसंज्ञा . शठ गूढविप्रियकारिन् . तिष्ठसे 'प्रकाशनस्थेयाख्ययोश्च' इति तङ् . धिक्चरित्रमित्यादिषु उभसर्वेत्यादिना द्वितीया . चरित्रं धिक् . ते चरित्रं निन्दितमेवेत्यर्थः . राज्यं राजभावं ॥ १९

एनां समानीय निजावरोधनं
भुङ्क्ष्वाद्य भोगानिह निस्सपत्नकम् ।
दास्योचितन्दासि ! ननु त्वया कृतम्
वाचा कृतन्दानवधर्मकर्मठे ! ॥ २०

ग॥ एवमवधीरयन्तीयमनवधीरयन्ती गुरुचरणमेव शरणमिति दृढमवधारयन्ती रभसोदितदीर्घश्वसनविचलितेन विगलद्धारावलिना पयोधरेण भरितरुक्पदारविन्दपतितं राजहंसमलमुद्वेजयन्ती भृगुकुलवैजयन्ती सत्संगमाशया सह सहसा विभूषणावलिं विधूय परिकुचपरिपतदश्रुधाराताराहा-

---

**एनामित्यादि**—निस्सपत्नकं सपत्नीरहितमित्यर्थः . दास्योचितमित्यादि विपरीतलक्षणा. वाचा कृतं अलं . कृतं वारणे । वारणार्थयोगे तृतीया वक्तव्या . कर्मणि घटमाना चेष्टामत्यर्थं कुर्वाणा कर्मठा . कर्मणि घट इत्यठच् . २०

**एवमित्यादि**—अवधीरयन्ती निन्दन्ती . ईरयन्ती वदन्ती . रभसात् क्रोधात् . वेगाच्च . उदितेन दीर्घश्वसनेन दीर्घेण वायुना . दीर्घश्वासेन च विचलितेन . विगलन्ती धारावलिर्यस्य विगलन्ती हारावलिर्यस्य स च . पयोधरेण 'स्त्रीस्तनाब्जौ पयोधरौ' इत्यमरः अरविन्दसदृशे पदे पतितं प्रणतं च . राजहंसं हंसं राजश्रेष्टं च . तत्संगमाशया सहेति सहोक्तिः . परिकुचं कुचयोः . 'पारिप्रती अपि सप्तम्यर्थौ' इति माधवः . तार उज्वलः . मन्तूयन्तं कृतापराधमित्यर्थः . 'मन्तु अपराधे रोष इत्यपरे' इति सुब्धातुवृत्तिः . नितान्तं तन्तस्यन्तं अत्यर्थानुभूयमानशोकं . 'तन्तस् पम्पस् दुःखे' इति सुब्धातुवृत्तिः . अनुपदं पदे पदे . उपवदमानं सान्त्वनं कुर्वाणं . 'भासनोपसंभाषा—' इत्युपसम्भाषायां वदेरात्मनेपदम् . उपसंभाषा सान्त्वनं . पृथग्भूय बहिर्निष्क्रम्य . प्रियतमा-

राळंकृता मन्तूयन्तं नितान्तं तन्तस्यन्तमनुयान्तं चतुरचाटुवचनैरनुपदमुपवदमानमेनमपदयमपवदमाना मानाकुलमानसा मन्तूयन्ती जनकनिकटमेव जवादटन्ती पृथग्भूय प्रियतमागमप्रतीक्षमवस्थितं सात्विकं स्वान्तमिव वेगविगलितं धवळोत्तरासंगमप्यनपेक्षमाणा पल्लवपेलवयोरनयोः पदतल्लजयोर्दवीयसीं पदवीं सत्वरं गत्वरयोर्गगनसरस्सरोजवल्लालस्यमानयोरालस्यमपास्यामीति विचार्यैव कबर्या सहसावतीर्य्य वयस्ययेव भुजाग्रेण मुहुर्मुहुस्संवाह्यमानचरणयुगळा ललाटतटघटितविकटभ्रुकुटितया प्रकटोर्ध्वपुण्ड्रमण्डितेव अविरतस्फुरदधरपुटतया घोरतरसंसारसागरतरणनिपुणतरं मन्त्रमिव जपन्ती कैवल्यभूषितात्मा विष्णुपदरोचिष्णुरतिरक्तनेत्रा प्रव्रजितेव सर्वैः प्रेक्ष्यमाणा क्षणादभिपत्य पित्रे वैवहित्रं दुश्चरित्रचक्रमावेदयाञ्चक्रे ॥ ६

---

गमं प्रतीक्षत इति प्रियतमागमप्रतीक्षः. तम्. 'ईक्षिक्षमिभ्यां च' इति कर्मण्युपपदे णः. सात्विकं स्वान्तमिवेत्युत्प्रेक्षायां धवलत्वं निमित्तं. उत्तरासंगमुत्तरीयं. दवीयसीं दूरतरां. गत्वरयोः गमनशीलयोः. 'गत्वरश्च' इति निपातः. लालस्यमानयोः अत्यर्थं लसतोः. भुजाग्रेण कुटिलाग्रेण. भुजो कौटिल्ये. इगुपधलक्षणः कः. हस्ताग्रेण च संवाह्यमानं 'संवाहनं मर्दनं स्यात्' इत्यमरः. घटिता बद्धा. घट चेष्टायां. कैवल्येन भूषित आत्मा यस्याः. अनलङ्कारेति यावत्. कैवल्यभुवि अपवर्गाश्रयभूते विष्णौ उषित आत्मा मनो यस्याः सा च. विष्णुपदे आकाशे. रोचिष्णुः शोभनशीला. अलंकृञित्यादिना इष्णुच्. विष्णुपदमिति लांछनार्थं ध्रियमाणं भगवत्पदप्रतिबिंबं च. तेन रोचिष्णुः. नेत्रं नयनं. वस्त्रं च. प्रव्राजिता भिक्षुकी. विवोढुरिदं वैवाहित्रं. 'वहेस्तुरणीट् च' इतीट् झल्परत्वाभावात् दत्वादिनिवृत्तिः ॥ ६

तदानीमेव स देवयानीजानिरपि भृगुवरवाग्वज्रपातातिभीतचेताः सत्वरमुपेत्य दुस्सहतरनिकारानुस्मरणोत्पन्नानल्पबाष्पधोरणीसारणीयमाननयनयानया तनयया सह समासीनमूर्जस्वतीप्राणनाथममुमूर्जस्वलरोषवेगशोणनयनकोणं प्राणंसीत् ॥ ७

अथ समिन्धानरभसभरान्धमानसो निरतिशयतेजोभरनिराकृतदिवाकरः स खलु दिवाचरो लब्धवर्णमपि लब्धावर्णममुं वर्णपालकं सभ्रूभंगमीक्षमाण एवमाचचक्षे ॥ ८

प॥ साक्षान्नक्षत्रनाथस्त्रिपुरहरजटाजूटसंस्थः किलासौ
कूटस्थो यत्कुलस्य स्मर स हि नहुषो यस्य तातो मनीषी ।
विश्वक्षेमंकरो यस्स्वयमपि सततन्धार्मिकः कार्मिको वा

---

तदानीमित्यादि—वाग्वज्रं शापः . निकारः परिभवः . बाष्पधोरणी बाष्पप्रवाहः . सारणीयमानं सारणीवदाचरत् . सारणी कुल्या . 'प्रसरः सारणी स्वल्पसरित्' इति विश्वप्रकाशः . ऊर्जस्वल ऊर्जस्वी . ज्योत्स्नातमिस्रेति निपातः . प्राणंसीत् प्रणतवान् ॥ ७

अथेत्यादि—दिवाचरः शुक्रः 'शुक्रो दूतो दिवाचरः' इति वैजयन्ती . 'लब्धवर्णो विचक्षण' इत्यमरः . लब्धावर्णं प्राप्तदोषं . वर्णपालकं राजानम् ॥ ८

साक्षादिति—जटाजूटः जटाबन्धः . कूटः संघातः . तत्र प्राधान्येन तिष्ठतीति कूटस्थः . आदिपुरुष इति यावत् . क्षेमं करोतीति क्षेमंकरः . 'क्षेमप्रियमद्रेण् च' इति चात् खच् . धार्मिकः धर्मं चरन् धर्मं चरतीति ठक् . कर्मभि संस्कृतः कार्मिकः . संस्कृतमिति ठक् . क्षोणिर्जाया यस्य स क्षोणिजानिः . जा-

स त्वं सत्यप्रहाता भवसि बत कुतः क्षोणिजाने न जाने ॥ २१

साध्वेतत् साधु यत्त्वं शिवशिव पठितीं धर्मशास्त्रे समस्ते-
प्यन्याय्यं खल्वकार्षीर्युवतिसुखकृता यौवनेनाद्य माद्यन् ।
तस्मान्मच्छासनोल्लंघनपर ! जरसा तादृशा तूर्णमेव
व्याकीर्णाशेषवर्ष्मा भव धरणिपते ! च्छद्मसद्मायितात्मन् ! २२

इति शप्तो नृपस्सोभूत्तरसा जरसा वृतः ।
स्त्रैणस्येह कथन्न स्युरापदो भुवनत्रये ॥ २३

अतिरक्ततयैवायं समयं समलङ्घयत् ।
इतीव जरसा सोमुमाततान सितं सितः ॥ २४

---

याया निङ् ॥ २१

**साध्वित्यादि**—शिव शिवेत्याश्चर्यद्योतकः . पठिती पठितमनेनेति विगृह्य . इष्टादिभ्यश्चेतीनिः . धर्मशास्त्रे मानवादौ . 'क्तस्येत् विषयस्य' इति कर्मणि सप्तमी . ज्ञातसकलस्मृत्यर्थसतत्व इत्यर्थः . न्याय्यं न्यायादनपेतम् . तस्मादन्यदन्याय्यं . 'धर्मपथ्यर्थेति' यत् . युवातिसुखं करोतीति युवतिसुखकृत् . तेन यौवनेन . तादृशा जरसा . युवातिसुख कृन्ततीति जरापि युवतिसुखकृत् . छद्मनो व्याजस्य . 'व्याजो मिषं छलं छद्म निभञ्च कपटोस्त्रियां ' इति वैजयन्ती . सद्मायितः सद्मवदाचरन् . आत्मा यस्य॥ २२

**इतीत्यादि**—तरसा उक्तमात्र एव . स्त्रैणस्य स्त्रीसक्तस्य ॥ २३

**अतीत्यादि**—सितं धवलं . आततान अत्र हेतुरुत्प्रेक्ष्यते . आतिरक्त-

ग॥ तदनु तातप्यमानमना धात्रीपतिरसौ शापमुक्तिलिप्सया शारदा-
मेवमुदाजहार ॥ ९

प॥ अयि जहिहि दयालो ! रोषवेगं जनेस्मि-
न्नुशन ! विशतु मा मा कुत्सिता विस्रसाम् मा ।
शरणमिह भवन्तं भावयेहं भवन्तं
ननु जगति दयार्द्राः साधवो दीनलोके॥ २५

त्वत्तनयाबिरहभयादिद्धरुजो मे बतैष शापस्ते ।
गण्डस्योपरिपिटकोद्भेदो भृगुवंशतिलक ! माहितमते ! ॥ २६

---

तयेत्यत्र श्लेषः . २४

**तदन्वित्यादि**—तातप्यमानं अत्यर्थतप्तं . लिप्सया लब्धुमिच्छया . स्कोः संयोगाद्योरिति सलोपः ॥ ९

**अयीत्यादि**—जहिहि त्यज . ओहाक् त्यागे . 'आ च हौ' इति विकल्पेन इकारः . उशन ! 'सम्बोधने तूशनसस्त्रीरूपं सान्तं तथा नान्तमथाप्यदन्तं माध्यन्दिनिर्वष्टि'. मा मा विशतु . अत्र माशब्दः . न माङ् . तेन 'माङि लुङ्' इति लुङभावः . अत्र प्रविष्टाया अपि जराया अप्रवेशार्त्थनया अस्या स्थैर्याभावः प्रार्त्थ्यते . भवत्कृपयैषा क्षणादपयात्विति यावत् . शरणं रक्षितारं . शीर्यत इति शरणं गृहं . शृणाति रक्षणीयस्यापदं हिनस्तीति शरणं रक्षिता . शॄ हिंसायां . 'कृत्यल्युटो बहुलं' इति कर्तरि कर्मणि च ल्युट् . शरणे समाश्रयणे साधुः शरण्यः यद्वा शरणं गृहं तद्वदाश्रयभूतः . शाखादित्वादिवार्त्थे यत् . भावये प्राप्नोमि॥ २५

**त्वदित्यादि**—गण्डस्य गडोः . उपरिभागे पिटकाया उत्भेदः . २६

पादाब्जे भवतो नतोस्मि भवतु क्षिप्रं कृपास्मासु ते
पुत्र्यान्दैत्यपतेर्गुरो ! मम परो रागस्समुज्जृंभते ।
नान्यस्य।मनुरागिणञ्जनमिमं जानीहि पाहि प्रभो !
तारुण्यं तरुणीमणेस्तदधुना मा मा वृथास्याः कृथाः ॥ २७

समस्तवस्तूनि निरर्थयन्त्या
शापोत्थया ते जरया रयेण ।
सितत्वमाप्तस्य ममाद्य पुत्र्यां
कथन्नु सन्मार्गरते रतिस्स्यात् ॥ २८

ग॥ एवमभिहितो महितकृपापूरभरितमतिरसौ भृगुपतिरयि ! वत्स ! तव विस्रसा स्यादिति मम सरस्वती न विस्रसा भवेत्तदेनामेकस्मिन्नुरस्ये

---

एवं प्रार्थितेप्यानुकूल्यमालक्ष्य सुतास्नेहपरतन्त्रोयमनया नीत्या प्रसाद्य इत्युरसिकृत्य वक्रोक्त्यासत्योक्तिदोषं परिहरन्नाह ॥

**पादेत्यादि**—कृपा क्षिप्रमस्मासु भवतु . दैत्यपतेर्गुरो ! ते पुत्र्यां मम रागः समुज्जृंभते इति बाह्यः . ते कृपा क्षिप्रमस्मासु भवतु . गुरो ! मम दैत्यपतेः पुत्र्यां परो रागः समुज्जृंभते इत्याभ्यन्तरः. २७

**समस्तेत्यादि**—निरर्थयन्त्या निरर्थानि कुर्वन्त्या . जरया सितत्वं डिण्डीरपिण्डवत् श्वेतत्वमाप्तस्य ममाद्य ते पुत्र्यां कथं रतिः स्यादिति बाह्यः . सितत्वं शुक्रत्वमाप्तस्याद्य मम पुत्र्यां कथं रतिः स्यादिति च स्फुरति . सन्मार्गे रतिर्यस्य सः. एतत् षष्ठ्यन्तं सम्बुध्यन्तं वा ॥ २८

**एवमित्यादि**—विस्रसा स्यात् जरा स्यादिति सरस्वती वाणी . विस्रसा अनृता , 'मिथ्या मृषा विस्रसानृते' उरस्ये आत्मसुते . 'उरसोण् च इति' यत् .

बिन्यस्यानया सह यौवनमनुबोभूयिषीष्ठाः किञ्चोदञ्चितवरेण्यपुण्यपूरो राज्यभारभाग्यशोनिधिः प्राज्यतरभाग्यस्स सुतो भवतादिति युवजरन्तमनुनयपरन्तमनन्ताधिभूतमनन्ताधिपतिमनुगतादरमनुजरीगृहीति स्म॥

प॥ नत्वा नृपस्तं स मुदाथ पत्न्या
पुरं प्रति प्रीतमनाः प्रतस्थे।
पुत्रीप्रियाप्त्या परिपूर्णकामो
मोदं प्रपेदे स भृगूद्वहोऽपि॥ २९

देवदेश्यो नृदेवोसौ देवयान्या समन्वितः।

---

उरसा निर्मित उरस्यः। पुत्रः। अत्रात्मार्थे उरःशब्दः। अनुबोभूयिषीष्ठाः। अत्यर्थं अनुभूयाः। यङन्तादाशिषि लिङ्। सः सुतः। उदञ्चितवरेण्यपुण्यपूरत्वादियुक्तो भवतादिति। अनन्ताधिपतिं राजानं अनुजरीगृहीति स्म। पुनः पुनरनुगृहीतवान् इति प्रकृतोर्थः। अत्रातींद्रियज्ञानवतो भार्गवस्य वचसि विचार्यमाणे सति सहृदयानां हृदि हे उदञ्चितवरेण्यपुण्य! पूरो! त्वं राज्यभरभाक् प्राज्यतरभाग्यः ससुतश्च भवतादिति निजपुत्रीवल्लभस्याज्ञामूरीकरिष्यन्तं पूरुं प्रत्यपि प्रसेदुषा भाव्यवस्थावेदिना भृगुणाशीः कृतेत्यपि स्फुरति। अत्र भवतादिति मध्यमः। युवैव जरन् युवजरन्। युवा खलतीति समासः॥ १०

नत्वेत्यादि—प्रतस्थे जगाम। धात्वर्थवैपरीत्ये प्रशब्दः। एवंविधं निकारमितः परं कदाचिदपि न करिष्यतीति प्रसन्नया॥ २९

देवेत्यादि—देवदेश्यः प्रायेण देवतुल्यः। अत्र देश्यप्रत्ययेन, जराया अनपगमेपि तदपगमोपायलब्ध्या प्रसन्नहृदयत्वादतीव शोभमान इति प्रकाश्यते, किन्त्वेतदनुग्रहेण जराविनिमयसामर्थ्यमप्यस्य जातमिति च प्रकाश्यते। ईषद-

जरञ्जगाम विवशैः पुरञ्जनशतैर्वृतं ॥ ३०

एवं भार्गवशापतो नरपतिर्घोरां प्रपन्नो जरां
नारीणां विरसामसावथ तया सत्रैव पुत्र्या भृगोः ।
संप्राप्तस्स्वपुरं पुरन्दरपुरप्रख्यं समाख्यद्यदुं
ज्यायांसं जरसं प्रतीच्छ सुत! मे यच्छ त्वदीयं वयः ॥ ३१

कामानां सुहितो न चास्मि सुत! तत्ते यौवनेनामुना
लालप्ये खलु जुष्यभोग्यनिवहं भोक्तुं सहस्रं समाः ।

---

समाप्ताविति देश्यः । समन्वितः सम्यगन्वितः । अनेन तस्य रोषशान्तिश्च । जरन् जीर्णः । जीर्यतेरतृन्निति भूते अतृन् । विवशै राज्ञो जराभिभूत्या वैवश्यं ॥ ३०

एवमित्यादि—घोरां अभीष्टविषयानुभवनिकारशीलेति सर्वेषां भयावहां. पुरन्दरपुरस्येव प्रख्यातिर्यस्य तत् । समाख्यत् आख्यातवान् । 'अस्यतिवक्तिख्यातिभ्योङ्' इत्यङ् । ज्यायांसं ज्येष्ठं । वृद्धशब्दस्य ईयसुनि ज्य चेति ज्यादेशः । प्रतीच्छ प्रतिगृहाण । यच्छ देहि । पाघ्रेति दाणो यच्छादेशः । त्वदीयं वयः यौवनं ॥ ३१

एवमात्मवचोनिशमने खिन्नभावममुमालक्ष्य नूनमयं यावज्जीवमहं जीर्ण एव स्यामिति मन्वान एव मद्वचनं नोरीकृतवानिति शङ्कमानो जीर्णताया अवधिं निर्दिशन् पुनरप्याह ॥

कामानामित्यादि—कामानां सुहितः कामैस्तृप्तः । पूरणगुणेति समासप्रतिषेधः । सुहितार्थास्तृप्त्यर्थाः । एतस्मादेव निषेधात्सुहितार्थयोगे करणे

निर्विद्यालमियन्तमंग ! समयन्निर्विश्य निर्विण्णधी-

विस्रब्धो भव विस्रसामयि! पुरा गृह्णामि चाह्नाय ताम् ॥३२

ग॥ इति भरिताभिलाषमभिभाषितेन तेन यदुना धर्मसूक्ष्मवेदिना पाताळभुवमिव महाबलिपरीतां वासवमिव वलाभावकृतं धावल्यजननीमपि वनिताजनोद्वेजनीं पुण्यजनसुलभामपि बालजालस्पष्टदृष्टां विरसां जरसं नरर्षभ ! न बिभर्षामीति प्रातीपिकेन तेन प्रत्यादिष्टो रुष्टमतिर्ययातिः प्रेमपाशावपाशितोपि जाल्म ! त्वदन्ववायजन्मानो राज्यभाजो न भवेयुरिति सत्वरं शप्त्वा दुर्वशाशयस्तुर्वशुं द्रुह्युमनुद्रुह्युमप्ययं

---

षष्ठी ज्ञायते । लालष्ये अत्यर्थमिच्छामि . लष कान्तौ . यङ् . जुष्यं सेव्यं । समाः कालाध्वनोरित्यत्यन्तसंयोगे द्वितीया . निर्विद्यालं । निर्वेदेनालं । अलङ्खल्वोरिति क्त्वा । निर्विश्य अनुभूय । 'निर्वेश उपभोगः स्यात्' इत्यमरः । निर्विण्णधीः विरक्तधीः . पुरा गृह्णामि निश्चितं ग्रहिष्यामि . 'यावत् पुरेति भविष्यति लट् . अत्र पुराशब्दो निश्चयार्थः . सयोर्थो वा . यावच्छब्दो निश्चयार्थ एव ॥ ३२

**इतीत्यादि**—भरितः भृ भरणे श्ना . धर्मसूक्ष्मवेदिना युवत्वे पित्रे दत्ते सति मदीयेन यौवनेन मम मातुरेवोपभोगः स्यात् . तदयुक्तमेव . इति मत्वेति भावः . महाबलिरसुरः . महत्यो बलयश्च . वलस्य वलासुरस्य शक्तेश्चाभावं करोतीति . क्विप् च इति क्विप् . 'निसर्गरमणीयोयं स्त्रीणां सधवलः स्मृतः' तद्भावो धावल्यं . जरसा शौक्ल्यं च . बालः शिशुः चिकुरश्च . 'केशाः शिरसिजमूर्द्धजकचाचिकुराशिरोरुहा स्मृता बालाः' इत्यभिधानरत्नमालाः . बिभरिषामि भर्तुमिच्छामि . प्रातीपिकेन प्रतीपं वर्तमानेन .

यवनतां यौवनोदय एवाप्ययं वाहनविहीनतामपि जिहीथा इत्यनाश्रवाननाश्रितानुक्रोशलेशमशाप्सीत् ॥ ११

प॥ भृगुशापोत्थजरसा प्रसितोपि महीपतिः ।
स भृशं यौवनेनापि प्रसितः किमिदं बत ॥ ३३

ग॥ तदनु दुरवसानविषयरसदुरभिनिवेशपङ्किलं विविधविपत्संघसंकुलं संकसुकतापदं सकलतापदमपि हन्त यौवनमतिचिरमनुबुभूषुरेष पुरुषवरं पूरुमादरादारादाहूय पुरोवदेव पुरुविनयमेनमात्माभिमतमभि-

---

तत्प्रत्यनुपूर्वमिति ठक्. अवपाशितो बद्धः. जाल्मो जडः. जल घान्ये. घान्यं जडत्वं. जलति बुद्धितैक्ष्ण्याभावादिति जाल्मः. यवनतां यवनत्वं. अप्ययं मृतिं. जिहीथाः प्राप्नुयाः. अनाश्रवान् अनुक्तकारिणः. 'वचने स्थित आश्रवः' इत्यमरः. अशाप्सीत् शप्तवान्. शप आक्रोशे लुङ्. ११

भृगिवत्यादि—जरसा हेतुना. प्रसितः प्रकर्षेण सितः श्वेतोपि महीपतिः भृशमत्यर्थं यौवनेनापि प्रसितः श्वेतोभूत्. किमिदं किमेतत्. बत आश्चर्यमित्यर्थः. इति विरोधः. यौवनेन यौवने। प्रसितः प्रसक्तोभूदिति परिहारः. अत्र प्रसितोत्सुकाभ्यामिति तृतीया. प्रसितः प्रसक्तः ॥ ३३

तदन्वित्यादि—दुष्टमवसानं येषां ते दुरवसानाः. दुरभिनिवेशो दुराग्रहः. 'निर्बन्धोभिनिवेशः स्या'दिति वैजयन्ती. सङ्कसुकता अस्थिरता. कस गतौ. समि कस उकन्. कसति गच्छतीति संकसुकोऽस्थिरः. बाहुलकात्संकुसुक इत्यन्ये. 'चले संकुसुकोस्थिरः' इति वैजयन्ती. अनुबुभूषुः अनुभवितुमिच्छुः. पुरुविनयमित्यनेन वचनात् पूर्वमेवायं मदाज्ञां परिग्रहीष्यती-

दधे ॥ १२

प॥ पूरो! पुरुकृपापूर पारावार! परायणम् ।
त्वमेवास्य विपद्यस्यां तदाज्ञां प्राज्ञ! मे कुरु॥ ३४

आसन्नमाज्ञातसमस्तवेद्यं
न त्वा मृते वत्स! परं प्रपद्ये।
विक्रीय को वा दधि शिक्यसंस्थं
व्रजेत् प्रतोळीं नवनीतहेतोः ॥ ३५

अद्याशेषसमुद्यमानापि जवादेषा जरा मेदुरा
दुर्वारा बत दुर्विधेर्विलसितादद्धा दनीध्वंस्ति मे ।

---

ति राज्ञो बुद्धिरुत्पन्नेति प्रकाश्यते ॥ १२

**पूरो इत्यादि**—परायणमाश्रयः. पुरुकृपापूरपारावार इत्यनेन कृपाया अपरिच्छिन्नत्वोक्तेः सर्वव्यापित्वं गम्यते. तेन सर्वजनाधिवारणैकलोलुपस्य तव मदाधिनिवारणे भ्रातॄणामिव कथमुदासीनता स्यादिति द्योत्यते. त्वमेवेत्येवकारेण मन्निदेशे] त्वयापि निराकृते अहमशरण एव स्यामिति द्योत्यते. अस्यां त्वयापि विदितपूर्वायां. विपदि सङ्कटे. प्राज्ञ! प्रज्ञावन्! प्रज्ञाश्रद्धेति णः. 'उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः. अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः' इत्यादिकमभिजानासीति भावः ॥ ३४

**आसन्नमित्यादि**—प्रपद्ये आश्रये. प्रतोळीं रथ्यां 'रथ्या प्रतोळी विशिखा' इत्यमरः ॥ ३५

**अद्येत्यादि**—दनीध्वंस्ति अत्यर्थं ध्वंसते. ध्वन्सु गतौ च. यङ्-

कामस्संप्रति मां प्रतीह च शरी चापी जरीजृंभ्यते
तद्दित्सामि च विसृसां तरुणतां धित्सामि वत्साधुना ॥ ३६

ग॥ तदनु तदीयमुदीरितं विरसमपि तरसा गुरुगौरवादुरुतरादरमयमुररीकृत्य सकलशास्त्रसतत्वविज्ञः पितरमेवं व्याजिज्ञिपत् ॥ १३

प॥ यस्मादशेषपुरुषार्थविधौ समर्थं
त्वत्तश्शरीरमुदपादि गुरो! ममेदम् ।
तस्य प्रभो! तव वचो यदि नाकरिष्यं
तद्गर्दभादपि च कष्टतरोभविष्यम् ॥ ३७

---

लुक्. इह च अस्यामवस्थायामपि. जरीजृंभ्यते अत्यर्थं जृंभते. जभ जृभि गात्रविनामे. इदित्वान्नलोपाभावः. दित्सामि दातुमिच्छामि. धित्सामि धर्तुमिच्छामि. उभयत्रापि 'सनि मीमा' इतीस्. 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः. ३६

**तदन्वित्यादि**—विरसमपि सर्वेषामिति शेषः. 'रूपं तत्वं सतत्वञ्च स्वरूपञ्च' इति वैजयन्ती. तस्य विज्ञः. व्यजिज्ञिपत् विज्ञापितवान्. ज्ञा अवबोधने. चङ् ॥ १३

**यस्मादित्यादि**—उदपादि उत्पन्नं. 'चिण् ते पदः' इति कर्तरि चिण्. अशेषपुरुषार्थविधौ चतुर्वर्गसाधने. समर्थं मर्त्यदेहेनैव धर्मादयः साध्यन्ते. गर्दभादपीति. विड्भुक्त्वादतिनिकृष्टो हि गर्दभः. अकरिष्यं अभविष्यामिति 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति भविष्यति लृङ्. कुतश्चित् कारणवैगुण्यात् क्रियाया अनभिनिर्वृत्तिः क्रियातिपत्तिः. ३७

तस्मादस्मि तवेप्सितं द्रुततरं कुर्यामपर्याकुलः
प्रोच्यादादिति यौवनं स हरये देहं दधीचिर्यथा ।
राजासौ सहसाशिषा सह जरां तस्मै समर्प्यार्पितं
तेनादत्त च यौवनस्य मनसा साकं मुदा यौवनं ॥ ३८

पूरुः पूरुषपुंगवः पुरुलसत्तारुण्यपूर्णद्युतिः
कालांभोदकालिन्दजौघसुभगं कान्तं वहन् कुन्तळम् ।
डिण्डीरोदरपाण्डराभचिकुरो दण्डी जरन्नाहुषि-
र्नारीणां सुखदावुभौ व्यतिबभूवाते प्रमोदाकुलौ ॥ ३९

---

**तस्मादित्यादि**—द्रुततरं नात्र किञ्चिदपि विचारणीयमिति भावः. हरये इन्द्राय. दधीचिर्नाम कश्चिन्मुनिः. 'त्वचं कर्णः शिबिर्मांसं जीवं जीमूतवाहनः । ददौ दधीचिरस्थीति किमदेयं महात्मनां ' 'जीमूतवाहस्य शिबेर्दधीचे' रिति चेकारान्तत्वेन प्रयोगः. आशिषा सहेति सहयुक्त इति तृतीया. 'आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः' इति वैजयन्ती. यौवनस्य युवतिसमूहस्य. मनसा साकमिति सहोक्त्या तत्क्षणमेवाभिरूपोभूदिति प्रकाश्यते ॥ ३८

**पूरुरित्यादि**—'ओघः प्रवाहो वेणी च धारा स्रोतो रयः स्मृतः' इति वैजयन्ती. 'डिण्डीरोब्धिकफः फेन' इत्यमरः. जरन् जीर्णः. नहुषस्यापत्यं नाहुषिः. सुखं ददाति द्यति खण्डयतीति च तथा. 'सुखानि खानि येनैतत् सुखमित्यभिधीयते । दूयन्ते खानि येनैतत् दुःखमित्यभिधीयते '. इति भावप्रकाशः. व्यतिबभूवाते भू सत्तायामित्यस्माल्लिटि. 'कर्तरि कर्मव्यतीहारे' इति तङ्. कर्मव्यतीहारः क्रियाविनिमयः. युवत्वजरत्वयोर्व्यत्यासो भूत इत्यर्थः. 'व्यत्याचरेते विप्रान्यौ' इतिवत्. अत्र युवत्वेन भवनं पूरोः क्रिया. जरत्वेन भवनं ययातेः क्रिया. तयोर्विनिमयो भूत इत्यर्थः.

राजा दारैरुदारैरथ नगरवरे रंरमीति स्म तस्मिन्
पादान्तालोलबालैर्घनरुचिरुचिरैः पुष्कराञ्चत्कराग्रैः ।
स्फायद्दानो महाविग्रहविजितमहीभृद्गणः पद्मशुभ-
द्वक्त्रः कान्तारमध्ये कलितरुचि यथा हास्तिकैर्हस्तिराजः॥ ४०

गोवृन्दैर्विबुधावलिं कमलिनीहर्षं मुदा हर्षयन्
दृप्यद्वैरिसमूहमन्धतमसध्वंसं लघु ध्वंसयन् ।

---

प्रमोदेनाकुलौ भग्नप्रायाया अप्याशाया . यथावत् पूरणेन राज्ञः प्रमोदः . अनितरलब्धाया दुष्करतराया गुर्वाज्ञाया अहमेव पात्रं जात इति पुरोः प्रमोदः ॥ ३९

**राजेत्यादि**—उदारैः 'उदारो दातृमहतोः' इत्यमरः . रंरमीति स्म . अत्यर्थं रेमे . बालो बालधिश्शिजकुरश्च . घनो मेघः . घना निबिडा . पुष्करेण जलेन । पुष्करं तामरसमिव च . अञ्चत् शोभमानं . स्फायद्वर्धमानं. स्फायी ओप्यायी वृद्धौ . दानं मदजलं च . विग्रहो देहो युद्धं च . महीभृतः पर्वता राजानश्च . पद्मं बिन्दुजालकं पङ्कजं च . 'महारण्ये दुर्गपथे कान्तारं' इत्यमरः . हस्तिनीनां समूहा हास्तिकानि . अचित्तहास्तिधेनोष्ठक् . 'भस्याढे तद्धिते पुंवद्भावो वक्तव्य' इति पुंवद्भावः . स्फायदिति चाक्षिङ् व्यक्तायां वाचीत्यत्रेकारस्यानुदात्तत्वमनुदात्तेतश्चेति युजर्थमवश्यं कर्तव्यमेव . तेनैव च ताङि सिद्धे पुनस्तङर्थो ङकार अनुदात्तत्वप्रयुक्तस्य तङोऽनित्यत्वज्ञापनायैव प्रभवति . तेन ताळैः शिञ्जदिति तृष्णे ! जृंभसीति स्फायन्निमौंकसन्धीत्यादि च सिध्यति. ४०

**गोवृन्दैरित्यादि**—गावो रश्मयः . वाचो यज्ञाश्च . विबुधाः सन्तो देवाश्च . कमलिनीहर्षमित्यादिषु 'उपमाने कर्मणि चे' ति कर्मण्युपपदे णमुल् . कमलिनीमिव हर्षयन्नित्यर्थः . दिवसकृल्लासं दिवसकृदिव . अत्र

भञ्जन्नाशु खलोत्करं कुमुदिनीभङ्गं सदामोदयन्
कोकामोदमयंजनान्दिवसवल्लुल्लासं ललासान्वहम् ॥ ४१

ग॥ यो वा किल सतताप्यादितसकलाशापालनो निखिलानपि दिशामधी-
शान्निजगृहकृत्यमात्रलग्नहृदयानाततान ॥ १४

यं वा किल निरुपमविक्रमं निजं पतिमिव परिचचार परमभाग्य-
सुलभा भगवती भार्गवी ॥ १५

येन किल काशरुचिभरनिरासिना निरतिशययशोवरासिना पतिव्रता-
वृत्तिमुपाश्रितवती वसुमती निचोळवतीव वितेने ॥ १६

यस्मै किल विस्मायकरूपपरिभूतभूतनाथपरिपन्थिने स्पृहयांबभूव

---

कर्मणि चेत्यत्र चकारात् कर्तर्य्युपपदे णमुल्. सर्वत्र 'कषादिष्विति' यस्माद्धा-तोर्णमुल् तस्यैवानुप्रयोगः. अन्धयतीत्यन्धं. अन्धञ्च तत्तमश्चेत्यन्धतमसं 'अ-वसमन्धेभ्यस्तमस' इत्यच् समासान्तः. खलानां पापानां. खल सञ्चये. पापानि सञ्चिनोतीति खलः. ललास शुशुभेन्वहं अहन्यहनि. वीप्सायामव्ययीभावः. ४१

यो वेत्यादि—निजगृहपालनमेव तेषामधिकार इति भावः. १४

यं वेत्यादि—विक्रमः पराक्रमः पदाविक्षेपश्च. परमभाग्यानां सुलभा. भार्गवी श्रीः ॥ १५

येनेत्यादि—यश एव वरासिः निबिडतरं वासः. 'वरासि स्थूलशाटक' इत्यमरः. निचोळः प्रच्छदपटः. वितेने कर्मणि लिट ॥ १६

यस्मा इत्यादि—'स्पृहेरीप्सित' इति सम्प्रदानसंज्ञा. भूतनाथपरिप-

निधुवनविधौ निजधवेषु तदात्मतापादनेनापादितहृदयक्षोभस्सकलोपि नाकवामाळकालोकः ॥ १७

यस्मात् किल परित्रस्तास्समस्ताः प्रतीपभूपा निरस्तमहावना अपि स्वधर्मः कदाचिदपि नोल्लंघनीय इत्युररीकृत्येवोरीकृतमहावनगुहामुखनिलिनमहाहरिनिनादनिकामचकितचेतसो विहस्तानां विजितस्वस्त्रीजनानां स्वस्त्रीजनानामग्रहस्तान् बाह्वाग्रेण परिगृह्योदग्रतरुशाखाशिखाग्राधिरूढास्तत्रत्यकोटरजालोदरगतकाकोदरगणगरळोद्गारिशूत्कारानिशमनेन निबिडां भीतिमुद्वहन्तो गरुडाय नम इत्युच्चरन्तः कथमपि वसन्ति स्म ॥ १८

यस्य किल बाह्वाभिधाने वारिवाहे द्रविणविसरं विहततर्षं वर्षति किंपचानसंघानां संहननेषु भूषासंहतिर्भवनेषु विभवसंहतिर्हृदयेषु मोदभारोपि जातुचिदापि न माति स्म ॥ १९

---

न्धी कामः. निधुवनविधौ रतिसमये. धवा भर्तारः. तदात्मतेत्यादि स्वभर्तृषु तदात्मताभावनेन हृदयक्षोभमुत्पादितवानिति भावः ॥ १७

**यस्मादित्यादि**—निरस्तं महदवनं रक्षणं यैस्ते ऊरीकृतमहावना;. वनगता इत्यर्थः. हरयः सिंहाः. स्वस्त्रियः आत्मीया युवतयः स्वर्गस्त्रियश्च काकोदराः. फणिनः ॥ १८

**यस्येत्यादि**—विहतोर्थिनां तर्षो यस्मिन् वर्षण इति क्रियाविशेषणं. किंपचाना दरिद्राः. संहननेषु न माति स्म. न प्रबभूव ॥ १९

यस्मिंश्च महीपतौ माहितापदाने निहतविहितमहितापदाने सततमहितापदानेतरि महीमहीनामनुशास्त्रमनुशासति राहौ द्विजवरोपप्लवरुचिः वारिप्रवाहे सेतुभंगः पद्मायां परपुरुषसंगः दन्दशूके द्विजिह्वता पयोनिधौ पोतसंस्थितिः वनितावलग्ने क्षीणता ग्रहेषु वक्रगतिः षट्पदेषु मधुप्रसक्तिः कृषीवलगृहे खलावस्थितिः ओषधीशे दोषोपसंगः वृषध्वजे विषादिता वृद्धजनेषु दण्डधारणं रतौ वैपरीत्यं वारणविग्रहेष्ववग्रहः कामिनीकुचकलशयोरुद्वृत्तता च केवलमाविरासीत् ॥ २०

---

**यस्मिंश्चेत्यादि**—अपदानमद्भुतकर्म . मह्यास्तापदानं महितापदानं . विहितं महितापदानं यैस्ते विहितमहितापदानाः . निहता विहितमहितापदाना येन स निहतविहितमहितापदानाः . तस्मिन् . अहितानां आपदानेता . अहीनां अखण्डां . अनुशास्त्रं अनुसृतशास्त्रं . क्रियाविशेषणं . अनुशासति परिपालयति . द्विजवरो ब्राह्मणश्रेष्ठश्चन्द्रश्च . सेतुर्मर्यादा जलप्रतिबन्धश्च . पद्ममस्या अस्तीति पद्मा . अर्शआदित्वादच् . परपुरुषो विष्णुश्च . 'द्विजिह्वौ सर्पसूचकौ' इत्यमरः . पोतः शिशुर्यानपात्रञ्च . संस्थितिः सम्यक् स्थितिः मृतिश्च . खला दुष्टाः खलं लूनधान्यप्रक्षेपस्थानं . खल सञ्चये . खल्यते सञ्चीयते द्रव्यं धान्यादिकमिति खलं . 'खनो घच' इत्यत्र हरदत्तः . घित्करणसामर्थ्यादन्येभ्योप्ययं भवतीति . न हि खनः कश्चिदवयवः कुत्वभागस्ति . तेन खलं भग इत्यादि भवति' इति दोषो दोषा च . विषादिता दुःखभाक्त्वं विषभक्षकत्वं च . वैपरीत्यं पुरुषायितमित्यर्थः . 'नायकस्यानुमत्या वा स्वमनीषिकयाथवा पुंवत् स्त्री रमते रागात् पुरुषायितमुच्यते' इति रतिरत्नप्रदीपिका . अवग्रहो वर्षप्रतिबन्धः . 'अवे ग्रहो वर्षप्रतिबन्धे' इत्यप करिणां ललाटं च . 'अवग्रहो ललाटं स्यादि'त्यमरः , आविरासीत् आविर्बभूव ॥ २०

तदनु तनयरूप्येण यौवनेन कमनीयरूप्ययं ययातिरयातयामानखिलानपि कामाननुदिनमनुभुञ्जानश्चतुरश्चतुरंबुराशिरशनापरित्रौकिलतां भूतिधात्रीं भूतधात्रीममित्रोत्थपरित्रासहीनं परित्रायमाणस्समासहस्रावसाने विस्रसाम्मंक्षु परिजिघृक्षुः पुरुषाग्रगण्यं पुरुगुणाकरं पूरुममृतकिरा गिरा व्याजहार ॥ २१

प॥ पूरो ! पुत्री त्वयास्मिन्नजनिषि जनुषि प्रीतिमान् प्राप्नुहीदं
तारुण्यन्त्वं वरेण्यं द्रुतमयि जगतां पूज्य ! राज्येन साकम् ।
व्युत्क्रान्तौ मास्तु शङ्का तदखिलजगतीं पाहिपाहीति पाहि
प्राज्ञैराज्ञा गुरूणामिह भुवनतले वत्स ! मीमांस्यते किं? ॥ ४२

ग॥ एवमभिभाष्यैनमखिलदिक्षु विदितमभिषिषिक्षुरेष नहुषनन्दनो वरी-

---

तदन्वित्यादि—तनयरूप्येण तनयस्य भूतपूर्वेण, 'षष्ठ्यारूप्यच' इति रूप्यः. अयातयामान् नूतनान्. 'जीर्णश्च परिभुक्तश्च यातयाममिदं द्वयं' इत्यमरः. परित्रौकितां परितः प्राप्तां त्रौकृ गत्यर्थः. भूतिः सम्पत्. 'विपुला गह्वरी धात्री भूतधान्यब्धिमेखला' इति. अमृतं किरतीत्यमृतकीः ॥

पूरो इत्यादि—पुत्री प्रशस्तपुत्रवान् उभयलोकसुखमपि त्वदायत्तमेवेति भावः. अजनिषि जातोस्मि. जनुषि जन्मनि. अस्मिन्निति विधेयांशः. व्युत्क्रान्तौ क्रमोल्लंघने. पाहि पाहीति पाहि अत्यर्थं पालय. क्रियासमभिहारे लोट्. क्रियासमभिहारेणात्र सम्यक्त्वं। लोटो हिः । 'क्रियासमभिहारे द्वे भवत इति वक्तव्य' मिति द्विर्वचनं। 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' इति तस्यैव धातोरनुप्रयोगः। मीमांस्यते विचार्यते किं। श्रवणसमनन्तरमनुष्ठीयत एव। मान् बधदानिति जिज्ञासायां सन्। ततः कर्मणि लट्। ४२

एवमित्यादि—अखिलदिक्षु विदितमिति । एतदभिषेकेच्छाया लोकाक्रो-

यसा पुरोधसा वर्षीयसा मन्त्रिवृषपौरजानपदेन च गरीयांसं ज्यायांसमतिक्रम्य कथंकारं कनीयांसं सूनुमभिषेक्तुकामोसीत्यभिहितः पित्रादेशकर्तुरेव हि पुत्रतेत्युक्त्वा पवित्रे मुहूर्ते निजनियुक्तेरायुक्तं पूरुं पुरोहितैः पुरुहिताभिलाषिभिरभिषेचयन्नमुं प्राज्यतरराज्यभारभरणे नियुज्य पुनरन्यान् विषयान्तेषु विन्यस्य स्वयमपि विषयान्तमुपेयिवान् विपिनान्तमुपगम्य दान्तमतिरुत्तमेनतपसोत्तपमानैस्तापसनिवहैस्सह निगृहीताभ्यन्तराभिमातिर्वितर्तिर्निखिलजनविस्मयावहन्तपस्तप्यते स्म ॥ २२

प॥ त्रिंशद्वर्षाणि तोयप्रति तदनु पिबन् वत्सरं वायुभक्षः
पश्चात् पञ्चाग्निमध्यस्थिति तदपि परं नित्यमेकान्तचेताः ।

---

शहेतुत्वं न स्यादिति भावः। अभिषिषिक्षुः अभिषेक्तुमिच्छुः। वरीयसा उरुतरेण। वर्षीयसा वृद्धतरेण। गरीयांसं गुरुतरं। एषां त्रयाणामीयसुनि 'प्रियस्थिर—'इत्यादिना वर् वर्ष् गर् इत्यादेशाः। कथंकारं कथमित्येवार्थः। 'अन्यथैव'मिति णमुल्। ज्यायांसं ज्येष्ठं। वृद्धस्य चेति ज्यादेशः। कनीयांसं कनिष्ठं। 'युवाल्पयो'रिति कनादेशः। पुत्रतेति पुत्रं विनान्यं कमभिषेक्ष्यामीति भावः. पवित्रे 'पुवः संज्ञायां' इति करण इत्रः. अत्र लक्षणया पवित्रो देश इतिवत् करणमात्रे. निजनियुक्तेरायुक्तं निजनियोगे तत्परं. 'आयुक्तकुशलाभ्यां चासेवायां' इति षष्ठी. आसेवा तात्पर्यं. विषयान्तेषु जनपदसीमासु. विषयान्तं विषयाणामिन्द्रियार्थानामन्तं. अत्र शाब्दो विरोधः. उत्तपमानैः दीप्यमानैः. उद्विभ्यां तपेरकर्मकात्तङ्. आभ्यन्तराभिमातयः कामक्रोधादयः. अभिमन्यते प्रतिपक्षं इत्यभिमातिः शत्रुः अभियातिरिति केचिदिति सुबोधिनी. तपस्तप्यते स्म. तप आर्जितवान्. 'तपस्तपःकर्मकस्यैव इति कर्मवद्भावः. तप सन्तापे ॥ २२

त्रिंशदित्यादि—तोयप्राति स्वल्पं तोयं. 'सुप्प्रातिना मात्रार्थे' इत्य-

पादांगुष्ठेन तिष्ठन्नधिपृथिवि पुन स्थाणुवन्मासषट्कं
मध्येरण्याम्यतप्त प्रचुरमिति तपः सोभ्यपतच्च नाकम् ॥ ४३

ग॥ अनन्तरं निजान्तिकमायान्तं निखिलहरिदन्तरालमुच्चैरुच्चरमाणया रुचा विरोचनमिव विरोचमानं त्रैलोक्यविदितापदानमेनमालोक्य निर्जराधिपतिरूर्जितमोदमलमार्जिहत् ॥ २३

प॥ सौवान् सर्वानसौ भोगान् सौवपुण्यसमार्जितान् ।
सहस्रं वत्सरानत्र बुभुजे भूभुजां वरः ॥ ४४

---

व्ययीभावः. मात्रार्थोल्पार्थः. परं उपरितनं. वत्सरमित्यर्थानुषंगः. एकमन्तमग्रस्थितं ज्ञेयमस्येत्येकान्तं. अधिपृथिवी पृथिव्यां. 'अव्ययं विभक्ति' इत्यव्ययीभावः. 'विभक्तिरिति सप्तम्यर्थो विवक्षित' इति नीविकारः. मध्येरण्यानि महारण्यमध्ये. 'पारे मध्ये' इत्यव्ययीभावः. तपोतप्त तप आर्जितवान्. पूर्ववत् कर्मवद्भावः. अभ्यपतत् अभ्यगमत्. 'पतः पुम्' इति पुमागमः. अत्र चकारेण तपःफलस्य कालान्तरितत्वाभावः सशरीरस्वर्गप्राप्तिश्च द्योत्यते ॥ ४३

अनन्तरमित्यादि—हरिदन्तरालमुच्चरमाणया उत्क्रम्य गच्छन्त्या 'उदश्चर' इत्यात्मनेपदं. आर्जिहत् पूजितवान्. अर्ह पूजायां. चङ्. तत्तपोनुरूपाणां भोगविशेषाणामभिनन्दनपूर्वकमनुभावानुमतिरित्यर्हणम् ॥ २३

सौवानित्यादि—सौवान् स्वर्भवान्. तत्रभव इत्यण्. अव्ययत्वट्टिलोपः. सौवैः स्वसंबन्धिभिः पुण्यैः समार्जितवान् ॥ ४४

न केवलं तस्यादृशस्य तपसः फलमिन्द्रलोकानुभवमात्रमेवाभूदित्याह ॥

ग॥ अनन्तरमनन्तसुकृतपरम्परासादनीयं विश्वसृजस्सदनं विविश्याय-मनुसृतामरसभेन तामरसभवेन सभाजितश्शरदां दशशतीमतिसुखेनात्र यापयित्वा पुनरपि मन्दाकिनीसमुदञ्चितकाञ्चनारविन्दसन्दोहान्दोलनकेलिखिन्नदानमन्दमारुतापातसुभगंभावुकमखिलजनाप्रियंभावुकं मधुपकुलनयनोद्यावन्नन्दनोद्यानमासाद्य वृन्दारकवधूवृन्दारिकाभिस्सह हिन्दोलिकान्दोलनप्रभृतिभिः क्रीडाभिः परिक्रीडमानः प्रयुतं वत्सरानास्मिन्नवात्सीत् ॥ २४

प॥ प्रौढधीरयमाढौक्य निवासाय बिडौजसः ।
कदाचित् कथयाञ्चक्रे कथास्तास्ता विकत्थनः॥ ४५

ग॥ अथ कथान्तरे तुरासाहा तपस्यया कस्य सदृशोसीति पृष्टो वरिष्ठम्मन्यो राजन्यवर्योधुना त्रिभुवने सुरनरकिन्नरमुनिप्रभृतिषु प्रवरो-

---

अनन्तरमित्यादि—विविश्य प्रविश्य. दशशतीं सहस्रं. नयनोद्यावं नयनोत्सवं. 'वृन्दारकौ रूपिमुख्या'वित्यमरः. हिन्दोलिका डोलापरिक्रीडमानः 'क्रीडोनुसंपरिभ्यश्च' इत्यात्मनेपदं. प्रयुतं दशलक्षं.

'शतं सहस्रमयुतं नियुतं प्रयुतं तथा।
कोटिरर्बुदवृन्दे द्वे ज्ञेया दशगुणोत्तरा' ॥ २४

प्रौढधीरित्यादि—प्रौढधीः बहुविधकथाकथनसमर्थः. आढौक्य उपगम्य. ढौकृ गत्यर्थः. निवासाय. 'गत्यर्थकर्मणि' इति चतुर्थी. विडौजसः इन्द्रस्य. विकत्थनः आत्मश्लाघावान्. एतद्भाविनः पतनस्य हेतुगर्भं विशेषणं. कत्थ श्लाघायां ॥ ४५

अथेत्यादि—तुरासाहा महेन्द्रेण. पृष्ट इति अश्नुतप्रसमप्यपुं सकः

हमेवेति वदन्नयमनेन रभसोदितरभसभरेण यदसि समाननवमानवमानप्यवमन्यसे तस्मादस्माल्लोकात् क्षीणपुण्यः क्षणात् पतिष्यतीति भाषितः पुनरस्यैव पुरुतरार्दनया दयार्द्रहृदयेन सत्समीपपाती भवेत्यनुगृहीतः तदैव क्रूररूपेण केनचिद्देवदूतेन रभसादभिपत्य प्लावितेन स्वरेणापसरेत्यभिहितः पतन् भागधेयशेषादष्टकप्रतर्दनवसुमनश्शिबिनामधेयैरतिरुचिररूपधेयै राजर्षिभिस्साक्षात्कृतब्रह्मभिर्महाब्रह्मैरपि परिबृंहितां यज्ञवाटीमाटीकत ॥ २५

प॥ आचष्ट नष्टदिष्टन्तन्दृष्ट्वा भ्रष्टमथाष्टकः ।
कं हेतुमृक्षपातन्त्वं पतितः पततां पथः ॥ ४६

---

लदोषातिशायिन्या बहुविधकथाकथनाभिव्यज्यमानयाहंमत्या प्रक्षीणपुण्यं निश्चित्य आत्मलोकात् पातयिष्यन् तामेवाहम्मतिं विस्पष्टयितुमेवमपृच्छदित्यवगन्तव्यं. वरिष्ठंमन्यं आत्मानमतिशयेन वरं मन्यमानं. 'आत्ममाने इति खश्. अनवमान् उत्तमान्. अत्र नञस्तद्विरुद्धार्थत्वं. अवमन्यसे निन्दितवानसि. 'वर्तमानसामीप्य' इति भूते लट्. क्षीणपुण्यः महदवमानेन क्षणादेव सर्वपुण्यक्षयो जात इत्यर्थः. तदुक्तं बोधोत्पत्तिप्रकरणे.

**'महन्निन्दां वेदनिन्दां गुरुनिन्दाञ्च वैदिकः।**
**हरिशङ्करयोर्न्निन्दां ज्ञाननिन्दां च वर्जयेत् ॥**

इति ॥ अर्दनया याच्ञया. 'याच्ञा भिक्षार्दने' त्यमरः. प्लावितेन प्लुतीकृतेन. उच्चैस्तरेणेति यावत्. नामधेयेत्यादिषु त्रिषु 'भागरूपनामभ्यः स्वार्थे धेयप्रत्ययो वक्तव्यः' इति धेयः. महाब्रह्मैः महद्भिर्ब्राह्मणैः. 'कुमहद्भ्यां' इति टच् समासान्तः. आटीकत प्राप्तवान्. टीकृ गत्यर्थः ॥ २५

**आचष्टेत्यादि**—कं हेतुं किन्निमित्तं 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनं' इति द्वितीया. ऋक्षपातं ऋक्षमिव. उपमान इति कर्तरि णमुल् ॥ ४६

ग॥ तदनु तेन भूपतिना निखिलभूतावमानादीदृशीं दशामालंबिषीति भाषित एष मालंमालं विषीदतु भवन्ननल्पमत्पुण्यार्जितानजितलोकदेश्यान् सपदि लोकानाविश्य यथामनोरथं सुखयतुत्तमामित्येवमाचख्यौ॥ २६

अनन्तरमखिलराजन्यचूडामणिरसौ धरणीपतिरनणीयसीं वाणीमवाणीत्॥ २७

प॥ अधिकुर्वे कथं क्षत्रवंशजोहं प्रतिग्रहे।
अन्त्यवर्णः श्रुतेर्वर्णे यथावर्णविघूर्णने॥ ४७

ग॥ एवन्निजपुण्यनिचयेनात्मनस्सौवर्गमनिकानां प्रतर्दनादीनामप्यर्दनां

---

तदन्वित्यादि। आलंबिषि आश्रितवानस्मि। अजितलोकदेश्यान् प्रायेण वैकुण्ठलोकसदृशान्. सुखयतु सुखमनुभवतु. 'सुख दुःख तदनुभवे' इति कण्ड्वादौ॥ २६

अनन्तरमित्यादि. अनणीयसीं उत्कृष्टां क्षत्रजात्युचितां. अवाणीत् उक्तवान्॥ २७

अधीत्यादि। अधिकुर्वे अधिकारी भवामि. अत्राधिकरोतिर्योग्यतामात्रवचनः. 'पातुं श्रुतिभ्यामपि नाधिकुर्वे' इति. वर्णस्य क्षत्रजातेर्विघूर्णने चलनादके. क्षत्रजातेः प्रतिग्रहस्याविहितत्वात्. अन्त्यवर्णः शूद्रजातिजः. श्रुतेः वर्णे अक्षरे। 'अस्त्रियौ वर्णमर्णे च' इति वैजयन्ती. कीदृशे? अवर्णविघूर्णने दोषविनाशने. अत्र वाक्यार्थोपमायामधिकाराभावमात्रमेव साधर्म्यं साक्षाद्विवक्षितम्॥ ४७

एवमित्यादि। आत्मनः सौवर्गमनिकानां स्वर्गमनं ब्रुवतो. 'सदाहेति

निजधर्मार्दनकरीं न पुनरयमूरीचकार ॥ २८

प ॥ एतस्मिन्नन्तरेऽस्मिन्नभिपतितवती गृह्णती धूमगन्धं
माता तेषां समेषां मृगनिवहवृता माधवीनामधेया ।
मार्गाहारैकसर्गा विलसदजिनवासास्सुतानीक्षमाणा
द्वन्द्वौघं साहुषी सा पुरत इह पुरा नाहुषी तोतुषीति ॥ ४७

ग ॥ या खलु पुरा ययातेस्स्वपितुरालयमलंकुर्वाणा विप्रवरवरप्रभावभाविप्रतिप्रसवावसानसमयजन्यकन्यकाभावा कदाचिददृष्टधनलवाय विशिष्टविद्यापारगाय गालवाय निजानिर्बन्धभरसमिन्धानरोषकलुषिताशयकौशिकादेशादेकतोहरितकर्णहरिणवर्णवाजिसार्थलाभोत्पन्नवाजितार्थाय प्रार्थिताय वैनतेयमित्राय पित्रा भूसुरत्राकरणरिक्तरित्थेन मनागिव विमनायमानेन ननु मुनिवृषभ ! धनैषिणा भवता मनीषिणी म-

माशब्दादिभ्य उपसंख्यानं ' इति ठक् . अर्दनां याच्ञां . अर्दनं हिंसनं ॥ २८

**एतस्मिन्नित्यादि ।** अभिपतितवती आगता अभूदिति शेषः . तेषामष्टकादीनां . समेषां सर्वेषां . माता माधवीनामधेया ययातेः पुत्री . मार्गः मृगसंबन्धी तृणादिः 'तस्येदं 'इत्यण् . सर्गः स्वभावः द्वन्द्वौघं शीतोष्णादिकं साहुषी सोढवती. पुरा तोतुषीति अत्यर्थं तुष्टाभूत् . 'पुरि लुङ् चास्मे' इति भूते लट् . अत्र पुराशब्दस्य नार्थः ॥ ४८

**या खल्वित्यादि ।** या माधवीति दत्तेत्यादिभिः प्रथमान्तैः पूर्वं संबध्य पुनः सञ्चचारेत्यनेन संबध्यते . विप्रवरस्य कस्यचिद्ब्राह्मणश्रेष्ठस्य . वरप्रभावेन भावितः प्राप्तः. प्रतिप्रसवावसानसमयं . प्रसवावसानसमये प्रसवावसानसमये . वीप्सायामव्ययीभावः. जन्यो जातः कन्यकाभावो यस्याः सा. एकतः ए-

म सुतैषेयमादीयतामनयैव तव मनोरथवल्लरी मनोहरफलोल्लासिनी स्यादिति सादरं दत्ता गालवादेशवशंवदा बालिका कोसलकाशिभोजेश्वराणां हर्यश्वदिवोदासोशीनराभिधानां नराधिपानां वसुमनःप्रतर्दनशिबिनामका रतिमहितधामकानारिकुलदारकान् दारकानुत्पन्नमोदमुत्पादितवती इह शुल्कभूतः शुभ्रवर्णैरेकतः श्यामकर्णैस्ततस्ततो द्विशतशः समासादितैः सैन्धववरैः समिन्धानपरिसरेण इतरद्विशताश्वानवाप्तिपरितप्तहृदयेनानेन मुनिवरेण प्रियसख ! अलमलमतः परं प्रयत्नेन प्रागृचकिना जातगाथिसुतारुचीकेन प्रचेतसः प्रसादादासादितानामेतादृशानां हयानां सहस्रे परमेत एवावशिष्टाः तदितरद्विशतापूरणायैनामेव गुरवे त्वमनल्पादरमर्पयेति वैनतेयवचनेनाशु कुशिकसुतोपशल्यमुपगम्य षट्छतैरेतैः सह समर्पिता तत्र तस्यापि पुष्टगुणमष्टकाभिधानं कमपि सुतं प्रसूतवती गुरुनिष्क्रयनिष्पादनानल्पसम्मदेन तपश्चरणैकलोलुपेनानेन पुनः पितृसमीपमेव प्रापिता ततस्तेन तातेन स्वयंवरार्थमानीतानामखिलपृ-

---

कस्मिन् भागे हरितकर्णानां श्यामैककर्णानामित्यर्थः. हरिणवर्णानां श्वेतानां वाजिसार्थानां अष्टशतानामित्यर्थात्. लाभे उत्पन्नः वाजितार्थो मनोरथो यस्य तस्मै. 'वाजितार्थो मनोरथः' इति वैजयन्ती. प्रार्थिताय आगताय. भूसुरत्राकरणेन दानाद्विप्राधीनत्वसंपादनेन. 'तदधीनवचने देये त्रा च' इति त्रा. रिक्तं शून्यं रिक्थं धनं यस्य तेन. इवेति वाक्यालंकारे. विमनायमानेन दुःखितेन. ननु हे. द्विशतशः द्विशतं द्विशतं. 'संख्यैकवचनाच्च वीप्सायां' इति शस्. जाता गाथिसुतायां सत्यवत्याख्यायां रुची इच्छा यस्य तेन. 'शेषाद्विभाषा' इति कप्. इतरद्विशतापूरणायेत्यनेन निर्बन्धजातरोषेण कौशिकेन एकतः श्यामकर्णाः शुभ्रवर्णा अष्टशतं हया भवता गुरुनिष्क्रयार्थमानेतव्या इत्युक्तमित्युक्तं भवति. खर्वेतरः अनल्पः नि-

स्थलीपतीनाम्मध्ये रथवरमध्यारोप्य चञ्चलाक्षिभिस्सह सञ्चारिता खर्वे-तरनिर्वेदभागिनी मान्यमपि राजन्यकमेतदवगगय्य धन्यधन्या मृगच-र्यैव वर्येति मनसि कलयन्ती वनमेव वरं वरयन्ती सपदि विपिनावनीम-तियावनीमुपगम्य मृगगणैरमा तत्र हरितमणिहारीणि मधुररसधारीणि मृदुतराणि तरुणानि तृणांकुराणि परितृणन्ती दुरितचयशमनानि अमृत-मददमनानि महिततरलघिमानि शीतळानि विमलानि जलान्यापिबन्ती विगतनिखिलाभिमानं मनसि परमेव धाम कलयन्ती सञ्चितरसं सञ्चचार ॥ २९

प ॥ सेयं वरेण्यपुरुपुण्यपयोधिरेन-

मुर्वीमुपर्युपरि संस्थितमात्मतातम् ।

दृष्ट्वा त्रिविष्टपगतं सहसा नमस्या-

मस्यातनिष्ट पदयोरतनिष्ठमोदा ॥ ४९

ग ॥ तदनु वसुमनसा सुमनसा समानः कोयमिति परिपृष्टेयं पुरा पूरुं मम सोदरं सादरं धरित्रीपरित्राणे नियुज्य निजपुण्यपूरनिर्जितां

---

वेदः विषयाविरक्तिः. राजन्यकं क्षत्रियसमूहः. 'गोत्रोक्षोष्ट्र' इति वुञ्. धन्यधन्या अत्यर्थधन्या. मृगचर्या मृगाणां चर्या. हरितमणिर्मरतकं. परितृणन्ती भक्षयन्ती. तृणु अदने ॥ २९

सेयमित्यादि। उर्वीमुपर्युपरि उर्व्याः समीपोपरिभागे 'उभसर्वतसोः' इति द्वितीया 'उपर्यध्यधसः सामीप्ये' इति द्विर्वचनं. नमस्यां नमस्कारं 'नमस्या तु नमस्कारः' इत्यभिधानरत्नमाला. अतनिष्ट कृतवती. अतनिष्ठः अतिशयेनातनुरधिकः मोदो यस्याः सा ॥ ४९

निर्जरेन्द्रनगरीमवाप्तवान्मम जनको जगतीपतिर्ययातिरयं अयि वत्स! सोयमद्य पुनः कस्मै निमित्तायास्मिन्नापतितः स्यादित्युदितशंकमुदीरयन्ती निहतसकलभन्दनान्निखिलजनानन्दनात् परिभ्रष्ट इति तेनैव निर्दिष्टा संभ्रमाविष्टा पितरमिदमभाषिष्ट ॥ ३०

प ॥ तात! ते पुरुपुण्यस्य हन्त दुर्दशयानया।
दूये त्वदीयदौहित्रैरेतैर्निर्विण्णधीरपि ॥ ५०

आस्माकीनतपस्यासिद्धान्तात्त्वं क्रमस्व शक्रपुरीम्।
पुत्रैरपि दौहित्रैरार्जितमात्मार्जितं विदुर्मुनयः ॥ ५१

ग ॥ ततः श्रोत्रयुगप्राभृतीभूतपुत्रीभाषितो धात्रीपतिरसौ मुदा वि-

---

**तदन्वित्यादि।** कस्मै निमित्ताय केन हेतुना. आपतितः स्यादिति संप्रश्ने लिङ्. संप्रश्नो विचारः. भन्दनं कल्याणं. भदि कल्याणे सुखे च. ॥ ३०

**तातेत्यादि।** दुर्दशया दुरवस्थया दूये परितपामि. निर्विण्णधीः विरक्तधीरपि. ॥ ५०

**आस्माकीनेत्यादि।** आस्माकीना अस्मदीया. मम चाष्टकादीनां चेत्यर्थः। 'युष्मदस्मदो' इति खञ्. शेषेतर्ये 'तस्मिन्नणि च युष्माकास्माकौ' इत्यस्माकादेशः। क्रमस्व प्राप्नुहि. 'अनुपसर्गाद्वा' इति तङ्. यद्वा अप्रतिबन्धेन गच्छ. 'वृत्ति सर्ग' इति तङ्. दौहित्रैः दुहितुरपत्यैः 'अनृष्यानन्तर्ये' इत्यस्यायमर्थः. ये पुनरत्रानृषिशब्दाः पुत्रदुहित्रादयः तेषामनन्तरापत्य एवाञिति. 'आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः. दलयोः कृतयति शोभां तां गीतिं गीतवान् भुजङ्गेशः'. ॥ ५१

**तत इत्यादि।** प्राभृतं उपायनं, अभाषिष्ट उक्तवान्. ॥ ३१

ष्टमतिरिदमभाषिष्ट ॥ ३१

प ॥ यद्येवमद्य सम्पन्नमिष्टं दिष्टविपाकतः ।
प्रतारितोहं मानेन युष्माभिरपि तारितः ॥ ५२

दौहित्रैर्दिवमास्मि हन्त गमितः स्फीतैररित्रैर्यथा
ैः पारन्तदतः परन्ननु सुते ! श्राद्धे धरित्र्यामिह ।
दौहित्रास्तिलवत्तथा कुतपवच्चातीव मुख्यो भवे-
दित्युक्ते तु शतांगपञ्चकमथादर्शि क्षणादंबरे ॥ ५३

रथमारुह्य शान्तात्मा रसापोथ रथाश्रितैः ।
प्रातिष्ठत प्रहृष्टैस्तैरष्टकाद्यैस्त्रिविष्टपम् ॥ ५४

ग ॥ अनन्तरमौशीनरं शिबिं सर्वानतीत्य दुर्वारवेगं पुरतस्सरं तं

---

**यदीत्यादि**। दिष्टविपाकतः दैववशात्. प्रतारितः वञ्चितः. ॥ ५२

**दौहित्रैरित्यादि**। दौहित्रैरिति पुत्र्या अप्युपलक्षणं. तदनुक्तिस्तु दौहित्रेष्वेव श्राद्धे मुख्याधिकारित्वविधित्सया. अरित्रः 'अर्त्तिलूधूसह' इतीत्रः. 'अरित्रं केनिपातकः' इत्यमरः. कुतपवत् 'अंशोष्टमोऽह्नः कुतपः' इत्यमरः. कुं महीं कार्त्स्न्येन तपतीति कुतपः. शतांगः रथः. अदार्शि दृष्टं. कर्मणि लुङ्. ॥ ५३

**रथमित्यादि**। शान्तात्मा विगताहम्मतिः. रसापः भूमिपः. प्रातिष्ठत गतवान्. धात्वर्थवैपरीत्ये प्रशब्दः. त्रिविष्टपं प्रातिरत्थलभ्यः ॥ ५४

**अनन्तरमित्यादि**। सन्निकृष्टं समीपं. अन्वयुंक्त पृष्टवान्. ॥ २३

दृष्ट्वायमष्टको विस्मयाविष्टः सन्निकृष्टं प्रविष्टो महान्तम्मातामहमिद-
मन्वयुङ्क्त ॥ ३२

प ॥ कस्मादश्मानतीत्यायं प्रयात्याशीनरः पुरः ।
इत्यञ्जसानुयुञ्जानं जगौ तं जगतीपतिः ॥ ५५

ग ॥ वत्स! शश्वीयितयशश्वेतितनिश्शेषविश्वः पुरुसुकृतराशी राजर्षि-
रौशीनरः पुरा महीयसि महीसुरगणे दशविधकपिलमाहानां समर्पणमन-
ल्पफलायेति विपश्चिदयं विनिश्चित्य विक्रयिकाभिलषितातिरिक्तेन रि-

---

कस्मादित्यादि । अनुयुञ्जानं पृच्छन्तं. जगौ उक्तवान्. ॥ ५५

वत्सेत्यादि । शश्वीयितं अत्यर्थं वृद्धं टु ओ श्वि गतिवृध्योः. यङन्तात् कर्तरि क्तः. श्वेतितं धवलितं. दशविधकपिलमाहानां अत्र श्रीविष्णुपुराणे 'द-शेह कपिलाः प्रोक्ताः स्वयमेव स्वयंभुवा । या दत्ता श्रोत्रियेभ्यो वै स्वर्गं गच्छन्ति ताः शृणु ॥ प्रथमा स्वर्णकपिला द्वितीया गौरपिंगला । तृतीया रक्तपिंगाक्षी चतु-र्थी गलपिंगला ॥ पञ्चमी बभ्रुवर्णा स्यात् षष्ठी च श्वेतपिंगला । सप्तमी कृष्णपिं-गाक्षी ह्यष्टमी खुरपिंगला ॥ नवमी पाटला ज्ञेया दशमी पुच्छपिंगला । दशैताः कपिलाः प्रोक्ता तारयन्ति नरान् सदा' ॥ इति । विक्रयिकाणां क्रेतृणां. अभि-लषितादतिरिक्तेन समधिकेन. रिक्थेन धनेन. महिष्ठतरं अतिशयेन महत्. प-रिलौकितानां प्राप्तानां. पूलस्तृणसञ्चयः. तर्णनमदनं. पीतिः पानं. महारजतं काञ्चनं. महद्रजतं च. अमूल्यानि अनर्घाणि शकृत्करिर्वत्सः. 'स्तंबशकृ-तोरिन्' इतीन्. 'व्रीहिवत्सयोरिति वक्तव्यं'. परिस्तृतानां छादितानां. घट इव ऊधो यासां ता घटोध्न्यः. 'ऊधसोनङ्' इत्यनङ् समासान्तः. 'बहुव्रीहेरूधसो ङीष्' इति ङीष्. पयसीयसीनां अतिशयेन पयस्विनीनां. दवीयसीनां अतिशयेन यौवनवतीनां समांसमीनानां 'समां समां विजायते' इति

कथेन क्रीतानां महिष्ठतरनिजगोष्ठपरित्रैकितानां यथाविधि विकीर्णविविधतृणपूलतर्णनपरिस्फीतानां यथासमयसमर्पितविमलसलिलपीतिपरिप्रीतानां महारजतमयालंकारवरपरिष्कृतानाममूल्यमणिमाल्यनिकरपरिश्रितानां तत्समानपरिष्कृतशकृत्करिविमिश्रितानां मृदुलतरदुकूलवरपरिस्तृतानां घटोध्नीनां पयसीयसीनां यवयिसीनां समांसमीनानां समीचीनशीलानां च कपिलानां निकरैः किञ्च ग्रामे ग्रामे विरचितासु विततासु विमलसलिलापूर्णकूपवापीविशोभितासु विशोभि-

---

खः. विजायते प्रसूयते. 'समांसमीना सा यैव प्रतिवर्षं प्रसूयते' इति सिंहः॥ समीचीनं सम्यक् विशोधितं अन्तिकं सविधभूः यासां. यद्वा विशोधिता अन्तिका चुल्लिर्यासु तासु. 'अन्तिका तु स्त्रियां चुल्यां समीपे भेदलिंगका' इति केशवः. कनकमयीभिः भित्तिभिः शाल्यन्ते श्लाघ्यन्ते इति कनकमयभित्तिशाला. 'बीज्यस्तु कुलसंभवः. इत्यमरः. गुणयन्ति पुनः पुनः पचनक्रियामावर्त्तयन्तीति गुणाः पाचकाः. प्राज्या बहुलाः. व्यञ्जनमात्रैः केवलैर्हल्भिः. 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः. समग्रस्वैरः सकलाजभिः. सशोभैरिति विरोधः व्यञ्जनमात्रैः सकलैः व्यञ्जनैः. 'निष्ठानं तेमनं तच्च' 'व्यञ्जनं स्याद्घृतादि च' इत्यमरः. समग्रेण पूर्णेन स्वरसेन आत्मरसेनेति परिहारः. अवर्णा अष्टादशविधा दोषाश्च. अखण्डेति वर्णो धावल्यादिरक्षराणि च. अप्रयत्ननिर्वर्तितैः स्पृष्टतादिरहितैः अप्रयासेन सम्पादितैश्च. कनकभाजनानि स्थाल्यादीनि. धर्माद्धेतुभूतादागतानि धर्मरूप्याणि. अहितेभ्य आगतानि अहितरूप्याणि. 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' इति रूप्यः. अधिकरूप्यैः आधिकं प्रशस्तरूपैः. 'रूपादाहतप्रशंसयोः' इति मत्वर्थे यप्. 'रूप्यः प्रशस्तरूपेऽपि' इत्यमरः. रूप्यं रजतम्. रुग्मं कनकं. भूषणोद्घैः प्रशस्तैर्भूषणैः. 'संघोद्घौ गणप्रशंसयाः' इति निपातः. सांगाध्ययनमनुवचनं. तत्कृतवन्तः अनूचानाः.

तासु विशोधितान्तिकासु कनकमयभित्तिशालासु सुक्तिशालासु बीज्य-गुणसंभृतैः प्राज्यगुणप्रयुतैराज्यगतसंगतैर्व्यञ्जनमात्रसशोभैरपि समग्र-स्वरसशोभैरप्यवर्णरहितैः अखण्डवर्णात्मकैरप्यप्रयत्ननिर्वर्तितैः आश्रि-तानेककनकभाजनैरामोदापतितसभाजनैरमलतरभोजनैर्धर्मरूप्यैरहितरू-प्यैरधिकरूप्ये रूप्यैकमयै रुग्मैकमयैरपि भाजनैरपारैः कनकभारै रुचि-रतराकारैरगारैः स्वस्वमनोनुकूलैरमलतरुदुकूलैरनर्घैर्भूषणोद्घैरन्यैरपि मा-न्यैर्निस्तुलवस्तुजालैरनूचानाननूनानूकमाननीयान् दानीयान् द्युतिविजि-तबाडवान् बाडवानपरानप्यमितान्मितम्पचान् प्रार्तिथयिषया प्रार्थितां-स्तत्तदर्थितत्तत्तादृशपदार्थसार्थसमर्थनेन श्रद्धाभक्तिभरविशुद्धान्तरंगो-नुदिनमातितरामतीतृपत् ॥ ३३

प ॥ भूरिणानेन दानेन भूषणैराधिकोज्ज्वलः ।
भूरिभूषितयानेन पुरः सञ्चरते शिबिः ॥ ५६

---

'अनूचानः प्रवचने सांगे धीति' इत्यमरः . अनूनानूकेन विशिष्टेनाभिजनेन शीलेन च . 'शीलान्वयावनूके द्वे' इत्यमरः . माननीयान् दीयतेऽस्मा इति दानीयः . 'कृत्यल्युटो बहुळं' इति बहुलग्रहणात्संप्रदाने कृत्यः . बाडवो ब-डवानलः . बाडवान् विप्रान् . मितंपचान् निस्वान् . प्रार्तिथयिषया प्रार्थि-तुमिच्छया सनन्तात् , अप्रत्ययात् ' इत्यकारप्रत्ययः . प्रार्थितान् आगतान् . 'याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः' श्रद्धा साधनमिदं साध्यान्न व्य-भिचरतीति विश्वासः . अतीतृपत् सन्तोषितवान् ॥ ३३

भूरिणेत्यादि । भूरिभूषितं स्वर्णालंकृतं . यानेन सञ्चरते 'समस्तृती-यायुक्तात्' इति तङ् ॥ ५६

श्रुत्वैतन्निखिलजगत्प्रहर्षणीयं
वृत्तान्तत् भृशमहितं शिबेरमुष्य ।
तत्तादृक्कुतुकभराकुलाशयोमुं
हृष्टोलं बहुमनुते पुराष्टकोयम् ॥ ५७

वदन्वरिष्ठस्य गरिष्ठधर्मिणः
शिबेः प्रतिष्टामतिदाननिष्ठताम् ।
ययातिरिष्टैरयमष्टकादिभि-
स्त्रिविष्टपं तुष्टमतिः प्रविष्टवान् ॥ ५९

सर्वांगीणेन सोयं सपदि विकसितेनेक्षणानां गणेन
प्रत्यापत्तिं ययातेः प्रतिहततमसः प्रेक्ष्य दुष्प्रेक्ष्य धाम्नः ।

---

**श्रुत्वैतदित्यादि ।** प्रहर्षणीयं प्रहर्षणसाधनम् । बहुमनुते पुरा बहु-मन्यत . वृतनामाङ्कितोयं श्लोकः . म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम् ॥ ५७

**वदन्नित्यादि .** प्रथिष्ठां पृथुतमां . 'अतिशायने तमबिष्ठनौ' इती-ष्ठन् . ॥ ५८

**सर्वेत्यादि .** सर्वांगीणेन सर्वांगं व्याप्नुवता 'तत्सर्वादेः पथ्यंग' इति खः . ययातेः प्रत्यापत्तिं प्रथमं भ्रष्टस्य पुनरात्मलोकप्राप्तिं . तमः निखिलावमानजं पापं ति-मिरं च 'तमस्तु क्लीपाने नरकशोकयोः' इति निघण्टुः . नानन्दामास अत्यर्थं तु-तोष . यङ्लुगन्ताल्लिट् . घनेन रसेन घनरसेन जलेन च . सत्पथे साधुमार्गे न-

नानन्दामास देवो घनरसपरिपूर्णाशयो वृत्रवैरी
पद्मव्रातेन पद्माकर इव तरणेः सत्पथे संस्थितस्य ॥

इति
श्रीमानवेदविरचिते चम्पुभारते
तृतीयस्तबकः ॥

---

## अथ चतुर्थस्तबकः ।

---

आत्मन्याधाय राज्यं पितरि गतवति प्राज्यपुण्यार्जितं तत्
स्वाराज्यं भूरितेजास्सकलवसुमतीं पालयामास पूरुः । १

---

क्षत्रमार्गे च . तरणिः सूर्यः ॥ ५९

इति
श्रीमानवेदविरचितस्य चम्पुभारतस्य
टिप्पणे कृष्णीये
तृतीयस्तबकः

---

अथ पूरुचरितं वर्णयति

**आत्मनीत्यादि**। स्वाराज्यं स्वर्गलोकं. स्वराडिन्द्रः. तस्य कर्म स्वाराज्यं. ब्राह्मणादेराकृतिगणत्वात् ष्यञ्. परिपालनलक्षणं धर्मं. अत्र लक्षणया तदधिकरणभूतः स्वर्गलोकः स्वाराज्यं. सुरतरुसदृश इति सर्वानित्यस्य विशेषणं च.

दानैस्सर्वानमेथैस्सुरतरुसदृशस्तोषयन्नेष पौर्षीं
योषाभूषायमाणामथ विधिवदुपायंस्त शस्ते मुहूर्ते ॥ १

ग ॥ अनन्तरमनया सह कुलोचितान् धर्माननुदिनमनुतिष्ठन् प्रतिष्ठानपुरमधितिष्ठन् प्रोद्दण्डदोर्दण्डमण्डनायितचण्डमण्डलाग्रचाखण्ड्यमानाखण्डसपत्नमण्डलो माधव इव सुमनोविकासकृत् ईशान इव नन्नम्यमानसेनानीशिरोविसरवतंसायमानपादपंकजो विरोचन इव सर्वदास्पृष्टदोषो वारान्निधिरिव वाहिनीशतपरिगतस्त्रिमूर्तिदयितात्रयीव कमलो-

---

अर्थिनोपि दातृत्वं प्राप्ता इत्यर्थः. उपायंस्त उदूढवान्. 'उपयमः' इति तङ् 'विभाषोपयमने' इति वा किरबम् ॥ १

अनन्तरमित्यादि. पुरमधितिष्ठन् पुरे तिष्ठन्. 'आधिशीङ्स्थासां' इत्यधिकरणस्य कर्मसंज्ञा. मण्डलाग्रं करवालं. चाखण्ड्यमानं अत्यर्थं खण्ड्यमानं. खड खडि भेदने. यङन्तात् कर्मणि शानच्. माधवो वसन्तो विष्णुर्वा. सुमनसां देवानां पुष्पाणां सतां च. नन्नम्यमानस्य अत्यर्थं नमतः. सेनान्यः षण्मुखस्य. शिरोविसरस्य शिरस्समूहस्य. वतंसायमानं वतंसवदाचरत् पादपङ्कजं यस्य सः. सेनान्यां वाहिनीपतीनां च. अस्पृष्टा दोषा दोषाश्च 'निशा च दोषा रजनी च यामिनी' इत्यभिधानरत्नमाला. वारांनिधिः समुद्रः 'तत्पुरुषे कृति बहुलं' इति बहुलोक्तेर्वारांनिध्यपांपतिवाचस्पतिदिवस्पत्यादिष्वलुक्. वाहिन्यो नद्यः सेनाश्च. कमले पद्मे उपशोभितो ब्रह्मा. तेन सह आस्यायां स्थितौ अतिरुचिर्यस्याः सा. कमलेनापशोभितो विष्णुः कमलेन मृगेणोपशोभितो हरः 'स्यात् कुरंगेपि कमल' इत्यमरः. कमलमदृशशोभितेनास्येन अतिरुचिश्च सर्वदा आखण्डले सिता कान्तिरिच्छा यस्याः सा अकलङ्कं पूर्णं यथा तथा लासता कान्तिः शोभा यस्य सः दोषज्ञो विद्वानपि दुष्कृतं करोतीति. दुष्कृतान् दुष्टकर्मणः कृन्ततीति च. भूतिर्भस्म ऐश्वर्यं च. उग्रः शंभुः क्रूरश्च.

यशोभितास्यातिरुचिः इन्द्राणीव सर्वदाखण्डलसितकान्तिः दोषज्ञोपि दुष्कृतकृत् उग्रमूर्तिरप्यनुग्रः चतुस्सिन्धुरशनाबन्धुरवसुन्धरावनधुरन्धरो मध्यलोकमध्युषितमखिलमपि जनमयं राजवृन्दारकोयमनन्दत् ॥१

प॥ कल्पान्तोत्कटकंकटीकनिटिलज्वालाग्निकीलावली-
कल्पानल्पतरप्रतापतपनव्यालुप्तदुर्हृत्तमाः ।
पूरुः पूरितविश्व एव यशसा निश्शेषविश्वंभरा-
भारं भूरितरं करे दधदरं रम्ये पुरेरंरमीत् ॥ २

संव्युष्टासु समासु कासुचिदसौ पौष्यां माहिष्यां ततो
विख्याताञ्जनयाञ्चकार तनयान्वीरान् प्रवीरादिकान् ।

---

मध्यमलोकं भूमण्डलं 'उपान्वध्याङ्वसः' इति कर्मसंज्ञा. राजवृन्दारकः राजश्रेष्ठः 'वृन्दारकनागकुञ्जरैः' इति समासः. अनन्दत् नन्दयामास. चङ्॥ १

**कल्पेत्यादि**। कल्पान्तः प्रळयः. तत्र उत्कटस्य निखिलमपि जगत्संहर्तुमीतभीषणं रूपं परिगृह्य प्रकाशमानस्य कंकटीकस्य शंभोः 'कृशानुरेता जोटिङ्गः कंकटीक उमापतिः' इति वैजयन्ती. ज्वलतीति ज्वालः स चाग्निश्च. 'ज्वलितिकसन्तेभ्य' इति णः. ज्वाला अर्चीषि. व्यालुप्तानि दुर्हृद एव तमांसि येन सः. अरंरमीत् अत्यर्थं रेमे. यङ्लुगन्ताल्लङ्। दधदरंरमीदित्यनेन भूभारधारणे प्रयासाभावो दर्शितः॥ २

अथाप्रसिद्धान् नृपान् प्रवीरप्रमुखान् नामोद्देशमात्रेणानुक्रामति ॥

**संव्युष्टास्वित्यादि**। समाप्तासु. व्युषी विवासे. विवासः समाप्तिरिति तरंगिण्यां. 'श्वीदित' इतीडभावः. वीरान् यथोपक्रमणनिर्वहणसमर्थों

एतेषां प्रथमात्कृताहिततमादासीदसीमद्युति
नित्योदित्वरदोर्बलोद्धृतधरादस्युर्नमस्युर्नृपः ॥ ३

अभ्रेषभ्रेजमानादजनिषत ततस्त्वर्भकास्सुभ्रुमुख्या-
स्तस्माद्वासन्वदाद्या अत इह गुरुसम्पद्वरीयान् यवीयान् ।
रुद्राश्चाद्याश्च जातास्तत उरुमहसोस्मादचेपुप्रधानाः
तान्तामित्रोन्तिनारोप्यजनि तत इतोत्रस्नवस्त्रस्नुपूर्वाः ॥ ४

त्रस्नोरस्य महीं कृत्स्नामञ्जसा भुञ्जतस्ततः ।
कालिन्दीनामिका कन्या प्रपेदे महिषीपदम् ॥ ५

अथ तरणिसुता सा विश्वविख्यातकीर्तिम्

---

वीरः. दस्यवस्तस्करादयः ॥ ३

**अभ्रेषेत्यादि**। अभ्रेषो न्यायः. भ्रेजमानात् शोभमानात् 'एजृभ्रेजृभ्राजृ दीप्तौ'. अजनिषत जाताः. तस्मादित्यनेन समासे गुणीभूतः सुभ्रुः परामृश्यते. 'अथ शब्दानुशासनं केषां शब्दानां'. इति 'धरण्याक्षेपस्फुटवैरिणि हिरण्याक्षे तां' इति च शास्त्रकाव्ययोः प्रयोगदर्शनात्. 'सर्वनाम्नानुसन्धिर्वृत्तिच्छन्नस्य' इति वामनोक्तिश्च. गुरुसंपदा वरीयान् श्रियैव राज्ञां सत्कारलाभ इत्युक्तं महाभारते 'श्रियो हि कारणाद्राजा सत्क्रियां लभते पराम्. सा ह्यस्य गूहति पापानि वासो गुह्यमिव स्त्रियाः' इति. यवीयानिति नाम. अत्रस्नवः अत्रसनशीलाः 'त्रसिगृधिधृषिक्षिपेः क्नुः' इति क्नुः. त्रस्नुपूर्वाः. त्रस्नुप्रभृतयः ॥ ५

**त्रस्नोरित्यादि**। भुञ्जतः पालयतः ॥ ४

**अथेत्यादि**। तरणिसुता कालिन्दी. बालिनामिति भूम्नीनिः. एतस्मे-

वलिनमिलिलसंज्ञं मेदिनीपालमौलिम् ।
सुतमलभत तस्माद्यामिनीयामभागा-
च्चरमत इह लोके चेतनेव प्रसादम् ॥ ६

गोत्रादानातिलोकात् परबलविनिहन्तुस्सदानन्दनोत्कात्
धात्रीनाथादमुष्मादभवदथ यथा वृत्रहन्तुर्जयन्तः ।

दिनीपालमौलित्वहेतुः. ६

अथ सार्द्धेन स्तबकद्वयेन दुष्यन्तचरितं विस्तरेण वर्णयति.

गोत्रेत्यादि। गोत्रा गोसमूहः. 'खलगोरथादिनित्रकस्यचश्च' इति सामूहिकत्रः. भूमिश्च. तस्या दाने विसर्जने रक्षणे च. देङ् रक्षणे आतलो-लात् सतृष्णात्. गोत्राणां पर्वतानां आदाने पक्षखण्डने. परबलस्य शत्रुसैन्य-स्य. उत्कृष्टस्य बलासुरस्य च. रलयोरैक्यमिच्छन्ति केचिदित्याह वृत्तिकृत्। डलयोर्बवयोश्च ह्यभेदं माधवादयः ॥ रेखा लेखा जलजडौ बिन्दुर्बिन्दुरिति क्र-मात्। ललोरुक्तिभेदस्तु ळकारो नाक्षरान्तरं'॥ इति हलस्ये. सतामानन्दने सदानन्दने च उत्कात् उत्सुकात्. 'उत्कउन्मनाः' इति निपातः. रक्षरक्षेत्य-रक्षत् अत्यर्थं रक्षितवान्. 'क्रियासमभिहारे' इति लोट् लोटो हिः. 'क्रियास-मभिहारे द्वे भवत इति वक्तव्यं' इति वचनम्. नन्वत्र स्रग्धरावृत्ते यतिः कथं?. एषा त्रिमुनयतियुता. अत्र तु परबलविनिहन्तुरित्यत्र हमित्यत्र यतिः. सा प-दमध्यस्था. अत्र वृत्तरत्नाकरव्याख्या कविचिन्तामणिः. 'ननु यतिः पदच्छेदः पदावसानं तत् कथं पदमध्ये स्यात्?. पदमध्यस्य पदत्वाभावात्. न खलु वृक्ष इत्यत्र वृ इति किञ्चित् पदं क्ष इति किञ्चित् पदमिति भवति. उच्यते. कल्पनया भवति. किमिति तथा कल्प्यत इति चेत् श्रवणोद्वेगाभावादिति ब्रूमः. श्रवणोद्वेगाभावानुविधायिनौ यतिभङ्गाभङ्गौ. तत एकमपि पदं द्विधा विभज्य पू-

दुष्यन्ताख्यो नितान्तं विबुधजनमनोमोदनो मेदिनीशो
विश्वं विश्वंभराया वलयमिदमयं रक्षरक्षेत्स्वरक्षत् ॥ ७

मार्गंमार्गमशेषमार्गणगणानश्रान्तमश्रान्तधी-
र्यो विश्राणनमाततान करुणापूरेण पूर्णाशयः ।
जायेरन्निह जातरूपरुचिराः स्वस्थानसंस्थायिनः
सामोदास्सततं समे पुनरिमे कल्पद्रुकल्पा यथा ॥ ८

संग्रामांकणवेदिकासु महितो यस्य प्रतापाभिधो
वैतानाग्निरतिप्रवृद्धरुधिरौघाज्यैरजाज्वल्यत ।

---

र्वभागमेकं पदमिति कल्प्यते. उत्तरभागोपि तथा. अतः पदमध्येपि यत्या भवितव्यं ' इति. एवं चात्र यतिभंगो नात्यन्तदोषाय. उपर्यपि ' अङ्के तां पङ्कजाक्षीं ' इति ' भो भो धर्माध्वविध्वंसिन ' इत्यादावपि द्रष्टव्यम् ॥ ७

**मार्गमित्यादि** । मार्गं मार्गं अन्विष्यान्विष्य. 'मार्ग अन्वेषणे आभीक्ष्ण्ये ' इति णमुल् . **मार्गणा** याचकाः. अश्रान्तधीः अखिन्नबुद्धिः. कदाचिदपि दाने वैमुख्यलेशोपि नाभूदिति भावः. क्वचित् कोणे निस्वः कश्चिद्वर्तते वा न वा इत्यन्विष्य दाने करुणेत्यादि हेतुः. जातेन यथेष्टभोजनलाभादिना उत्पन्नेन रूपेण आकृतिसौरूप्येण जातरूपेण स्वर्णेन च रुचिराः स्वस्थानसंस्थायिनः स्वस्थानमात्मस्थानं स्वर्गश्च. आमोदो हर्षः सौरभ्यं च. समे सर्वे. कल्पद्रुकल्पाः प्रायेण कल्पतरुसदृशाः ॥ ८

**संग्रामेत्यादि** । प्रताप इत्यभिधा यस्य स प्रतापाभिधः. वैतानो यज्ञसंबन्धी. अजाज्वल्यत अत्यर्थं ज्वलितोभूत्. यङन्ताल्लङ्. पुरोडाशो हविर्विशेषः. हुत्वा हु दानादानयोः. अत्र धात्वर्थः प्रक्षेपमात्रं. स च स्व-

हुत्वा यत्र विशिष्टजीवितपुरोडाशं विपक्षाः क्षणा-
दारोहन्त्यखिलामरीगणमुखोद्गीतापदाना दिवम् ॥ ९

क्वापि वैरिभयं नाभूत्तस्मिन् भुञ्जति भूतलम् ।
विहितावनलीनात्मा तेन यद्वैरिसंहतिः ॥ १०

ग ॥ अनन्तरमयन्तु कदाचित् पामरजन्तुनिकरमुपरमन् निरर्गळनिर्गत-
निखिलपौरवर्गविमर्ददुर्गमपुरोमार्गसमुत्पतनजवपरिस्फुटितवारिवाहनिव-
हया शतकोटिकठुतरशफकोटिपाटितधरणितलया निरतिशयरयेभ्यः पा-
देभ्यो गुरुभ्यो जवाधिक्यमद्ध्येतुमभ्यागतैर्जनमनोभिरिवाणुपरिमाणै रेणु-
भिर्निषेव्यमाणनिकटया घोटकघटया कबळितहरिदन्तराळो सजन्यव-
र्यो जन्यधुर्यं रथमधिरूढवानूढकुतुकन्नगरान्निर्ययौ ॥ २

---

भावाच्चोदिताभावहविषि नियमेनापेक्ष्यते . तस्मादग्नौ हविःप्रक्षेपो होमः . क्ष-
णाद्रोहणस्य पुरोडाशादीनां विशिष्टत्वं हेतुः ॥

**क्वापीत्यादि** । भुञ्जति पालयति सति. 'भुजोऽनवने' इति पालने तङ्नि-
षेधाच्छता . ॥ १०

**अनन्तरमित्यादि** । पामरा दुष्टाः . उपरमन् उपरमयन् उपशमयन् .
'उपाच्च' इति परस्मैपदित्वे 'लक्षणहेत्वोः' इति शता . अन्तर्भावितण्यर्थोऽत्र र-
मिः . शफकोटिः खुराग्रम् . गुरुभ्यो बृहद्भ्यः . आचार्येभ्यश्च . अणुपरिमा-
णैः 'अणुपरिमाणं मनः' इति तार्किकाः . काव्ये सर्वमताङ्गीकारादत्र तन्मतेनो-
क्तिः . घोटकघटया वाजिसमूहेन . धुरं वहति धुर्यः . 'धुरो यड्ढकौ'
इति यत् . जन्ये धुर्यः जन्यधुर्यः तं . 'इहानुक्तैः समासार्थे द्वितीयेत्यादि ख-
ण्ड्यतां . 'कृताद्बहुलमित्येतद्बाहुल्यं समाश्रितं' इति सर्वस्वे ॥ २

प ॥ गहनगामिनि तस्मिन्मार्गयैरास्तृताशे
मुनिनिवहनिपीडानाशनाशेन रेमे।
धरणितलसमुत्थं व्यानशे व्योमदेशे
रज इह शलभोत्थप्रख्यमृद्धावकाशे ॥ ११

धूलीपाली तदा सा हहह विदधती लोकमन्धंभविष्णुं
सन्ध्येवोज्जृंभमाणा गगनभुवि दृगध्यक्षमाशु व्यघुक्षत्।
पश्यन्नेतस्य शश्वद्रिपुतिमिरभरध्वंसनिघ्नं प्रतापं
प्रौढव्रीळस्तिरोभूत् द्युमणिरिति मतिर्येन जाता जनानाम्॥ १२

ग ॥ तदनु स महीपतिरतिमहितमहीरुहनिदहशाखाशतान्तरितान्तरिक्षा-

गहनेत्यादि। गहनगामिनि वनं गमिष्यति. 'भविष्यति गम्यादयः' इति भविष्यति साधुः. मार्गयैः मृगयायां कुशलैः. 'कृतलब्ध' इत्यण्. धरणितलात्समुत्तिष्ठतीति धरणितलसमुत्थं. 'सुपि स्थ' इति कः. व्यानशे व्याप्तम्. अशू व्याप्तौ. 'अश्नोतेश्च' इति नुट्. शलभानामुत्थानं शलभोत्थं. 'सुपि-स्थ' इत्यत्र स्थ इति योगविभागात् सुपि भावे कः. शलभोत्थं उत्थिताः शलभा इत्यर्थः. क्रिया हि द्रव्यं लक्षयति सामीप्यात् ॥ ११

धूळीत्यादि। अनन्धं अन्धं भवतीत्यन्धंभविष्णुः. 'कर्त्तरि भुवः' इति खिष्णुच्. दृगध्यक्षं सूर्यं. 'रश्मिमाली दृगध्यक्षः कर्मसाक्षी त्रयीतनुः' इति वैजयन्ती. व्यघुक्षत् पिहितवती. गुहू संवरणे. 'शल इगुपधात्' इति च्लेः क्सः. येन दृगध्यक्षसंवरणेन शश्वद्रिपुतिमिरेत्यत्र 'सुप् सुपा' इति समासः. शश्वदिति व्यतिरेको लज्जाया हेतुः. सा तिरोभावे ॥ १२

तदन्वित्यादि। सुरासिन्धुर ऐरावतः. कुञ्जा दन्ता निकुञ्जाश्च. 'कु

न्तरालं सुरसिन्धुरमिव बहुकुञ्जबन्धुरं सिन्धुमिव लळितप्रवाळरागमेळितं कैलासमिव बहुविलासिनीलकण्ठं वैकुण्ठलोकमिवाकुण्ठतरविक्रमहरिसमाक्रान्तं शरभर्क्षतरक्षुमातंगसारंगप्रवंगमुखमृगनिवहनिनादमुखरितनिखिलदिशामुखं गहनतमं गहनपदमवगाह्य मार्गमार्गं सक्तुकं मार्गं मार्गमाश्रितरसं सञ्चरन्निषुतातितुषारधारानिर्वापितनिखिलकमलकुलः रोषपोषपालभृतं पोत्रिणां गणं पत्रिणां निकरेण यूथशः पोपुथन् सत्वरमागत्वरमात्तरभसव्यात्ततरवक्त्रकोटरं उद्धटतरनेत्रयुगळपरिभ्रमणपरित्रासितप्रपञ्चं पञ्चास्यमपि विपाटधाटया पाटयन्नष्टास्यतां प्रापयन् अपराण्यपि दुष्टसत्वानि मेधमानो वानमाथिकः तृषा विषीदन्नपयातमृगयातृषोपि वनमन्वेषमन्वेषमेषमाण एष परिमालिनीतीरमवततार ॥ ३

---

ञो दन्तेपि न स्त्रियां ' इत्यमरः. प्रवाळानां विद्रुमाणां पल्लवानां च. 'प्रवाळो वल्लकीदण्डे विद्रुमे नवपल्लवे' इति शाश्वतकोशः. विलासिनः सर्पाः. विलासो वृत्तं तद्वन्तश्च. नीलकण्ठः शिवः. नीलकण्ठा बर्हिणश्च. हरिर्विष्णुः सिंहश्च. 'शरभस्तु गजारातिरुत्पादश्चाष्टपादपि' इति वैजयन्ती. प्रवङ्गो वानरः. पुङ् गतौ. मार्गं मृगसंबन्धिनं. मार्गं पन्थानं. मार्गमार्गं अन्विष्यान्विष्य. इषुतातिरिव तुषारधारा तया. कमलानि मृगाः पद्मानि च. 'स्यात् कुरंगेपि कमलं' इत्यमरः. पोत्रिणां सूकराणां पोपुथन् अत्यर्थं निघ्नन्. यङ्लुगन्ताच्छता. पुथ हिंसायां दिवादिः. अनिदित्वान्नलोपः. विपाटधाटया शरसमूहेन. नष्टास्यतां आस्यरहितत्वं. पाटयन्नष्टास्यतामित्यत्र संहिताभेदादष्टास्यतामिति प्रतीतेर्विरोधाभासः. मेधमानः निघ्नन्. मिदृमेदृ मेधाहिंसयोः. थान्ताविताविति क्षीरस्वामी. धान्ताविति न्यासे. वनमाथं धावन् वानमाथिकः. माथशब्दः पथिपर्यायः. माथोत्तरपदेति ठक्. वनं जलमरण्यं च. अन्वेषमन्वेषं अन्विष्यान्विष्य. आभीक्ष्ण्ये णमुल्. एषमाणः गच्छन्. इषु गतौ परिमालिनी-

ततश्च ।

प ॥ विकचसरसिजोद्यत्सौरभीलोभनीया

चञ्चलमधुकरालीचारुझङ्काररम्या ।

श्रमभरमपनिन्ये मालिनी तस्य सद्यः

शिशिरविशदपाथोवाहिनी वाहिनी सा॥ १३

ग ॥ तदनु तदीयतीरभुवि विराजमानामाश्रमावनीमतिपावनीमाराद्विशा-

म्य द्वारोपशल्यनिवेशितपृथुवरूथिनीकोऽसौ पुरोहितपुरस्सरः पुरुविनय-

भास्वरोऽभ्यन्तरभुवमभ्यगाहत ॥ ४

ग ॥ ततस्तस्यां चन्दनस्पन्दनकुन्दमन्दारमाकन्दतिन्दुकसिन्दुवारतालहि-

---

तीरं मालिनीतीरे ॥ ३

ततश्च । विकचेत्यादि । मालिनी वाहिनी मालिनी नाम नदी. सौ-

रभ्यं सौरभ्यं सौरभ्यशब्दात् ङीष् हल इति लोपः. अत्र श्रमभरापनय-

नसाभिप्रायत्वेन बहूनां विशेषणानामुक्तत्वात् परिकरालङ्कारः. विशेषणसाभिप्राय-

त्वं परिकरः. मालिनीनामाङ्कितोऽयं श्लोकः. 'ननमयययुतेयं मालिनी भो-

गिलोकैः' ॥ १३

तदन्वित्यादि । द्वारोपशल्यभुवि निवेशितत्याश्रमबाधापरिहारार्थं. 'शे-

षाद्विभाषा' इति कप्. पुरः सरतीति पुरस्सरः. 'पुरोऽग्रतोऽग्रे' इति टः.

अभ्यगाहत प्राप्तवान् ॥ ४

तत इत्यादि । चन्दनादयः षड्विंशतिर्वृक्षविशेषाः. फलग्राहिभिरवन्ध्यैः

'फलेग्रहिरात्मम्भरिश्च' इति निपातः. असूर्यपश्यायां सूर्यमपि न पश्यन्त्यां.

न्तालतमालकृतमालकपित्थाश्वत्थत्वाचिसारकरेकंकेळिकुरवकमरुवकपनसपलाशनागपुन्नागबकुळसरळरसाळप्रियाळप्रायैः फलेग्रहिभिरुदग्रपलाशपेशलैरनेकैरनोकहैरसूर्यंपश्यायां क्वचिदक्षपादोपज्ञगहनतरन्यायविज्ञानवैज्ञानिकैः कुत्रापि कणादप्रणीततर्कप्रवीणैः कुत्रचिदसकलकापिलनिरीश्वरसांख्यसंख्यानिरतैः क्वापि फणीश्वरफणितसेश्वरसांख्यपारदृश्वभिः कुहचन जैमिनीयसूत्रविवरणपारीणहृदयैः कुत्रचन व्यासव्यासूत्रितोत्तरमीमांसोत्सरलचित्तैः कुहचित् शौनकीयशैशिरीयादिशिक्षाशिक्षणविचक्षणैः क्वचन पाणिनिभाषितव्याकरणविवरणधुरीणैः क्वचिदल्पे-

---

१ 'असूर्यललाटयोर्दृशि' इति खश्. शप् पश्यादेशश्च. नैयायिकवैशेषिकभेदेन द्विविधं तर्कशास्त्रं. अक्षपादोपज्ञं चासौ न्यायश्च अक्षपादेन प्रथममुपज्ञातः. अक्षपादकृतप्रथमारम्भ इत्यर्थः. 'उपज्ञोपक्रमं त' इति नपुंसकत्वे समासः. न्यायस्तर्कः. तस्य विज्ञाने वैज्ञानिकैः कुशलैः. 'प्रयोजनं' इति ठक्. सेश्वरनिरीश्वरभेदेन द्विविधं सांख्यशास्त्रं. फणीश्वरोऽनन्तः. पारदृश्वभिः पारं दृष्टवद्भिः. 'दृशेः क्वनिप्' इति क्वनिप् भूते. जैमिनीयं जैमिनिना प्रोक्तं. पूर्वमीमांसासूत्रं. पारीणं पारगामि. 'अवारपारात्' इति खः. अवारपारेति संघातविगृहीतविपर्यस्तग्रहणं. शौनकेन प्रोक्ता शौनकीया. 'शौनकादिभ्यश्छन्दसि' इति वेदे णिनिरन्यत्र छः. शैशिरीया शिशिरेण प्रोक्ता. अकारादिवर्णानां स्थानकरणप्रबोधिका ऋटुरषाणां मूर्धेत्यादिका शिक्षा. साधुशब्दानां व्याख्यानं व्याकरणं. यागक्रियाणामुपदेशः कल्पः. 'वर्णागमो वर्णविपर्ययश्च' इत्यादिना निश्चयेनोक्तं निरुक्तं. छन्दसां गायत्र्यादीनां विचितिः शास्त्रं छन्दोविचितिः. ग्रहणादीनां गणनशास्त्रं ज्योतिषं 'अधिकृत्य कृते ग्रन्थे' इत्यण्. 'संज्ञापूर्वको विधिरनित्य' इत्यवृद्धिः. धर्मशास्त्राणि याज्ञवल्क्यमनुव्यासादिप्रणीताः स्मृतयः. 'साकल्यासंगवचने पारायणतुरायणे' इत्यमरः. ऐतिहासिकैः इतिहासमधीयानैः.

तरकस्पपठनतत्परैः कुत्रचन निरुक्ताध्ययनदत्तचित्तैः कुत्रचिच्छन्दोविचितिविहितचेतनैः क्वचित् ज्योतिषाभ्यसनाभ्यधिकमानसैः कुहचन महितधर्मशास्त्रपारायणफलपरायणैः ऐतिहासिकैः पौराणिकैश्चातुर्वैद्यैस्त्रैविद्यैर्द्विवेदैरेकवेदैः पदकैः क्रमकैस्सायंप्रातिकाग्निहोत्रोपान्तिपरास्तसमस्तदुष्कृतस्तोमैरास्तिकैरस्तशैवास्तिकविभवग्रहैश्च ब्रह्मर्षिकुलैः ब्रह्मवर्चसपरिबृंहितदीप्तिभिः देद्युत्यमाना उल्लोलतरमालिनीकल्लोलहल्लोहलाम्रेडिताध्ययनघोषबधिरितनिखिलजनकर्णरन्ध्रा विश्लथितशाश्वतिकविरोधैः श्वापदगणैः शेश्रीयमाणवल्लीवलया ललित-

---

इतिहासो महाभारतात्मा. इतिहशब्दः पारंपर्योपदेशेऽव्यय. इतिहास्तेऽस्मिन्नितीतिहासः. आस्तेराधिकरणे 'हलश्च' इति घञ्. पौराणिकैः पुराणान्यधीयानैः. पुराणान्यष्टादश श्रीभागवतादीनि. 'तदधीते' इत्यर्थे 'आख्यानाख्यायिकेतिहासपुराणेभ्यश्च ठग्वक्तव्य' इति ठक्. चतुरो वेदानधीयानाश्चतुर्वेदाः. द्विगुत्वादणो लुक्. चतुर्वेदा एव चातुर्वैद्याः. ष्यञि 'चतुर्वेदस्योभयपदवृद्धिश्च' इत्युभयपदवृद्धिः. त्रैविद्यैः त्रिभागा विद्या त्रिविद्या वेदत्रयं तद्विदस्त्रैविद्याः. 'क्रतूक्थादी'त्यत्र 'विद्यान्तादनङ्गक्षत्रधर्मत्रिपूर्वात्' इत्युक्तेस्त्रिपूर्वत्वादण्. द्वौ वेदावधीयाना द्विवेदाः. 'द्विगोर्लुक्' इत्यणो लुक्. एकं वेदं अधीयाना एकवेदाः. अत्राप्येकापूपीत्यादिवद्द्विगुत्वादणो लुक्. एकापूपीति तद्धितार्थेति समाहारे समासः. ननु अनेकविषयः समाहारो नैकस्य संभवति न न संभवति कथं? . इहैकमपूपं कश्चित् कृपणो ददनेकमिव मन्यते. तथा दाने श्रद्धातिशयादपूपस्य महत्त्वाद्वानेकस्मिन् यः संभ्रमस्तमेकस्मिन्नपि करोति. एकतनप्रतिग्रहीता कृपणो व्याख्यातः. तत्रारोपितबहुत्वाश्रयः समाहारः. इति सिद्धं भवति इति हरः. विद्यते ज्ञायतेनेन धर्माधर्मादिकमिति वेदः. 'हलश्च' इति घञ्. पदकैः पदमधीयानैः. क्रमकैः क्रममधीयानैः 'क्रमादिभ्यो वुन्' इति वुन्. सायंप्रातर्भवं

मुत्पुच्छ्यमानैर्वातमजपोतसन्तानैस्सन्तन्यमानकामनीयका विटपिविटपो-त्करावलग्नवल्कलाजिनजालैर्जाज्वल्यमाना विडंब्यमानवितानविवि-धविधानविवशमानसेन माणव्येन देदीप्यमानांकणा पर्णशाला भृशम-वर्णहारिणीरवर्णनीयगुणमनोहारिणीरयमति कुतुकमवलोकयन्नभिगम्य लोकमहितानुभावानखिलवैखानसानाधिगतविनयमवनाममवनामं तदुदि-ताशिषो लाभंलाभं च सञ्चरन् संश्चितनन्दतया विरिञ्चिविष्ट-पाविष्टमिवात्मानम्मन्यमानो विलोकन एव वितूस्तयतो मुनिप्रकाण्डस्य कण्वस्य कुलपतेर्मन्थरचलत्कन्धरं रोमन्थायमानैरेणगणैराकीर्णबाह्यां-

---

सायंप्रातिकं अव्ययसमुदायत्वाद् ट्युट्युलौ नेष्टौ. कालात् ठञि टिलोपः. परलोको-स्तीति मतिर्येषां ते आस्तिकाः. शौवस्तिकः श्वस्तनः 'श्वसस्तुट् च' इति शै-षिकष्ठञ्. ग्रह आग्रहः. ब्रह्मवर्चसं वृत्ताध्ययनसंपत्तिः 'ब्रह्महस्तिभ्यां वर्चसः' इत्यच् समासान्तः. देद्युत्यमानाः अत्यर्थं द्योतमानाः. द्युत दीप्तौ यङ्. ह-ल्लोहलः कोलाहलः. आम्रेडितः द्विगुणितः. शाश्वतिको नित्यः. 'येषां च वि-रोधः शाश्वतिकः' इति सूत्रनिर्देशात् ठक्. श्वापदैः हिंस्रसत्वैः. शेश्रीयमा-णा अत्यर्थमाश्रीयमाणाः. श्रिञ् सेवायां. यङन्तात् कर्मणि शानच्. उत्पु-च्छ्यमानैः उदस्यमानपुच्छैः 'पुच्छभाण्डचीव' इति णिङ्. पुच्छादुदसने पर्यस-ने वा. यथेच्छमिच्छामनतिक्रम्य. वातमजा मृगविशेषाः. खश्प्रकरणे वातशु-नीतिलशर्द्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानं. वातं प्रति धावन्तीति वातमजाः. जाज्वल्यमानाः अत्यर्थं दीप्यमानाः. विडंब्यमानानि अनुक्रियमाणानि. विता-नस्य यज्ञस्य. विधानानि कर्माणि. माणव्येन माणवसमूहेन. 'ब्राह्मणमाणव-बाडवाद्यत्' इति यत्. अवनाममवनामं अवनम्य अवनम्य. लाभं लाभं ल-ब्ध्वा लब्ध्वा च सञ्चरन्. 'आभीक्ष्ण्ये' इति णमुल्. 'आभीक्ष्ण्ये द्वे भवत इ-ति वक्तव्यं' इति द्विर्वचनं. विरिञ्चः ब्रह्मा. वितूस्तयतः तूस्तानि पापानि वि-

कर्णां पूर्णकान्तिशालां पर्णशालां अनतिदूरे निर्वर्णयामास ॥ ५ ॥

५॥ स विधाय बहिः पुरोधसन्तं
द्रुतमभ्यन्तरमेयिवान्विनीतः ।
अनवेक्ष्य कमप्यवोचदुच्चै-
रिह को वा भवतीति भूमिपालः ॥ १४

शेषेण घ्नतः. 'मुण्डमिश्रश्लक्ष्ण' इति णिच्. तूस्ताद्विहतौ. रोमन्थायमानैः रोमन्थं वर्तयद्भिः. कर्मणो रोमन्थत' इति क्यङ्. पूर्णकान्तिं शलति गच्छतीति पूर्णकान्तिशाला. शल श्वल चल गतौ. सद्भिः शाल्यते श्लाघ्यते इति 'अकर्तरि च' इति कर्मणि घञ्. शाडृ श्लाघायां. निर्वर्णयामास ददर्श ॥ ५

स इत्यादि. पुरोधसं बहिः विधाय द्रुतं अभ्यन्तरं एयिवान्. कण्वविलोकनौत्सुक्येन तदुटजसमीपमुपगम्य अध्ययनश्रवणाभावादिना तदसान्निध्यमाशङ्क्य पुरोहितनियोज्यत्वादृत्तान्तपरिज्ञानाय स्वयमेवाभ्यन्तरं गतवानित्यवगन्तव्यम्. द्रुतमिति कण्वदर्शनौत्सुक्यं व्यज्यते॥ एयिवान् प्राप्तवान्. 'उपेयिवाननाश्वानन्नूचानश्च' इति निपातः. नात्रोपसर्गस्तन्त्रं. एकवचनञ्च. तेनान्योपसर्गान्निरुपसर्गाच्च भवतीति वृत्तिः. विनीत इत्यनेन उच्चैःकथनस्यानवेक्षणमेव हेतुः. नाविनय इति प्रकाश्यते. 'उच्चैः प्रकथनं हासं ष्ठीवनं कुत्सनं तथा। जृम्भं गात्रभङ्गं च पर्वस्फोटं च वर्जयेत्. ॥ इति कामन्तकीयेन उच्चैःकथनस्य निषिद्धत्वात् ॥ १४

ग ॥ अनन्तरमुटजाभ्यन्तरादायान्तीं मेदुरमुदिरोदरादिव सौदामिनीं समन्ततस्समुदंचता कांचनकांतिवंचनचुंचुना सुषमासुधाप्रवाहेण प्रपंचाभ्यन्तरमभिषिंचन्तीं पंचबाणविजयवैजयन्तीमिव पंचजनहृदयसंचलनायाचलातले संचरन्तीं कांचन कांचनपांचालिकामिव प्राणपंचकांचितां पंचशरपरब्रह्मविद्यामिव नेत्रसंचरविद्योतमानां इयन्तं कालमनन्तसीमान्तिनीनिर्माणपरिचयपरिणतां करचातुरीमिव चतुराननस्याकल्पांगनासर्गकल्पितसौन्दर्यसारोत्करैरिवोत्पादितां प्रतिप्रतीकसमाकृष्टविष्टपत्रयाधिवासिजनदृष्टिसन्तानां कुशेशयकुलेष्वकृत्रिममैत्रीरसात् पृथगवस्थानाक्षमतया सहावस्थिततरुणतरणिकिरणव्यतिकरेणेवात्मनोनुहरमाणेषु मराळनिकरेषु कराळरभसेनेव रागभरभरिततरुणजनहृदयाक्रमणेनेव च शोणतरेण चरणनळिनयुगळेन धरणितलं निर्मलमाणिक्यमणिनिर्मितमिव निर्माय

---

अथात्मनिवेदनमाकर्ण्य सखीभ्यां सहागच्छन्तीं शकुन्तलां ददर्शेत्याह ।

**अनन्तरमित्यादि**. मुदिरो मेघः. समुदञ्चता समुद्गच्छता. वञ्चनचुंचुना वञ्चनप्रसिद्धेन 'तेन वित्त इति' चुंचुप्. वित्तः प्रसिद्धः. पञ्चजना मनुष्याः. सञ्चलनाय सञ्चलनं कर्तुं 'क्रियार्थोप' इति चतुर्थी. 'कम्पने चलिः' इति मित्वाच्चलयति शाखामितिवत् कम्पने ह्रस्वः. पाञ्चालिका पुत्रिका. प्राणपञ्चकाञ्चितां प्राणपञ्चकं प्रापिताम्. सञ्चरो मार्गः. 'गोचरसञ्चर' इति निपातः. चातुरी चातुर्यम्. प्रतिप्रतीकं प्रत्यंगम्. वीप्सायामव्ययीभावः. सहावस्थितस्य तरुणतरणिकिरणस्य व्यतिकरेण सम्पर्केणेव. रभसेनेव आक्रमणेनेव. इति त्रयाणां शोणतरेणेत्यनेन संबन्धः. शोणतरत्वस्य हेतुरुत्प्रेक्ष्यते. इति हेतूत्प्रेक्षा. आत्मनः अनुहरमाणेषु अनुकुर्वाणेषु. तुल्यार्थयोगात् षष्ठी. मराळा हंसाः. निर्माय निर्माय विधाय विधाय. नि-

निर्माय निर्मायनर्म संचरन्तीं स्वाभाविकगात्रसौरभलोभादुपरिपरिपतन्ती मधुरसालाभाविधुरमानसा कळनिनदहंसकासितलाळितचरणारविन्दसन्दर्शनेन मरन्दरसपिपासया तरसावतरन्ती भ्रमरपरम्परेति भ्रमावहेन तिमिरभरवत् प्रकाशमानेन जंघान्तलंबिना केशपाशेन दिनेपि दर्शितनिशासमावेशां वदनहरिणांककिरणबाणाक्रमणशंकया दूरादेव निवारणाय निश्चितमानसैर्न्नासीरसीमनि संस्थितैः कैश्चन कचभरतिमिरवरूथिनीनाथैरिव कराळैरळकनिकरैर्गर्हितबर्हातपत्रां वालेन्दुमपि कळंकितमिवातन्वता फालान्तलसितेन मृगमदतिलकेन शिथिलितयुवलोकधैर्यसारां तरलतरकलिन्दकन्यकातरङ्गभाङ्गिनिरासचतुरयोर्विजितमदनचापलतयोर्विहितमदनचापलतयोर्भ्रूलतयोर्विलासैस्स्वारसिकैरायासितसकलरासितलोकां रुचिरतरचकोरगर्वसर्वस्वनिर्वासनव्यसनिनोरात्मसुहृदमवतंसोत्पलमुपगूहितुमुत्पन्नतर्षयोरिव श्रोत्रपरिसरं प्राप्तयोरपत्रपापात्रीकृतशतपत्रपत्रयो-

---

र्मायं अकृत्रिमं नर्म लीला यस्यां सञ्चरणक्रियायामिति क्रियाविशेषणम्. स्वाभाविकैः स्वतस्सिद्धैः. 'स्वाभाविकस्वार्थिकादेरञ्न भाष्यप्रयोगतः' सुरभेर्भावः सौरभं 'इगन्ताच्च लघुपूर्वात्' इत्यण्. हंसेन कासितं शोभितं. हंसकेन पादकटकेन आसितं बद्धं च. मरन्दरसः मकरन्दः. 'केशाः शिरसिजमूर्द्धजकचचिकुरशिरोरुहाः स्मृता वालाः' इति रत्नमाला. नासीरसीमनि अग्रभागे. कराळैः भीषणैः उज्ज्वलैश्च. मृगमदः कस्तूरी. चापल्लता प्रशस्तं चापम्. चापलश्चापलवान्. अर्शआद्यच्. तस्य भावस्तत्ता. विहिता मदनचापलता याभ्यां. स्वारसिकैः स्वरसभवैः. अध्यात्मादित्वाट्ठक्. व्यसनिनोः आसक्तयोः. 'व्यसनं सक्तिविपदोः' इति वैजयन्ती. व्यसनं तात्पर्यमिति कादंबरीव्याख्यायाम्. 'प्राणिनिकुञ्जः प्रसृतिः' इत्यमरः. निकुञ्जः

श्शफरमिलयोर्नेत्रयोः प्रसृतिसमितयोस्सितासितैः कान्तिकन्दलैरिन्दीवरारविन्ददलसन्दानितसुन्दराकारदामजालालंकृतमिव व्योमतलं व्यातन्वन्तीं बिमलतरसुवर्णार्णोजकर्णिकासवर्णेन सुकुमारतरसूनमयशरसावधीरणधीरतरतरुणजनवेधायैकत्र निक्षिप्तेन रतिनालीकनालीकयोर्नलिकयुगलेनेव वदनकान्तिसरसि विहरमाणयोर्जिघत्सयान्योन्यमभिपततोर्नयनशफरयोर्निवारणानिपुणसेतुचातुरीमूरीकुर्वता रदनच्छदाबिम्बरसनेच्छया भ्रूलताळम्बमानकीरपोततुण्डानुकारिणा वज्रपुष्पदर्पापहारिणा हारिणा नासानाळेनासादिताभां दर्पकमणिदर्पणदर्पभरापसारणतत्परेण विमलतरकपोलपालियुगलेन परिहसितभृशमहिततराणिमाणिरामणीयकां सन्ततनिजानुचिन्तया सारूप्यलंभनादिव रक्तीकृतसमस्तलोकचित्तेन दरोल्लसितपल्लवोदरतुल्यकुल्येन विद्रावितविद्रुमेणाधरीकृतसुधारसेनाधरेण विधुरीकृतबिंम्बिरुचिकदंबां रुचिरतररदनच्छदरुचिच्छुरितया माहितमल्लि-

---

किञ्चित्कुञ्चितः. 'प्रञ्चीयते प्रसार्यत इति व्युत्पत्या प्रसृतिशब्दो विस्तृतांगुलौ वर्तितुमर्हति. तथापि विरुद्धलक्षणया निकुब्जपाणौ वर्तत' इति सुबोधिन्याम्. सन्दानितं बद्धम्. अर्णोजं तामरसम्. नालीकनाळिकः कामः. 'नालीकमब्जे बाणे ना' इति वैजयन्ती. नळिकयुगळेन द्रोणिचापयुग्मेन. जिघत्सया अदनेच्छया. बिंबरसः बिंबिकाफलरसः. कीरपोतः शुकपोतः. 'वज्रपुष्पं पुष्पं तिलस्य यत्' इत्यमरः. कपोलपाळीति पादाभिश्रपाशहस्तभित्तिस्थलपाल्यादिभिः इति भोजोक्त्या 'प्रशंसावचनैश्च' इति समासः. तराणिमाणिं स्फटिकम्. तुल्यकुल्येन सदृशेनेति यावत्. 'अपूर्वपदादन्यतरस्यां यड्ढकञौ' इत्युक्तेस्तत्र साधुरित्यर्थे यत्. बिंबी बिंबिका. शिखरनिकरं 'पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः.' उल्लाययमानां वञ्चयन्तीम्. लिय इत्यत्र चकारात् प्र-

कावल्लिकालिकातुल्यया रदनमतल्लिकावल्या शिखरनिकरमुल्लापयमानां कटाक्षबाणोत्तेजनमणिवर्तकायमानेन हाटकताटंकयुगळप्रकाण्डेन परिमण्डितरुचिरगण्डमण्डलां करयुगलानवरताजितसकलकमलकुलामेनामाश्रित्य श्रमरहित एव निखिलनीरजन्मकदम्बानि निर्मूलयिष्यामीति निश्चित्यादर्शीयास्वतामासेदुषा प्रसेदुषा कुमुदबन्धुनेव बन्धुरवदनबिंबेन वल्गूयन्तीं शम्बरवैरिविजयकम्बुबींबोकविडंबिना पाञ्चजन्येनेव भद्रश्रीभर्तृभुजसमाश्लेषसमुचितेन देवदत्तेनेव कर्णानन्ददाननिरतनिनदेन कण्ठकाण्डेन कुण्ठेतरकान्तिकन्दलां पृथुतरपयोधरप्राथिवधिरोपत्यकोल्पन्नकल्पलतिकायमानमाकल्पकल्पितानल्पकान्तिभारतमातिरुचिरचांपेयमालाबालमित्रं ललितबाहायुगलं लोकमनसासाकमालोलयन्तीं हारितरतार-

लम्भने आत्मनेपदम्. उत्तेजनं तीक्ष्णीकरणम्. वर्तकः शाणः. ताटङ्कप्रकाण्डस्य प्रशस्तस्य ताटङ्कस्य. 'कर्णपूरन्तु पुष्पाद्यैस्ताटङ्को दन्तकादिभिः' इति वैजयन्ती. 'गण्डो गल्लः कपोलश्च हनुस्तुल्यार्थवाचकाः' इत्यभिधानरत्नमाला. करयुगळेन रश्मिद्वयेनेत्यपि स्फुरति. निर्मूलयिष्यामि उन्मूलयिष्यामि. आसेदुषा प्राप्तवता. प्रसेदुषा प्रसन्नेन. वल्गूयन्तीं मधुराम्. वल्गु पूजामाधुर्ययोः इति सुब्धातुवृत्तिः कण्ड्वादौ. बिंबोको विलासः. भद्रस्य श्रीभर्तुः विष्णोः. श्रीभर्तुरिति धवार्थस्य भर्तृशब्दस्य 'याजकादिभिश्च' इति समासः भद्रश्रीश्चन्दनं च. 'चन्दनोस्त्री मलयजो भद्रश्री रोहणद्रुमः' इति वैजयन्ती. भद्रश्रीभर्तृ इत्यत्र 'जनिकर्तुः प्रकृतिः' इति सूत्रोक्त्या तृचः समासनिषेधोऽनित्यः. देवदत्तं नाम पार्थस्य शंखः. कर्णस्य राधेयस्य च. दाने खण्डने च. 'चाम्पेयश्चम्पको हेमपुष्पकः' इत्यमरः. बालमित्रं अत्यन्तबन्धुं सदृशमिति यावत्. आलोलयन्तीं आलोलं कुर्वन्तीम्. कोकनद

हारमृणालनालकबळनकलितकुतुकोपनतकोकमिथुनशंकाभंकूरयता कोकनदकोरकशोकदायिना शशांकेनेव नक्षत्रमालालंकृतेन अध्यापकेनेव मध्येमाणवकोपसंगतेन वल्गुना वक्षोजयुग्मेन कुग्मलितशातकुंभकुंभशोभां पयोधरधराधराधित्यकापतल्लावण्यतरंगिणीचण्डवेगोत्खातापिचण्डस्थलसंश्लेषादिव पीनपीनेन पुळिनदेशदेशीयेन सृष्टिसमये स्रष्टुरात्मभुवोऽपि दत्तचित्तजन्मना मन्मथरथनर्मनिर्मथनकर्मठेन सुकृतिजनसुलभेन घनतरेण जघनभरेण जगदन्तरासीनजनतान्तरंगं तरंगयन्तीं मृदुहसितवसुधारससमास्वदनोत्सवसमुत्सुकतया सहसाभिजातनाभिकुहरादारोहता कचकलापावलोकांकुरितकलापिशंकयान्तरावस्थितेन कालव्यालपोतेनेव मकरकेतुमहोत्सवविधित्सुना तारुण्यतान्त्रिकेण मदनमन्दिरपुरोभागसमुत्थापितेनेन्द्रनीलकेतुदण्डेनेव च विरोचमानया रुचिरतरया रोमराजीलतया विराजमानां गातिविषयविलासविशेषमुमुषिषया जघनपुळिनसमुषितहंससन्दोहसन्देहवहेन नितरां वरेण गौरांबरेण परिहितां

रक्तोत्पलम्. 'सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः' इत्यमरः. मध्यमाणवकं माणवकानां वटूनां मध्ये. 'पारे मध्ये षष्ठ्या' इत्यव्ययीभावः. मध्ये अन्तरान्तरा माणवविषयेण कोपेन च मध्येन्तराळे. माणवकेनार्द्धहारेण. 'अर्द्धहारो माणवकः' इत्यमरः. लावण्यमेव तरंगिणी नदी. पिचण्डमुदरम्. स्रष्टुरात्मभुवोऽपि स्वनिर्मातुर्द्धातुरपि. यद्वा स्रष्टुर्ब्रह्मणः आत्मभुवः कामस्यापि. सुधा सर्पाणां पेयोमृतविशेषः. काळव्याळः कृष्णसर्पः. विधित्सुना विधातुमिच्छुना. तारुण्यमेव तान्त्रिकस्तेन मुमुषिषया मोषितुमिच्छया. मुषस्तेये. सन्. 'रुदाविदमुष' इति कित्वादगुणाभावः. प्रतितरुणि तरुण्यां तरुण्याम्.

प्रतितरुणि चरणरवतरुणजनहृदयपरिणहनतितारिषु कुसुमेषु निहितमहि-
तहेमदामायमानेन मंचु शब्दायमानेन रतिरमणमणिनगरलसितकनक-
वरणचातुरीधुरीणेन प्रतिकलपरिवरीवृध्यमानं दुर्वहतरजघनभरं निय-
मितुमिव निबद्धेन मणिगणाञ्चितेन काञ्चीगुणेन सञ्चिताभां मंजुलकेत
कीमञ्जरीमंजुरीतिमावहन्त्यान्नीलकण्ठकण्ठकान्तिलंघनजंघालाभ्यां जंघा
भ्यां करिवरकरकरभरंभास्तंभडंभस्तंभनाज्जृम्भितोरूरोरुयुगभूरिभारभर
णायोत्तमाङ्गनिहितेनोत्तंभेनेव जानुयुगलेन जातबहळशोभां निजमन्दि
राजिरमन्दगमनेप्यमन्दां म्लानिमुद्वहता प्रत्यग्रपत्राग्रप्रत्युप्तरमणीयमु-
क्ताफलक्लिप्तरामणीयकेन कळधौतकमलेनेव मङ्गलतरांगुलिनिकरांच-
लोदंचितनखरमणिपेशलेन पल्लवपेलवेन पदतलजेनोल्लसन्तीं वनस्थ-
लीमिव रुचिरतमालकाननां सरसीमिव भुवनमनोहरां मधुवैरिणमिव
रुचिरपयोधररुचिं गिरिशमूर्तीमिव पुष्करनेत्रपुष्कलाभां अनन्यसामा-
न्यलावण्यवेणीतिरोहितामप्यातिरोहितां अतिरोहितामप्यातिश्यामां श्या-
मामपि ज्यायसीं वर्णनापथमनवतीर्णामातीथिसभाजनाय करकल्पिता-

---

परिणहनं बन्धनम्. तितनिषुः कर्तुमिच्छुः. परिणहनं तितनिषुः. नलोक इति षष्ठीनिषेधः. वरणः प्राकारः. प्रतिकलं कलायां कलायां. कला कालभेदः. क्षणे क्षण इति यावत्. परिवरीवृध्यमानं अत्यर्थं वर्द्धमानम्. 'जंघालोतिजव' इत्यमरः. उत्तम्भो नाम भरोद्वहनार्थं शिरसि ध्रियेयः पदार्थविशेषः. रुचिरं तमालकाननं यस्यां. रुचिरतमालककाननं यस्यास्ताम्. यद्वा रुचिरतमालकं आननं यस्यास्ताम्. तमालकं तिलकम्. भुवनं जलं लोकश्च. पुष्करं व्योम कमलं च. नेत्रं नयनं वसनं च. आतिरोहितां

र्घ्यभाजनाभ्यां सखीभ्यां समुद्भासितपार्श्वभागां कामपि कुमारीं परि. लोकमपरिलोकितचररुचिररूपां रूपयामास ॥ ६

चिचिन्त चैवं चिचीयमाणचित्तः किंचिदङ्कुरितचित्तजन्मा स धात्रीपतिः ॥ ७

प ॥ कैश्यं विश्वैकवश्यं शिवशिव वदनं शारदेन्दुप्रकाशं
यूनां मानापनोदि श्रमजलजटिलं चित्रकं चित्तहारि ।
वक्षोजावक्षताभौ मणिमयकलशीगर्वनिर्वापणोत्कौ
बाहू रम्यौ च का वा विसृमरसुषमाकन्दलीयं नताङ्गी ॥ १५

---

अतिरक्तां श्यामां श्यामवर्णां यौवनमध्यस्थां च. ज्यायसीं वृद्धतराम्. प्रशस्ततरां च. परिलोकं लोके. 'परिप्रती अपि सप्तम्यर्थौ' इति माधवोक्तेर्विभक्त्यर्थेऽव्ययीभावः. रूपयामास दृष्टवान्. रूपाद्दर्शने इति णिच्. ६

**चिचिन्तेत्यादि**. चिन्तितवान् चिति स्मृत्याम्. इदित्त्वमुपधालोपाभावफलकम्. तण्यन्तस्य न स्यादिति णिचोऽनित्यत्वम्. चित्रीयमाणमाश्चर्यमनुभवत्. 'नमोवरिव' इत्याश्चर्यानुभवे क्यच्. ७

**कैश्यमित्यादि**. कैश्यं केशसमूहः. 'केशाश्वाभ्यां' इति यञ्. एकं मुख्यम्. वश्यं वशीकरणसाधनम्. अन्यवस्तुवदेतत् क्वाचिन्न व्यभिचरतीति भावः. शिवशिवेति विस्मयानुभावः. शारदः शरदि भवः. इह भुवने. कामो मां न क्षोभयेदिति मानः. चित्रकं तिलकम्. चित्तहारि मनोहरम्. उत्कौ उत्सुकौ. रम्यौ अनुपमौ इति भावः. प्रसृमरा प्रसरणशीला. कन्दली अंकुरः ॥ १५

लावण्यं किमु वर्ण्यते वरतनोरस्या जगन्मोहनं
यस्या वीक्षण एव हन्त चलितस्वान्तास्सुपर्वांगनाः ।
तत्तादृक्परमाभिरूप्यविसरद्दर्पोद्धताश्चापि ता
योषित्तामनिमेषतामपि निजां निन्दन्ति नन्दन्ति च ॥ १६

हृदयमिदमपंकं पङ्कजाक्ष्याममुष्यां
बत कुतुकसमेतं जायते मे किमेतत् ।
नियतमियमुदषीदन्वये क्षत्रयोग्ये
प्रसजति नहि चेतः पौरवाणामकार्ये ॥ १७

---

**लावण्यमित्यादि।** लावण्यं हि नामावयवसंस्थानाभिव्यङ्ग्यं निखिलावयवव्यतिरिक्तं किञ्चिदेव तत्वान्तरमिति ध्वनिकारः. किमु वर्ण्यते. वर्णनापथं नावतरतीति भावः. एतावदेव कथनीयमित्याह. यस्या इति. वीक्षण एवेत्यनेन सुराङ्गनालावण्याल्लावण्यस्यात्यन्तोत्कृष्टता प्रकाश्यते. आभिरूप्यं मनोज्ञतां. योषित्तां स्त्रीत्वं निन्दन्ति. अनिमेषतां नन्दन्ति. इति यथासंख्यमलङ्कारः ॥ १६

**हृदयमित्यादि.** अपङ्कं निर्दोषं. रजस्तमोभ्यामनभिभूतम्. उदैषीत् उद्भूता. इटकिटकटी गतावित्यत्र ई इति प्रश्लिष्टो धातुः. प्रसजति प्रसक्तं भवति. षज संगे. 'दंशसञ्जस्वञ्जां' इति नलोपः. पौरवाणां

'स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः'

इति दण्डी ॥ १७

नूत्नं वधूरत्नमिदं विमोहनं
विश्वैकविस्मापकरूपमात्मभूः ।
कान्ते सुवर्णे भुवनैकभूषणे
संयोज्य कस्मिन् कृतकृत्यतामियात् ॥ १८

इति सञ्चिन्तयन्नन्तरनन्ताधिपतिस्तदा ।
तस्थौ रूपामृतं तस्याः पायंपायमयं तदा ॥ १९

ग ॥ शकुन्तलापि महितानुभावं मनसिजोपमानमेनमालोक्य किमपि कन्द-
लितकन्दर्पविकारेति विचारयामास ॥ ८

प ॥ साक्षाल्लक्ष्मीसहायः किमयमयमहो कौस्तुभोद्भासिकण्ठः
श्रीकण्ठो वा स वामे वपुषि गिरिसुतां नित्यमाधत्त एव ।
किं वा नाळीकबाणस्स खलु पुरभिदा वीर्यशेषो वितेने
को वा धन्यो युवा मे परिलसति पुरो लोचनानन्दकन्दः ॥ २०

---

**नूत्नमित्यादि**. नूतनं अपूर्वमित्यर्थः. भुवनैकभूषण इति वधूरत्न-मित्यत्रोपमाया बोधकम्. आत्मभूर्ब्रह्मा. कान्ते मनोहरे. सुवर्णे कनके. कस्मिन् संयोज्येत्यनेन अपि नाम मयि संयोजयेदिति प्रार्थना व्यज्यते. १८

**इतीत्यादि**. पायं पायं पीत्वा पीत्वा. अन्तस्सञ्चिन्तयन्नित्यनेन गां-भीर्येणास्य चित्तविकारो बहिर्न प्रकटोभूदिति प्रकाश्यते. १६

**शकुन्तलेत्यादि**. कन्दलितः अंकुरितः. ८

**साक्षादित्यादि**. लक्ष्मीसहायो विष्णुः. श्रीकण्ठः शिवः. अत्र भे-दोक्तिरूपेण सन्देहेन तद्गुणानां बाहुल्येनात्र संभवो व्यज्यते. २०

आस्यं त्वेतस्य दास्यं दिशति च शशिने विश्वविक्षोभदीक्षा-
दक्षश्चायं कटाक्षः स्फुटमयमधरो वल्लभः पल्लवानां ।
फालं बालेन्दुरम्यं हसितमिदमहो सान्द्रचन्द्रांशुवंश्यं
वाचा किं रूपमेतद्दशि भवति सुधासारपूरानुसारि ॥ २१

ग॥ एवं चिन्तयन्ती सकलनयनशीतार्चिषं तं अर्चिचिषन्ती मन्दमन्दमुपगम्य व्रीळासाध्वसविहस्तेयमालीहस्तादर्हणोपकरणान्यादायार्हतेस्मै दूरेत्यायात्यादरं कथमपि वरिवस्यां विधायास्य कुलनामादिकाकलने बलवदभिमनायमाना मनागपि पर्यनुयोक्तुमपारयन्ती निभृतनिभृतमेनमनवलोकयन्ती भुवमुल्लिखन्ती परमवनतवदनारविन्दमवातिष्ठतेस्म॥ ९

तदा प्रियंवदाभिधाना तत्सखी सख्या सव्याजमालोक्यमानमेनं विलोक्य तदीयानुभावमसौ विदितवती गूढमुदितवती ॥ १०

---

**आस्यमित्यादि**. पल्लवानां वल्लभः प्रियः सदृश इति यावत्. समस्वभावा हि प्रिया भवन्ति. वंशे भवं वंश्यम्. दिगादित्वाद्यत्. २१

**एवमित्यादि**. अर्चिचिषन्ती अर्चयितुमिच्छन्ती. अर्हते प्रशस्ताय. 'अर्हः प्रशंसायां' इति शता. दूरेत्याय दूरभवाय 'दूरादेत्य' इत्येत्यः. कथमपि कथञ्चित्. अत्र विहस्तत्वं हेतुः. वरिवस्यां पूजाम्. अभिमनायमाना उत्सुकमानसा. भृशादित्वादभवत्यर्थे क्यङ्. ९

**तदेत्यादि**. सव्याजमालोक्यमानमिति सव्याजावलोकनं रत्यनुभावः. तदीयस्तस्य संबन्धी. अनुभावः रूपामृतं पायं पायमिति पूर्वोक्तः. उदितवती उक्तवती. १०

प ॥ आकारेण सुखावहेन सकलां संभावयन्नो जनीं
धन्यात्मा खलु काश्यपीपतिरयं स्यादित्यहं लक्षये ।
श्रुत्वैवं हृदयंगमं निगदितं सा भंगुरभ्रूलतं
बाला नातितरोषरूषितदृशा सन्तर्जयामास ताम् ॥ २२

ग ॥ अनन्तरमितरा पुनरनसूयाभिधाना तस्य महासत्वस्य सतत्वमवजिगमिषुरेनमेवमवोचत ॥ ११

प ॥ अयि विविदिषा कापि प्रष्टुं प्रचोदयतीह मां
तिलकितमलं किं वा गोत्रन्त्वया मधुराकृते !
अपि विरहितः को वा देशो भृशं परितप्यते
वद पदमिदं कस्मादस्मिन् क्षणे समलंकृतम् ॥ २३

---

**आकारेणेत्यादि**. आकृत्या गूढानिरीक्षणादिना. काश्यपीपतिर्भूपतिः. शकुन्तलायाः पतिश्च स्यादिति संभावनायां लिङ्. हृदयंगमं मनोनुकूलम्. २२

**अनन्तरमित्यादि**. महासत्वस्य

'सत्वं जवबलप्राणकायबुद्धिषु वर्तते ।
स महासत्व इत्युक्तो धीरपर्यायनामकः'

इति भावप्रकाशः. एतदन्येषामपि धीरोदात्तगुणानामप्युपलक्षणम्. सतत्वं परमार्थम्.

'रूपं सत्वं सतत्वं च स्वरूपं च'

इति वैजयन्ती। अवजिगमिषुः अवगन्तुमिच्छुः. ११

**अयीत्यादि**. कापि इयतीति वक्तुमशक्या. विविदिषा वेदितुमिच्छा.

उदित इति तयोचे सोथ रंभोरु! पूरोः
पुरुयशासि कुले मां विद्धि जातं सुजाते ।
वनभुवि पुनरागामेष दुष्षन्तनामा
नृप इह भगवन्तं कण्वमानन्तुकामः ॥ २४

ग॥ तदनु मुदितहृदयया प्रियंवदया सफलावलोकनस्स भगवान् इमामतिथिजनसभाजनाय नियुज्य किमपि कार्यान्तरमन्तरेण दवीयस्तरं विपिनान्तरार्थितः प्रयातस्तदस्यां कलिन्दकन्यकाकान्तिकन्दळभंगदायामळिन्दभुवि मन्देतरमरन्दपानतुन्दिलमंजुगुंजदिन्दिन्दिरसुन्दरीवृ -

---

प्रचोदयाति. अवचना स्थातुं न शक्नोमीति भावः. तिलकितं तिलकवत् कृतम्. मधुराकृते अनेन 'यत्राकृतिस्तत्र गुणा वसन्ति' इत्युक्तत्वात्सौशील्यादिसर्वगुणसंपन्नत्वमुक्तम्. वदेत्यनेनौत्सुक्यं ध्वन्यते. २३

**उदित इत्यादि**. पुरुयशसीत्यनेन पूरुवंशजानां प्रसिद्धत्वात्तान्निवासभूतस्याप्यनुक्तासिद्धत्वेन को वा देश इत्यस्योत्तरमपि दत्तमिति मन्तव्यम्. दुष्षन्तनामेति विधिगर्भं विशेषणम्. अनेन किं वा गोत्रमित्यत्र नाम्नोपि जिज्ञासितत्वमवसेयम्. विद्धि जानीहि. सुजाते! सुन्दरि! निर्दोषे इत्यर्थः॥ २४

अथ प्रियंवदा नृपतिमत्र कञ्चित् कालं स्वैरसल्लापैर्निवासयितुं तदनुकूलमेवोक्तवतीत्याह.

**तदन्वित्यादि**. मुदितहृदयया पूरोः कुल इत्युक्त्या सखीवरयोग्यतास्येति निश्चित्य मुदितहृदयत्वं. सफलावल्लोकन इत्यनेन प्रतिपाल्यापि दर्शनयोग्यत्वमुक्तम्. तेन भंग्या तस्य गमनं निवर्त्यते. दवीयस्तरं अतिशयेन

न्दानुगम्यमानेन विकसितकुसुमपालीविगळदविरलमधूलीसलिलकेळिमज्जनशीतळेन मन्दवाहबन्धुरेण गन्धवाहस्तनन्धयेन सुभगंभावुकायां सकललोकलोचनप्रियंभावुको भवानुपविश्य विश्रमसुखमनुभवतु तावदिति निवेदितो मेदिनीपतिरत्रोपविष्टस्सरसामिमामभाषिष्ट ॥ १२

प ॥ एषा शिरीषदलकोमलगात्रलेखा
वक्षोजभारपरिभुग्नकृशावलग्ना ।
आभ्यां विशालजघना न पदांबुजाभ्यां
स्थातुं बत क्षणमपि क्षमते सखी ते ॥ २५

ग ॥ तदनु तदीयवदनारविन्दनिष्यन्दिनीं वचनमकरन्दधोरणीं श्रवणाञ्ज-

---

दूरतरं. अनेन सुखासिकावसरो व्यज्यते. सकललोकलोचनप्रियंभावुकः अनेन दर्शनाभावे मुनेरपि खेदः स्यादिति द्योत्यते. तुन्दिलं. तुन्दादिभ्य इलच्मत्वर्थे. इन्दिन्दिरा भ्रमराः.

'मधुकरमधुपमधुव्रतशिलीमुखभ्रमरभृंगपुष्पालिहः ।
इन्दिन्दिरालिषठ्चरणचञ्चलीकालिनो द्विरफाः स्युः'

इति शब्दरत्नाकरः. मधूलीसलिले यत् केळिमज्जनं तेन शीतळेन मन्दवाहो मन्दगतिः. गन्धवाहस्तनन्धयेन वातपोतेन. सुभगंभावुकायां. प्रियंभावुक इति आढ्यसुभगेत्यधिकारे 'कर्तरि भुव' इति खुकञ. १२

युष्माभिरपीहासितव्यमित्यभिप्रेत्याह.

**एषेत्यादि**. शिरीषेत्यादिविशेषणत्रितयेन आभ्यामित्यनेन च स्थितौ शक्तिराहित्यमुक्तम्. २५

**तदन्वित्यादि**. धोरणी प्रवाहः. १३

लिनाञ्जसापीयोदीयमानमोदासु तासु तत्र निषेदुषीषु मोदमानमना मेदिनीपतिरयं प्रियंवदामिदमवादीत् ॥ १३

प ॥ अयि सुमुखि सखीन्ते कां विजानानि लोके
सुकृतिनमिह कं वा तातमस्या वदानि ।
किमिति मुनिवधूनां वेषमेषा विहाय
प्रकृतिरुचिररूपं धन्यमन्यं दधाति ॥ २६

इत्येनमत्यादरमुक्तवन्तं प्रत्यब्रवीत्सा नृप ! नस्सखीयम् ।
कण्वस्य पुत्री प्रणयैकपात्री वेषः प्रकृत्यैव न कृत्रिमोयम् ॥ २७

ग ॥ तदनु तेन मेदिनीदयितेन स खलु भगवन्वैखानसशिखामणिर्नित्यं मुक्तावुत्तिष्ठमानः प्रणयिनीविहीनः प्रणाय्यश्चेति विश्वविदितमेव । इयञ्च

---

इह नियतमियमुदैषीदित्यनेनानुमितमात्मपरिग्रहक्षमत्वं तन्मुखादेव नि-श्चिचिषुर्लोकवृत्तिमनुसृत्याह .

**अयीत्यादि** . कां विजानानि इयं केत्यर्थः . कं वा तातमस्या व-दानि . तातः को वेत्यर्थः . रुचिररूपं रुचिरस्वरूपम् . धन्यमुत्कृष्टमित्य-र्थः ॥ २६

**इतीत्यादि** . प्रकृत्यैव सहज एवेत्यर्थः . कृत्रिमः करणेन निर्वृत्तः . 'ड्वितः क्त्रिः' इति क्त्रिः . 'क्त्रेर्मम्नित्यं' इति मप् . २७

**तदन्वित्यादि** . उत्तिष्ठमान ईहमानः . 'उदोनूर्द्धकर्मणि' इत्यात्म-नेपदम् . 'उद ईहायाम्' इति वक्तव्यम् . प्रणाय्यो निष्कामः . 'प्रणाय्यो सम्मतौ' इति निपातः . अविद्यमाना सम्मतिरस्मिन्नित्यसम्मतिः . सम्मतिः

तस्य तनयेति कथमेतदिति सा कथयामासे ॥ १४

५ ॥ इत्युक्ता मेनकाकौशिकमुनिवरसम्भोगरूपामवस्थां
कस्मैचित्तापसाय स्वगुरुनिगदितां वक्तुमुद्यच्छमाना ।
बाला सा वार्यमाणाप्यमितमुदितया व्रीडया गौरवेण
क्ष्माभर्तुः प्रेर्यमाणा तमचकथदथो तद्व्यथान्तां कथान्ताम् ॥ २८

इति श्रीमानवेदविरचिते चम्पूभारते
चतुर्थस्तबकः ॥

---

सम्मतता. अभिलाषश्च. कथयामासे कथिता कर्मणि लिट्. १४

इतीत्यादि. अचकथत् कथितवती. 'णिश्री'ति चङ्. तद्व्यथान्तां कण्वस्य पुत्रीत्युक्त्या सहसोत्पन्नाया व्यथाया नाशकरीम् ॥ २८

इति श्रीमानवेदविरचितस्य चम्पूभारतस्य
टिप्पणे कृष्णीये
चतुर्थस्तबकः ॥

## अथ पञ्चमस्तबकः ॥

---

ष ॥ विश्वामित्रो हि विश्वप्रथितपृथुयशाः प्राक्तपोतप्त तीव्रं
तिष्ठन् मध्ये ललाटन्तपखरकिरणः पावकानां च तूर्णम् ।
तत्ताद्दक्तत्तपस्यातरलतरमना वृत्रवैरी तदानीं
आनीयारादराणीदतिमधुरगिरा मेनकां माननीयाम् ॥ १

ग ॥ अयि भुवनैकसुन्दरि! विश्वैकमित्रमपि विश्वामित्रो विश्वेषां नोमित्र इव नाकलोकमपहारको वरीयसि तपसि वरीवृतीति तेन नस्स्वान्तं हन्त

---

अथ पञ्चमस्तबकव्याख्यानम्

**विश्वामित्र इत्यादि**. तपोतप्त. तप आर्जितवान्. 'तपस्तपःकर्मकस्यैव' इति कर्मवद्भावः. क्रियाभेदात् पूर्वेणाप्राप्तः कर्मवद्भावोनेन विधीयते. कर्मत्वे दुःखम्. कर्तृत्वे त्वार्जनम्. इति विस्पष्ट एव क्रियाभेदः. 'तपोनुतापे च' इति चिणः प्रतिषेधः. ललाटं तपतीति ललाटन्तपः. 'असूर्यललाटयोर्दृशितपोः' इति खश्. अराणीत् उक्तवान्. मेनका नाम प्रधानाप्सरसः.

"घृताची मेनका रम्भा विद्युज्जिह्वा तिलोत्तमा ।
प्रधानाप्सरसः पञ्च संभूताः क्षीरवारिधेः"

इति पौराणिकाः ॥ १

**अयीत्यादि**. विश्वामित्रः 'विश्वस्य वसुराटोः' 'मित्रे चर्षौ इति दीर्घः. नाकलोकमपहारकः नाकलोकमपहर्तुम्. 'तुमुन् ण्वुलौ' इति भविष्यति ण्वुल्. वरीवृतीति अत्यर्थं वर्तते. यङ्लुक्. सान्तापिनं समन्तात्तापः

सान्तापिनसन्ततं बोभवीति तद्भवती झटममुष्यामुष्यायणस्य मतिं विविधैर्विलासविभवैरलं बिलोभयतु । १

इति वलवैरिवचनमवधार्य मुनिवर्यतपोवीर्यपर्यालोचनपर्याकुलधैर्यसारयानया मेनकया स शक्रो निवेदयांचक्रे ॥ २

प ॥ चित्तं तवापि वलशासन घोरघोरैः
उद्वेजयन् ज्वलति यो महितैस्तपोभिः ।
तस्यास्य तापसवरस्य तपो निरोद्धुं
स्वामिन्नियोजयसि किं कृपणामिमाम्माम् ॥ २

विधातुर्यो लोकानवितुरुदयो युज्यत पुरा
विधातुं द्वैराज्यं चिरधृततपः प्राज्यमहिमा ।

---

तेन सन्ततं व्याप्तम्. 'अभिविधौ भाव इनुण्' इतीनुण्. 'अणिनुणः' इति स्वार्थेण्. बोभवीति पौनःपुन्येन भृशं वा भवति. आमुष्यायणस्य नडादावमुष्येति निपातनात् फक्. 'प्रख्यातात् पितुरुत्पन्न आमुष्यायण इष्यते.' १

**इतीत्यादि**. पर्याकुलो धैर्यसारो यस्याः तया. निवेदयाञ्चक्रे निवेदितोभूत्. २

**चित्तमित्यादि**. वलशासन तवापीति केनाप्यनुद्वेजितमिति भावः. कृपणां क्षुद्राम्. स्त्रियम् ॥ २

एवमात्मनोशक्यत्वमुक्त्वा प्रयत्ने कृते पुनः प्राणहानिरेव स्यादित्याह.

**विधातुरित्यादि**। लोकानवितुः रक्षितुः. 'अवितृस्तृतन्त्रिभ्य ईः' इत्य-

विधायास्मिन्नेतामपकृतिमहो तन्निरभसे
विधां जाने कामप्यह ह न सुखोज्जीवनकरीम् ॥ ३

क्षत्रगोत्रप्रभूतेन प्रभूततपसा पुरा ।
ब्रह्मभूयमबोभूयि येन मानेन भूयसा ॥ ४

क्रुद्धोसाविद्धतेजास्सकलवसुमतीमादधीतान्यथा द्राक्
चूर्णीकुर्यात् सुवर्णाचलमचलमतिर्घूर्णयेदर्णवं वा ।

---

धिकारे तच्छीलादिषु त्रिष्वर्थेषु तृन्निति तृन्. तच्छीलेत्यत्र तच्छब्देन धात्वर्थ उच्यते. अत्र फलनिरपेक्षा प्रवृत्तिस्तच्छीलम्. धात्वर्थः कुलक्रमागतो धर्मो यस्य स तद्धर्मा. धात्वर्थं सकलादपि यः साधु करोति स तत्साधुकारी. 'नलोकाव्यय—' इति षष्ठीप्रतिषेधः. उदयोयुज्यत भृशमुद्युक्तोभूत्. 'युजिर् योगे'. यङ्. द्वयो राज्ञोर्भावः द्वैराज्यम्. 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः. ब्राह्मणादित्वात् ष्यङ्. 'आनन्दद्वैराज्यं विदधानः' इति प्रयोगश्च. विधां प्रकारम्. उपायमिति यावत्. देशविशेषः पुरुषविशेषो वा न शरणमिति भावः॥ परिभवे सति प्रभूतमानत्वान्न क्षमते चेत्याह. ३

**क्षत्रेत्यादि**. ब्रह्मभूयं ब्रह्मत्वम्. 'भुवो भावे' इति क्यप्. अबोभूयि प्राप्तम्. 'भू प्राप्तौ' इत्यस्माद्यङन्तात् कर्मणि लुङ्. अत्रन्ध्यकोपत्वमप्यस्यास्तीत्याह. ४

**क्रुद्धोसावित्यादि**. आदधीतेत्यादिषु चतुर्षु 'शकि लिङ् च' इति लिङ्. अचूर्णं चूर्णं कुर्यात् चूर्णीकुर्यात्. 'अभूततद्भावे सम्पद्यकर्तरि च्विः' इति च्विः. कुलधराणिधरान् कुलपर्वतान्.

'महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः ।

उद्धृत्याद्धा भुजाभ्यां कुलधरणिधरान् प्रक्षिपेदब्धिमध्ये
तत्तादृक्षं तु साक्षान्मुनिवरमिह को वीक्षितुं वापि दक्षः ॥ ५

विप्रलोभयितुं विप्रमप्रगद्भास्मि तत्प्रभो ।
शक्र ! पश्यापरां नीतिं शक्ल ! मामवविक्लवाम् ॥ ६

मेनकाभारतीमेनां दीनामाकलयन्नयम् ।
सहस्राक्षो विमृश्यैवमस्राक्षीदथ शारदाम् ॥ ७

किं विश्वमोहनतनो ! वदसि त्वमेवं
जानासि भीरु ! न निजां कमनीयतां किम् ।
पश्यन्निदं तव वपुर्भुवि को न मुह्येत्
तत्त्वं यतस्व नितरां मरुतां हिताय ॥ ८

---

विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥'

इति विष्णुपुराणे. स एव तादृक्षः तत्तादृक्षः. तत्तादृशः ॥ ५

**विप्रलोभयितुमित्यादि**. विप्रलोभयितुं प्ररोचायितुम्. अपरां मत्प्रेषणादन्याम्. शक्ल मामव एतादृशैर्मधुरवचनैर्न निर्बध्नीया इति भावः. शक्लः प्रियंवदः. अव रक्ष. ६

**मेनकेत्यादि**. विमृश्येति भंग्यन्तरेण भणित्वानयैव कार्यं साधयामीति निश्चित्येत्यर्थः. अस्राक्षीत् सृष्टवान्. 'सृजिदृशोर्झल्यमकिति इत्यमागमः॥ ७

**किमित्यादि**. 'वपुः शुभाकरे तनौ वपुः' इति वैजयन्ती. तव वपुर्विलोकने सर्वे मुह्यन्त्येव. एवं स्थिते मामवेत्युक्तिर्भीरुत्वमेव हेतुः. ८

इति रहसि मघोनो वाचमेनामघोनां
तदनु निशमयन्ती सा भृशं निश्वसन्ती ।
मुहुरपि बहुमन्यू कौशिकौ तौ स्मरन्ती
व्यमुहदुभयभागव्याप्तदावा मृगीव ॥ ९

स्वाज्ञावज्ञां न खलु सहते हन्त वृत्रस्य हन्ता
विश्वामित्रो न च परिभवं मृष्यतेधृष्यतेजाः ।
हा हा कष्टं किमिह करवै सर्वथा दिष्टदोषा-
दापन्ना मे विपदिति तदा मेनके मेनकेयम् ॥ १०

इदं न्यगादीदपि देवराजं निर्बन्धमेतस्य विचिन्तयन्ती ।
यद्भावि तस्यान्नियतं यतिष्ये भर्तुः प्रियायेति विनिश्चितात्मा ॥ ११

स्वामिन्नेव क्वचिदपि मया लंघनीया तवाज्ञा
स्वर्लोकस्य स्थितिरिह ननु प्रार्थनीया ममापि ।

---

**इतीत्यादि**. मघोन इन्द्रस्य. अघोनां निर्दोषाम्. अनारोपितार्थ-मित्यर्थः. 'दुःखैनो व्यसनेष्वघं' इत्यमरः. मन्युः क्रोधः. कौशिकौ महेन्द्रविश्वामित्रौ. 'कौशिको गुल्गुलूलूकसर्पग्राहितुण्डिके' इति निखण्टुः. व्यमुहत् इति कर्तव्यताविमूढाभूत्. दावो दवाग्निः. 'दवदावौ वनारण्यवह्नी' इत्यमरः. ९

**स्वाज्ञेत्यादि**. मृष्यते क्षमते. 'मृष तितिक्षायां' मेनके मेने. 'तिङश्च' इति कच् स्वार्थे. मेनका इयं इत्युत्तरच्छेदः. १०

**इदमित्यादि**. देवानां राजा देवराजः. 'राजाहःसखिभ्यष्टच्' इति टच् समासान्तः. भावि भविष्यत्. 'भविष्यति गम्यादयः.' ११

तन्मे देवो विसृजतु मुदा मन्मथादीन् सहाया-
नेते तावत्परमिह बलन्नूनमेतादृशीनाम् ॥ १२

तदास्येन्दुगळत्सूक्तिसुधास्वादसुनिर्वृतः ।
गीर्वाणग्रामणीर्वाणीमवाणीद्वरवर्णिनीम् ॥ १३

वरतनु! भवती तद्विश्वविक्षोभदक्षै-
र्मदनविधुसमीरैर्माधवेनापि साकम् ।
सपदि समुपयाता कौशिकस्योपशल्यं
महिततरतपस्याभञ्जनी जञ्जनीतु ॥ १४

ग ॥ अनन्तरमखिललोकलोचनासेचनकसुषमामण्डलेयमखण्डामाखण्डलाज्ञां अधिमौलि मालामिव धारयन्ती गाथिनमनोमथनमवधारयन्ती बहुलतासंकुलं बहुलतापसकुलालंकृतं कुशिकनन्दनतपोवनमुपगम्य विवि-

---

**स्वामिन्नित्यादि**. स्थितिः रक्षा. मम 'कृत्यानां कर्तरि वा' इति कर्तरि षष्ठी. एते तावत् एत एव. १२

**तदास्येत्यादि**. गीर्वाणग्रामणीर्देवश्रेष्ठः. 'ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु' इत्यमरः. अवाणीत् उक्तवान्. वरवर्णिनी स्त्रीपूत्तमा. वरा वर्णाः सन्त्यस्या इति वाणीविशेषणं वा. मधुरतगामिति यावत्. १३

**वरतन्वित्यादि**. तस्मात् माधवेन वसन्तेन. भञ्जनीं जञ्जनीतु अत्यर्थे भञ्जनी स्यात्. अत्र लोटा विध्याशषौ विवक्षिते. जनी प्रादुर्भावे. यङ्लुक्. १४

**अनन्तरमित्यादि**. अधिमौलि मौलौ. धारयन्तीति तदाज्ञापरिग्रहे

धतरुलताविसरविरोचमानविकचकुसुमचयावितायमानपरिमळात्यन्ततरळबहलभसलावलीगलनालगळितकलनादकबलितसकलयुवलोकधैर्यसारेण माकन्दवृन्दमञ्जरीपुंजसमास्वादभरितानन्दपरभृतसुन्दरीवृन्दगळाञ्चलोदञ्चितपञ्चमरागवञ्चितप्रपञ्चेन पञ्चसायकसामन्तेन वसन्तेन शिशिरतरसान्द्रचन्द्रिकासमाह्लादितसकलभुवनतलेन तुहिनकरेण मन्दतरान्दोळितसुरभिकुसुमसन्दोहकन्दलदमलमकरन्दशीकरव्यतिकरशीतलेन रचितपथिकपरिषदमन्दारुतेन मन्दमारुतेन निखिलजनमनोमदनेन मदनेन च समं सरसविलासैरमुं विलोभयितुमारेभे ॥ ३

प ॥ कुसुमेषोरिषुधिवरौ मा भूतां शून्यसायकौ सुहृदः ।
इति मत्वेव वसन्तः कुसुमान्युदजीगमत्स शाखिगणे ॥ १५

माध्वीविलाससुभगस्सहसा सकान्तो
गाढं प्ररूढमदनां विपिनावनीं ताम् ।

---

प्रश्रयातिशय उक्तः. मालामिव. अत्र मौलिधारणं निमित्तम्. 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इत्यमरः. गायिनो विश्वामित्रः. भसळा भ्रमराः. माकन्दः सहकारः. सामन्तो माण्डलिकः. पथिकपरिषदाम्. अमन्द आरुतं रोदनं इत्यर्थः. ३

अथ तत्र साहाय्यार्थमुपागतानां वसन्तादीनां प्रवृत्तिमाह ।

**कुसुमेषोरित्यादि**. इषुधिवरौ निषंगश्रेष्ठौ. उदजीगमत् उद्गमयामास ॥ १५

**माध्वीत्यादि**. माध्वी मद्यं मधु च. कान्तो भर्ता मनोहरश्च. मदनः कामो वृक्षविशेषश्च. आमोदो हर्षः सौरभ्यं च. तिलकं चित्रकं.

आमोदयत् परिलसत्तिलकालिकान्तां
काम्यामलम्मुनिभिरप्यतिमुक्तसंगैः ॥ १६

मन्ये महति कार्येऽस्मिन्मारादपि महान्मधुः ।
यदनेन विना नैव तपस्यावसितिर्भवेत् ॥ १७

कुलाचलोपममपि चलाचलमभून्मनः ।
तदा तदटवीभाजां मधुना को न माद्यति ॥ १८

अनिरुद्धगतिं कामं माधवोऽयमजीजनत् ।
भासुरो यमिनां चित्ते समयाधिगतस्तदा ॥ १९

---

परिलसत्तिलकमालिकान्तं यस्यास्तां. अलिकं ललाटं. परिलसतां तिलकानां वृक्षविशेषाणां आलिभिः समूहैः कान्तां च. मुनिभिः ऋषिभिः. मुनिद्रुमैश्च. अतिमुक्तः अत्यर्थमुक्तः संगो यैस्तैः. अतिमुक्तः पुण्ड्रकश्च. अत्र समासोक्तिरलंकारः ॥ १६

**मन्यइत्यादि** । मधुर्वसन्तः. तपस्यायास्तपश्चर्यायाः. तपस्यस्य तपस्यमासस्य च. अत्र तपस्यस्यावसितिरिति प्रतीयमानमर्थं विनावाच्यस्यासिद्धेर्वाच्यसिद्ध्यंगं नाम गुणीभूतव्यंग्यं ॥ १७

**कुलाचलेत्यादि** । कुलाचलाः कुलपर्वताः. चलाचलं चञ्चलं. पचाद्यचि "रिचलिपतिवदीनामच्याक्चाभ्यासस्य" इति द्विर्वचनमभ्यासस्याक्च. तदटवीभाजां तदरण्यनिवासिनाम्. मधुना मद्येन वसन्तेन च ॥ १८

**अनिरुद्धेत्यादि** । अनिरुद्धा अप्रतिहता गतिर्यस्य. गतिरुद्गतिः वृद्धिरिति यावत्. अनिरुद्धस्य उषापतेः. गतिराश्रयः. पितेति यावत्. माधवो वसन्तः श्रीकृष्णश्च. यमिनां चित्ते काममजनयत्. चित्ते भासुर इति

लोकान्विजेतुमनसो मदनस्य हेम-
च्छत्रं किमुद्धृतमिति प्रथयन् विशंकाम् ।
उद्दामकान्तिमहिमा स हि शीतभानु-
रुद्यन्नलं भुवनमुन्मदयांचकार ॥ २०

तत्कालसंफुल्लरसालसूनगळन्मधूलीमृदुशीकरार्द्रः ।
विलोलयामास तदा समीरो वनानि चेतांसि च तापसानाम् ॥ २१

कन्दर्पोनल्पकान्तिश्चरमचरमपि क्षोभयन् भूतजातं
मोदादादाय चापं रतिभुजलतिकाश्लेषधन्यात्सकण्ठात् ।
सद्योऽस्मिन् सन्दधानो निखिलजनमनोमोहनं मोहनास्त्रं
विश्वामित्रस्य धैर्यश्लथनानियतधीर्गूढमस्थात् पुरस्तात् ॥ २२

---

च. असमयाधिगतः अकालप्राप्तः. सः मया श्रिया अधिगत इति च. अत्र शब्दशक्तिमूलो ध्वनिः. इह वसन्तप्रवृत्तीनामामोदनसंक्षोभणमदोत्पादनादीनां हेतुहेतुमद्भावोवगन्तव्यः. १९

**लोकानित्यादि**. विजेतुं मनो यस्य. 'तुं काममनसोरपि' इति मकारलोपः. उन्मदयांचकार मदयति स्म. २०

**तत्कालेत्यादि**. 'फुल्ले प्रफुल्लसंफुल्ला' विति वैजयन्ती. रसाळश्चेतः. अत्र तुल्ययोगितालङ्कारः. २१

**कन्दर्प इत्यादि**. कण्ठात् लक्षणया स्कन्धात्. धैर्यश्लथने नियता निश्चिता धीर्यस्य. गूढमस्थात्. तिरोहितस्तिष्ठति स्म. 'गातिस्थाघुपाभूभ्यः' इति सिचो लोपः. २२

MUL
022388